॥ त्रिपथगाव्याख्याने शास्त्रत्वसम्पादनोद्देशनामकं प्रथमं प्रकरणम् ॥

॥श्री हयग्रीवाय नमः ॥[१]

पुरान्तकसुराधिपप्रमुखसेवितं दैवतं
पुरातनगिरा स्तुतं कमलया समालिङ्गितम् ।
चराचरविधायि तत्प्रणिपनीपताम्यादरात्
उरस्सरधराधरप्रवरनीलधाराधरम् ॥ १ ॥

श्री वेङ्कटेशं पितरं सर्वतन्त्रविशारदम् ।
सावित्रीं मातरं नौमि गुरून् विद्याप्रदांस्तदा ॥२ ॥

वितन्यते त्रिपथगा विष्णुपादाब्जसङ्गिनी ।
सागरस्य प्रिया चेन्दुशेखराङ्कविहारिणी ॥३ ॥[२]

---

[१] श्री हयग्रीवाय नमः M^1 : श्री गणेशाय नमः V A^2 M^2 om A^1

[२] पुरान्तक ..... धाराधरम् ॥१ ॥ V:

पुरान्तकसूराधिपप्रमुखसेवितं दैवतं

पुरातनगीरा स्तुतं कमलया समालिङ्गितम् ।

चराचरविधायितत्प्रणिपनीपताम्यादरा

दुरस्सरधराधरप्रवरनीलधाराधर ॥१ ॥ M^2 : om A^1 A^2 M^1

श्री वेङ्कटेशं .....विद्याप्रदांस्तदा ॥२ ॥ V M^2 : om A^1 A^2 M^1

वितन्यते .....विहारिणी ॥३ ॥ V A^1 M^2 : om A^2

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम् ।

विघ्नान्निघ्नन्तमनघं विष्वक्सेनं तमाश्रये ॥ M^1

[१]

प्रारीप्सितग्रन्थसमाप्तिप्रचारादिप्रतिबन्धकदुरितोपशमाय[१] कृतं मङ्गलं शिष्य-शिक्षायै निबध्नाति[२] ॥ **नत्वेति** ॥ **नागेश इति**। ननु आत्मनाम...¶ (द्र० वै० सि० कौ०3-1-101/2849) इति निषेधात्[३] अयुक्तमिदमिति चेदत्र[४] केचित् - आत्मनामेति निषेधो व्यावहारिकनाममात्रविषयः। इदं तु यौगिकं नाम । अत एव भगवान् पतञ्जलिरपि गोनर्दीय आह (1-1-21भा०प्र०ख०प०आ०पृ०298) इति तत्र तत्र यौगिकं नाम जग्राहेति। तन्न। नामान्तरेणाव्यवहारात् व्यवहारेप्येतन्नाम्न एव प्रसिद्धेश्च। अभिवादनादौ व्यावहारिकनामोत्कीर्तनं न दोषायेति तत्त्वम्। कूपखानकन्यायेन समाधानं केचिदाहुः। **सुधीरिति**। इदं स्वस्य ग्रन्थकरणशक्त्याद्याविष्करणाय।[५] सुखमनायासः। आयासेन भाष्या-दितोऽपि बोधसम्भवात्।

[२]

प्राचीनेति। पाणिनेः[६]। ज्ञापकन्यायसिद्धानीति पृथक् कोटिः। अनेन परि-भाषासूत्रव्युदासः[७]। केचित्तु प्राचीनेत्याद्येकैव कोटिः। ज्ञापकन्यायेत्यत्र प्रायेणेति शेषः। तेन वाचनिकानां सङ्ग्रह इत्याहुः। **भाष्येति** । इदं द्वयोर्विशेषणम्। अनेन

---

[१] प्रारीप्सितग्रन्थ.....बोधसम्भवात्। V A^2 M^2 : नागेश इति। आत्मनामेति निषेधो नाम केचित्। सुखमनायासः। आयासेन भाष्यादितोऽपि बोधसम्भवात् A^1 om M^1

[२] प्रारीप्सितग्रन्थ.... निबध्नाति V M^2 : om A^2 A^{1*} M^{1*}

[३] निषेधात् V M^2 : निषेधो नाम विशेषविषय इति केचित् A^2 A^{1*} M^{1*}

[४] चेदत्र V A^2 : चत्रत्र M^2 A^{1*} M^{1*}

[५] आत्मनामेति निषेधः .....शक्त्याद्याविष्करणाय V M^2 : om A^2 A^{1*} M^{1*}

[६] पाणिनेः V A^1 A^2 M^2 : पाणिनीये M^1

[७] ०षासूत्रव्युदासः V A^2 M^2 : ०षा पर्युदासः। M^1 A^{1*}

स्तिपाशपा...¶ इत्यादि[१]व्युदासः। प्राचीनवैयाकरणतन्त्रे वाचनिकत्वेन पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धत्वेन भाष्यवार्त्तिकयोर्निबद्धानीत्यर्थः।[२] **परिभाषेति**। परितो व्यापृतां भाषां परिभाषां प्रचक्षते इति कारिकायां लि[३]ङ्गवत्त्वे सति फलवत्त्वं परिभाषा-त्वमिति[४] केचित् । संज्ञाशास्त्रान्यत्वे सति विद्ध्यपेक्षितार्थविधायकत्वं तत्त्वम् ॥ संज्ञा च परिभाषा च ¶(लघु०व्या०च०वर०पृ०10) इत्यभियुक्तोक्तावतिदेशस्य पृथगुपादानं[५] ब्राह्मणवसिष्ठन्यायेनेति[६] परे ॥

[३]

व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् ॥ १ ॥

व्याख्यानत इति।

पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम्॥ १ ॥

---

[१] शपेत्यादि V M^1 M^2 : शपेति A^1 A^2

[२] प्राचीनवैयाकरणतन्त्रे .....वार्त्तिकयोर्निबद्धानीत्यर्थः। V M^2 : om A^1 A^2 M^1

[३] ०ते इति कारिकायां लि० A^2 M^1: ०ते। लि०V A^1 M^2

[४] परिभाषात्वमिति V A^2 M^1 M^2 : परिभाषात्वमित्यपि A^1

[५] ०पेक्षितार्थविधायकत्वं तत्त्वं तु अन्ते॥ संज्ञा च परिभाषा च ... इत्यभियुक्तोक्तावतिदेशस्य पृथगुपादानं M^1: ०पेक्षितार्थ.....पृथगुपादानं V M^2 ०पेक्षितार्थं प्रति विधायकत्वं तत्त्वम्॥ संज्ञा च परिभाषा च इत्यभियुक्तोक्तावतिदेशस्य पृथगुपादानं प्राह A^1 ०पेक्षितार्थं प्रतिपादकत्वं त०A^2

[६] ब्राह्मणवसिष्ठन्यायेनेति A^2 M^1 : गोबलीवर्दन्यायेनेति V M^2 गोबलीवर्द एव न्यायेनेति। A^1

[१]

यथोद्देशं संज्ञापरिभाषम् ॥ २ ॥

॥ एकवाक्यतयैव नियम इति[१] ॥ यथोद्देशपक्षे इति शेषः।

ननु[२] उभयत्राप्येकवाक्यताया अविशेषे कोऽनयोर्भेदः[३] ? न च स्वदेशे एकवाक्यता[४] एकत्र परत्र च विधिदेशे इति भेदः[५]। फलभेदाभावे एतस्या-किञ्चित्करत्वात् इत्यतः[६] फलभेदमाह-**त्रिपाद्यामपीति**। त्रैपादिकेन विधिना स्वसंस्काराय[७] परिभाषोपस्थापनात्[८]। अदृश्यपिशाचेन आकर्षणदर्शनात्[९]।

[२]

पक्षद्वयसाधारणमिति। अविशेषेण प्रवृत्तेरिति भावः। **प्रदेशैकवाक्यताया इति**। सर्वशास्त्राभिज्वलनं च एकवाक्यतया संस्कारकत्वमिति भावः।

इदं चिन्त्यम्। संस्कारमात्रस्यैव ज्वलनशब्दार्थत्वे बाधकाभावेन[१०]

---

[१] व्याख्यानत इति। ..... एकवाक्यतयैव नियम इति ॥ V M^2 : एकवाक्यतयैव नियम इति। केचित्त्विति A^1 A^2 M^1

[२] ननु .....फलभेदमाह V A^1 M^1 M^2 : om A^2

[३] ०क्यताया अविशेषे कोऽनयोर्भेदः V M^1 M^2 : ०क्यता विषयकोऽनयोर्भेदः A^1 A^{2*}

[४] न च स्वदेशे एकवाक्यता V M^1 M^2 : किं च स्वदेशे एकवाक्यतया A^1 A^{2*}

[५] भेदः V M^1 M^2 : फलभेदः A^1 A^{2*}

[६] इत्यतः V M^2 : इत्थं ० A^1 इत्यतः अतः M^1 A^{2*}

[७] स्वसंस्काराय V A^2 M^1 M^2: सिद्धान्तसंचाराय A^1

[८] ०पस्थापनात् V A^1 M^2 : ०पस्थानानात् A^2 ०पस्थानात् M^1

[९] अदृश्यपिशाचेन आकर्षणदर्शनात् V M^2 : अस्य पिशाचस्य A^1 पिशाचस्याप्यावेशद० A^2 पिशाचस्यावेशद० M^1

[१०] बाधकाभावेन V A^2 M^2 : बाधकाभावेऽनेन A^1 M^1

एकवाक्यतयेति निवेशे[१] मानाभावात्। स्वदेशे गृहीतवाक्यार्थबोधस्य तत्र[२] विधौ स्मृतिमात्रेण तत्तत्संस्काराभिप्रायेणैव[३] एकदेशस्थः इत्युक्तेरुपपत्तेश्च।[४] एकवाक्यतया संस्कारकत्वे हि अधिकारस्यापि तथात्वेन ततो विशेषाभिधित्सया तथोक्त्यसङ्गतिः। प्रदीपदृष्टान्तस्तु एवमेत[५]त्स्वबुद्धिजननद्वारेत्यन्तेन ग्रन्थेन एकवाक्यतामन्तरा त्वयैव योजितः। स्वबुद्धिजननद्वारेति त्वदुपपादनं[६] च एकवाक्यतायां नानुकूलम्। कार्यकालपक्षे तवा[७]प्येवमेव वक्तव्यत्वात्। न हि[८] तवापि कार्यकालपक्षे परिभाषाणां स्वदेशे वाक्यार्थाभावः। बाधकाभावात्। संज्ञाशास्त्रस्य त्विति वक्ष्यमाण विशेषोक्त्ययोगाच्च[९]। न हि स्वबुद्धिरेकवाक्यतया बोधः। किन्तु स्मृतिमात्रम्[१०]। संस्कार्य विधी[११]नामनेकत्वेन युगपत् श्रोतृबुध्यनारोहेण[१२] तावतामुपस्थानासम्भवाच्च। प्रधानेन गुणाकर्षणे अपि गुणेन प्रधानाकर्षणस्यायुक्तत्वाच्च[१३]। न हि प्रयाजादिवाक्यैः पूर्णमासादिवाक्यम्

---

[१] तयेति निवेशे V A^1 A^2 M^2 : ०क्यतानिवे० M^1

[२] ०क्यार्थबोधस्य तत्र V A^1 M^2 : ०क्यार्थस्य तत्र तत्र A^2 ०क्यार्थस्य M^1

[३] तत्तत्संस्काराभिप्रायेणैव V M^2 : संस्काराभिप्रायेण A^1 ०भिप्रायेण A^2 तत्संस्काराभि०M^1

[४] इत्युक्तेरुपपत्तेश्च V M^2 : इत्युक्तिः A^2 इत्यर्थः M^1 A^1

[५] एकदेशस्थ० .....एवमेतत् V M^2 : एकदेश इत्युक्तिः A^1 A^2

[६] ०द्वारे तित्वदुपपादनं V M^2 : ०द्वारेति तदुपपादनं A^1 ०द्वारेत्युपादानं M^1 A^2

[७] तवा० V A^2 M^1 M^2 : तेना० A^1

[८] न हि V A^2 M^2 : ननु A^1 न हि तु M^1

[९] ०विशेषोक्त्ययोगाच्च V A^2 M^2 : ०विशेषानुपयोगाच्च A^1 ०विशेषयोगाच्च M^1

[१०] न हि स्वबुद्धिरेकवाक्यतया बोधः। किन्तु स्मृतिमात्रम्। V M^2 : om A^1 A^2 M^1

[११] संस्कार्यविधी० V A^1: संस्कारविधी० A^2 M^1

[१२] श्रोतृबुध्यनारोहेण तावता० V M^1 A^2 : श्रोतृबुध्यनारोहे जतांवता० M^2 श्रोतृबुद्ध्यारोहेण तावता० A^1

[१३] प्रधानेन.....युक्तत्वाच्च V A^2 M^2 : प्रकर्षणेऽपि गुणेन प्रधानाकर्षणस्या.....०युक्तत्वात् A^1 om M^1

आकृष्यते।[१] क्ङिति च (1-1-5/2217) इति सूत्रस्थकैयटस्तु एकदेशिपक्षाशयवर्णनाय प्रवृत्तः। इत एवारुच्या भाष्येऽथवेति पक्षान्तरमुपन्यस्तम्[२]। तत्पक्षे तु विधिप्रदेशे एकवाक्यता, संज्ञाशास्त्रस्य त्विति वक्ष्यमाणविशेषोक्त्या[३]कार्यकालपक्षे परिभाषाणां स्वदेशे वाक्यार्थबोधकत्वस्य त्वदभिमतत्वसिद्धेः।

ननु असिद्धत्वस्योभयत्राविशेषे कार्यकालपक्षे एव त्रिपाद्यां प्रवृत्तिरिति नियमे किं बीजम् ? न च तत्र स्वदेशे वाक्यार्थाबोधो बीजं पदार्थोपस्थितौ तद्बोधे बाधकाभावात्। तदेतदभिप्रेत्योक्तं पूर्वत्रासिद्धम् (8-2-1भा०ष०ख०प्र० आ०पृ०76) इति सूत्रे भाष्ये यद्यपीदं तत्रासिद्धमिति इति चेन्न। कार्यकालपक्षे संस्कार्याकाङ्क्षयैव परिभाषाप्रवृत्तिः। यथोद्देशपक्षे तु संस्कारकाकाङ्क्षयैवेति नियमाङ्गीकारात् । एतत् चोत्तरत्र विशेषेण निरूपयिष्यामः।

[३]

एतावानिति॥ इदमपि चिन्त्यम्। यथोद्देशे[४]। **परिभाषादेशे इति।** तत्रैवेत्यर्थः।[५] **परिकल्प्येति॥** एकवाक्यता भवतीत्यर्थे समानकर्तृकत्त्वाभावात्। क्त्वाऽनुपयुक्तः।[६]

---

[१] क्यैः पूर्णमासादिवाक्यम् आ० V M^1 M^2 : ०क्यैः पौर्णमासवाक्यम् आ० A^2 प्रयाजादिव आ०M^1

[२] ०स्तम्० V A^1 M^2 : ०स्तम् इति दिक्। A^2 M^1

[३] वक्ष्यमाणविशेषोक्त्या V A^1 A^2 M^1 : वक्ष्यमाणाविशेषोक्त्या M^2

[४] एतावानिति॥ इदमपि चिन्त्यम्। यथोद्देशे A^1: एतावानिति V A^2 M^1 M^2

[५] **तत्रैवेत्यर्थः** V A^2 M^2 : तत्रैवचेप्यर्थः। M^1 A^1

[६] क्त्वाऽनुपयुक्तः। M^1 M^2 : क्वा न युक्त इति केचित्। V A^2 A^1

[४]

विधिप्रदेश इति[१] ॥ तत्रैवेत्यर्थः। आद्ये कार्यदेशे विधिशास्त्रस्य द्वितीये परिभाषायाः स्वदेशे पृथग्वाक्यार्थो बोध्यः[२]। **वारयतीति** ॥[३] स्वदेशे पृथक् वाक्यार्थबोधकत्वमेकदेशस्थत्वे तन्त्रमिति भावः। उक्तपक्षद्वयस्य संज्ञापरिभाषामात्रविषयत्वे क्ङिति च (1-1-5/2217) इति निषेधसूत्रे कार्यकालपक्षोक्त्ययोग इत्यत आह -- **निषेधवाक्यानामिति। तत्रेति** ॥ निषेधसूत्रे इत्यर्थः। **पर्युदासन्यायेनेति**। क्ङिति नेत्यस्य तद्भिन्नेत्यर्थ इति भावः। ननु[४] प्रथमान्तान्य[५]समभिव्याहृतासमस्तनञो न पर्युदासार्थकत्वं[६], भूतले घटो न इत्यतः[७] भूतलभिन्ने घट इति बोधाभावात् इत्यरुचेराह[८]। **प्रसज्येति**। सह युगपत्[९]। विधिनिषेधयोरेकवाक्यत्वासम्भवादिति भावः।

---

[१] **विधिप्रदेश इति** ॥ ..... तन्त्रमिति भावः। V A^2 M^1 M^2 : विधिदेशे परिभाषाणां कार्यकाले च परिभाषादेशे च विधेरुपस्थानाविशेषात्।अन्यथा श्रुतेति। कैयटोक्तादविशेषात्। **वारयतीति**। स्वदेश पृथग्वाक्यार्थबोधकत्वमेकदेशस्थत्वे तन्त्रमिति भावः। A^1

[२] ०क्यार्थो बोध्यः V A^2 M^2 : ०क्यार्थः बोधः M^1 A^{1*}

[३] वारयतीति M^1 : वाक्यतेति V A^2 M^2 A^{1*}

[४] **निषेधवाक्यानामिति । तत्रेति**..... इति भावः। ननु V M^2 : निषेधेति। यत्र A^1 निषेधेति। A^2 निषेधेति। तत्र M^1

[५] प्रथमान्तान्य० V A^1 A^2 M^2 : प्रथमान्तस्य M^1

[६] पर्युदासार्थकत्वम् V A^1 A^2 M^2 : इतरथा M^1

[७] न इत्यतः V A^2 M^2 : इतरथा M^1 नास्तीत्यतः A^1

[८] इति बोधाभावात् इत्यरुचेराह V : वर्ततेति बोधापत्तिः। अत आह A^1 बोधापत्तेरित्यताह A^2 M^1

[९] युगपत्। V A^1 A^2 : युगपदर्थः। M^1 M^2

[५]

न पृथगिति। संज्ञाशास्त्रार्थबोधं[१] विना विधिवाक्यार्थबोधमात्रस्यापि असम्भवेनात्याकाङ्क्षित[२]त्वान्न स्वदेशे वाक्यार्थ इत्यर्थः। तथा च तद्देशे[३] वाक्यार्थबोधजनकत्वस्य तद्देशस्थत्वे तन्त्रत्वेन तदभावे तदभावः इति भावः। स्वदेशे वाक्यार्थबोधाभावस्य स्वदेशस्थत्वाभावे प्रयोजकत्वमुपपादयति। **असिद्धत्वस्येति**[४]। ननु शास्त्रासिद्धत्वपक्षे स्वदेशे[५] वाक्यार्थबोधाभावेऽपि शास्त्रस्य दृष्ट्या कुतो मुत्वं[६] नासिद्धमत आह-**कार्यार्थतयेति**। **कार्यज्ञानञ्चेति**। अनुनासिकरूप[७]कार्यज्ञानं चेत्यर्थः। परिभाषायास्तु स्वदेशे अपि पृथग्वाक्यार्थबोधेन स्वदेशेऽस्य कार्यज्ञानम्[८]। **तद्देशस्थत्वस्येति**[९]। स्वदेशस्थत्वस्येत्यर्थः। असिद्धत्वादभावात्।[१०] तद्देशस्थत्वस्येति पाठो न

---

[१] ०शास्त्रार्थबोधं V A^1 A^2 : ०शास्त्रबोधं M^1 M^2

[२] ०मात्रस्यापि असम्भवेनात्याकाङ्क्षित० V A^1 M^2 : ०मात्रस्यापि अभावेनात्याकाङ्क्षित० A^2 ०मात्रस्याभावेन अन्याकाङ्क्षित० M^1

[३] तथा च तद्देशे वाक्यार्थबोधजनकत्वस्य .....असिद्धत्वोपपादन वैयर्थ्यात्। V A^1 A^2 M^2 om M^1

[४] तथा .....**असिद्धत्वस्येति** V M^2 : om A^1 A^2 M^{1*}

[५] स्वदेशे V A^1 A^2 : देशे M^2 M^{1*}

[६] शास्त्रस्य दृष्ट्या कुतो मुत्वं A^1 A^2 : शास्त्रस्य कुनामुत्वं V M^2 M^{1*}

[७] कार्यार्थतयेति। कार्यज्ञानञ्चेति। अनुनासिकरूप० V M^2 : कार्यार्थतयेति।प्रह्यसंज्ञारूप० A^1 ०येति कार्यज्ञानञ्चेति। प्रह्यसंज्ञारूप० A^2 M^{1*}

[८] परिभाषायास्तु ....कार्यज्ञानम्। V M^2 : om A^1 ०शेऽपि पृथगर्थबोधेन स्वदेशेऽपि कार्य० A^2 M^{1*}

[९] **त्वस्येति**० V : त्वस्येति पाठः A^1 ० ति पाठः। A^2 M^{1*}

[१०] असिद्धत्वादभावात्। V: स्वदेशस्थत्वस्येत्यर्थः। असिद्धत्वाभावात् A^1 स्वदेशस्थत्वस्येत्यर्थः। असिद्धत्वादभावात्। om A^2 : आसद्धत्वादभावात् M^2 M^{1*}

युक्तः। असिद्धत्वोपपादनवैयर्थ्यात्।

[६]

ननु[१] पदसंज्ञाविषये यथोद्देशपक्षस्यैवाङ्गीकारे त्रिपाद्यामप्रवृत्तिः स्यादत आह[२]। **पदादीति** ।असिद्धत्वस्य कार्यार्थतया संज्ञाशास्त्रदृष्ट्या वाक्यार्थबोधात् पूर्वं तत्प्रदेशस्थस्य नासिद्धत्वम्। तदुत्तरं तस्यासिद्धत्वे तु फलाभाव इति भावः। **आहुरिति**[३]।

अन्ये तु संज्ञाशास्त्रस्य कार्यकालपक्षे स्वदेशे वाक्यार्थाबोधकत्वं न युक्तम्। पदपदार्थोपस्थित्या च सामग्र्याः सत्त्वात्। अत्याकाङ्क्षायाः तत्प्रति-बन्धकत्वं तु अप्रामाणिकम्। संज्ञापरिभाषयोः कार्यकालपक्षे स्वदेशस्थता विधिदेशस्थता च । अत[४] एव क्ङिति च (1-1-5/2217) इति सूत्रे भाष्ये[५] कार्यकालपक्षे तस्याङ्गाधिकारस्थतोक्ता[६](1-1-5भा०प्र०ख०च०आ०पृ०214 - 215)। तत्र विधिप्रदेशस्थत्वेन[७] पौर्वापर्यं मुख्यम्। विरोधप्रतिसन्धानादेः तत्रैव सम्भवात्[८]। तदभावे पाठकृतमपि। तेन अयादिभ्यः परैव

---

[१] ०त्। ननु ० V A^1 M^1 M^2 : ०त्।असिद्धत्वात्। अभावात्। ननु ० A^2

[२] ०मप्रवृत्तिः स्यादत आह V M^2 : ०त्त्युपपत्तिरत आह A^1 ०मप्रवृत्त्यापत्तिः अत आह। A^2 ०मप्रवृत्त्यापत्तेरत आह। M^1

[३] **पदादीति** ।असिद्धत्वस्य कार्यार्थतया संज्ञाशास्त्रदृष्ट्या वाक्यार्थबोधात् पूर्वं तत्प्रदेशस्थस्य नासिद्धत्वम्। तदुत्तरं तस्यासिद्धत्वे तु फलाभाव इति भावः। **आहुरिति** A^1 A^2 M^1: **पदादीति। आहुरिति** V M^2

[४] अत V M^1M^2 : अत पदपदार्थोपस्थितौ स्वदेशेऽपि तयोर्वाक्यार्थबोधे बाधकाभावात्। अत० A^2 om A^1

[५] भाष्ये V A^1 M^2 : om A^2 M^1

[६] स्थतोक्ता V M^2 : ०ता भाष्योक्ता ०A^1 A^2 M^1

[७] ०शस्थत्वेन V A^1 A^2 M^2 : ०शस्थत्वेनैव M^1

[८] तत्रैव सम्भवात्। V A^1 A^2 M^2 : तत्रासम्भवात्। M^1

प्रगृह्यसंज्ञा (1-1-12 भा०प्र०ख०प०आ०पृ०221) इत्यादिभाष्यस्य तस्मिन् ...(1-1-66/40) इति सूत्रस्थवक्ष्यमाणभाष्यस्य च नासङ्गतिः[१]। भादिसंज्ञाविषये यथोद्देशपक्षः एवेत्यपि न युक्तम्[२]। भस्य (6-4-129/233) इत्युपस्थितमिदं भवति यचि भम् (1-4-18/231) इति भाष्यासङ्गतेः[३]। रामावित्यादाविति वक्ष्यमाणत्वद् ग्रन्थासङ्गतेश्च। किञ्च यथोद्देशपक्षे संज्ञाशास्त्राणां परिभाषाणामिव स्वदेशे विधिभिः एकवाक्यतायां त्रिपादीस्थेन तदभावात् तत्र संज्ञा न स्यात्। जातशक्तिग्रहेणेत्याद्यपि न। तुल्ययुक्त्या[४] गृहीतपरिभाषार्थेन त्रिपादीस्थकार्यसंस्कारापत्तेः। षष्ठी स्थाने योगा (1-1-49/38) इति परिभाषाया अपि शक्तिग्राहकत्वेन संज्ञाशास्त्रसमशीलतया त्वद्रीत्या तस्याः त्रिपाद्यां प्रवृत्युपपत्तौ तदभावापादनपरेण पूर्वत्रासिद्धम् (8-2-1) इति सूत्रस्थभाष्येण सह विरोधापत्तेश्चेत्याहुः॥ २॥

[१]

कार्यकालं संज्ञापरिभाषम्। ॥ ३ ॥

ननु कार्यं कालो यस्य इत्यर्थेन कार्यदेशस्थत्वमेवार्थः । सम्पन्न इत्याशङ्क्याह -

---

[१] तेन अयादिभ्यः .....नासङ्गतिः V M^2 : अन्यथा यूष्णः इत्यादौ नलोपणत्वयोरापत्त्यनापत्तिभ्यां तदसङ्गतिः। किञ्च A^1A^2 M^1

[२] ०पक्ष एवेत्यपि न युक्तम् V M^2 : ०पक्षस्यैवाङ्गीकारे कार्यकालं संज्ञापरिभाषं A^1 A^2 M^1

[३] भाष्यासङ्गतेः V M^2 A^2 M^1: भाष्योक्तं सङ्गच्छते। A^1

[४] तेन अयादिभ्यः.....तुल्ययुक्त्या V M^2 A^1 om A^2 M^1

कार्येणेति ।[१] **लिङ्गचिह्नितेति ।** तदधीनप्रवृत्तिकेत्यर्थः ।

[२]

अत एवेति । काल्यतेत्यस्य स्ववृत्तिलिङ्गचिह्नितपरि[२]भाषाणामाक्षेपः इत्यर्थ-पर्यवसानादेव । एतस्य यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमित्युक्तमित्यनेनान्वयः । **तावताप्यसिद्धिरित्यभिप्रायके इति ।** संस्कार्यदृष्ट्या संस्कारकस्य सिद्धत्वेऽपि संस्कारकदृष्ट्या संस्कार्यस्यासिद्धत्वेन संस्कारासम्भव इति आशयः ।

---

[१] रामावित्यादाविति.....**कार्येणेति ।** V M^2: तथा च कार्यकालपक्षे संज्ञाशास्त्राणां स्वदेशपरित्यागे , परिभाषाशास्त्राणामित्यर्धजरतीय न्यायः हेयः इति भावः । काल्यत इति कल विलक्षेप इति चौरादिक-मिदं रूपम् । **चिह्नितेति ।** तदधिकप्रवृत्तिकेत्यर्थः । वस्तुतस्तु कार्यकालोऽयम् इति । कार्यस्य कालो यस्येति बहुव्रीहिः । कार्यकालं संज्ञापरिभाषम् । यत्र कार्यं तत्रोपस्थितमिदं द्रष्टव्यमिति तथैव भाष्य-स्वरसात् । यथोद्देशे परिभषाणां स्वदेशे विधेराधिक्ये वा विशेषबोधार्थस्यासङ्गतत्वाच्च । तस्मात् कार्यकालमित्यस्य चोक्त एवार्थः । तत्र च तयोः कार्यदेशेऽर्थत्वमिति सिद्धमेव । तथा च यथोद्देशे स्वदेशे गृहीतवाक्यार्थस्य , प्रदेशे स्मरणमात्रम् । कार्यकाले तु प्रदेशे वाक्यैकवाक्यतेति विशेषः । A^1
किञ्च अत एव कार्यकालं संज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति । यचि भमिति भाष्योक्त-भादिसंज्ञाविषये यथोद्देशपक्षस्यैवाङ्गीकारे संगगधते ।अन्यथा यूष्मा इत्यादौ कार्यकालपक्षे नलोपणत्वयोरापत्त्यनापत्तिभ्यां तदसङ्गतिः । ननु रामावित्यादौ इति वक्ष्यमाणं च विरुद्धम् । तथा च कार्यकालपक्षे संज्ञाशास्त्राणां स्वदेशत्यागो न परिभाषाशास्त्राणामित्यर्धजरतीयम् । **हेयमेवेति । काल्यत इति ।** कलविक्षेप इति चौरादिकस्येदम् । A^2
अत एव कार्यकालं संज्ञापरिभाषं भस्येत्युपस्थितमिदं भवति । यचि भमिति भाष्योक्तं सङ्गच्छते । अन्यथा यूष्ण इत्यादौ नलोपणत्वयोरापत्त्यनापत्तिभ्यां तदसङ्गतिः । तथा च कार्यकालपक्षे संज्ञाशास्त्राणां स्वदेशत्यागो न परिभाषाशास्त्राणामित्यर्धजरतीयम् । **हेयमेव । काल्यत इति ।** कलविक्षेप इति चौरादिकस्येदम् । M^1

[२] अत एवेति । काल्यतेत्यस्य स्ववृत्तिलिङ्गचिह्नितपरि..... शरणमिति तात्पर्यम् । V A^1 A^2 M^2 : तदर्थभूत इति । बोध्यबोधकयोः ऐक्याभिप्रायेणायं ग्रन्थः । M^1

यत्र कार्यमिति। संस्कार्यदृष्ट्या संस्कारकस्य दर्शनमात्रेण[१] पिशाचन्यायेन संस्कारसम्भव इत्याशयः। यत्तु पूर्वत्रासिद्धमिति (8-2-1ष०ख०प्र०आ०पृ० 76-77 प्रदी०) सूत्रे कैयटेनोक्तम्। **यद्यपीदमिति**। यथोद्देश पक्षे। **तत्विह सिद्धमिति**। कार्यकालं संज्ञापरिभाषमित्यस्मिन्दर्शने संज्ञापरिभाषाणामत्यन्तपारार्थ्यान्न स्वातन्त्र्येण कार्यावगमहेतुत्वम्। केवलमाचार्य्येण लाघवाय अनेकप्रधानाङ्ग-भावप्रतिपत्तये पृथगुपदेशः कृतः ततश्च तस्मिन्निति निर्दिष्ट...(8-2-66/40) इत्यनेन केवलेन न किञ्चित् क्रियते नापि झलो झलि (8-2-26/2281) इत्यनेन किं तर्हि संहत्य कार्यं क्रियते। ततो झल्यनन्तरे पूर्वस्य सकारस्य झलः परस्येति वाक्यार्थः। इत्येकवाक्यतायां पौर्वापर्याभावादसिद्धत्वाभावः इति तन्न। तथा सति पौर्वापर्याभावादिदं तत्र नासिद्धमिति वक्तव्ये तत्विहसिद्धमित्युक्त्यसङ्गतेः। किं च स्वस्वदेशे परिभाषाविध्योः वाक्यार्थबोधे पश्चात् परिभाषादृष्ट्या त्रिपाद्या असिद्धत्वेन एकवाक्यतैव दुर्लभा। तथा च[२]

---

[१] **अत एवेति**।.....दर्शनमात्रेण V M^2: वस्तुतस्तु कार्यस्य कालो यस्येति कार्यं कालो यस्येति वा बहुव्रीहिः । कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमिति तथैव भाष्यस्वरसात्। यथो-द्देशेऽपि परिभाषाणां स्वदेशे विधिभिराक्षेपाविशेषणोक्तार्थस्य असङ्गतत्वाच्च। तस्मात्कार्यकालमि-त्यस्य चोक्त एवार्थः। **न चेति**। यद्यपि तद्देशस्थत्वं वारयतीत्युक्त्या नैतच्छङ्कोत्थिः। तथापि सघीपं याप्यते इत्युक्त्या शिथिलीकृतस्य दृढीकरणायेयं शङ्केति न दोषः। नाद्य इत्याह। **नहीति**। **पक्षद्वयेपीति**। प्रदेशेषु विधिवाक्यविषये स्वबुद्धिजननेन एकवाक्यतया विधिवाक्यैकवाक्यतायाः पक्षद्वयेप्यविशेषात् इत्यर्थः। A^2 वस्तुतस्तु कार्यं कालो यस्येति बहुव्रीहिः । कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्रोपस्थितं द्रष्टव्यमिति भाष्यस्वरसात्।यथोद्देशे परिभाषाणां स्वदेशे विधिभिराक्षेपाविशेषणोक्तस्य असङ्गतत्वाच्च। तस्मात्कार्यकालमित्यस्य चोक्त एवार्थः। तथा च यथोद्देशे गृहीतवाक्यार्थस्य प्रदेशे स्मरणमात्रम्। कार्यकाले तु प्रदेशे वाक्यैकवाक्यतेति विशेषः। A^1 M^1*

[२] पिशाचन्यायेन..... दुर्लभा। तथा च V M^2 : om A^2 A^1* M^1*

तयोरेकवाक्यतायां पौर्वापर्याभावादसिद्धत्वाभावः। तस्मिंश्च सति तयोरेक-वाक्यता इत्यन्योन्याश्रयः। तस्माद्यथोक्तमेव साधु।

[३]

न चेति। यद्यपि तत्तद्देशस्थत्वं[१] वारयतीत्युक्त्या नैतच्छङ्कोत्थितिः। तथाप्य-धिकं वक्तुमियं शङ्केति न दोषः[२]। विधिवाक्येनैकवाक्यत्त्वाद्वा[३] स्वदेशं विहाय पक्षिवद्देशान्तरगमनाद्वा प्रदेशे[४]ऽस्मादादिबुद्धिजननाद्वा स्वदेशत्यागः। नाद्यः इत्याह। **नहीति**। प्रदेशेषु विधिवाक्यविषये। स्वबुद्धिजननेन[५]। एकवाक्यतया स्वार्थबोधेन। अविशेषात्। विधिवाक्यैकवाक्यतायाः पक्षद्वयेऽप्यविशेषात् इति फलितोर्थः। न द्वितीय इत्याह। **नहीति**। न तृतीय इत्याह। **नापीति**। अस्मदादिबुद्धिजननेन[६] प्रदेशे एव वाक्यैकवाक्य[७]तयेत्यर्थः। तद्देशे एव वाक्यार्थबोधः[८] स्वदेशत्यागे हेतुः। न तु तद्देश एवैकवाक्यता। अप्रयोज-कत्वादिति भावः। **अत एवेति**। प्रदेशे एकवाक्यतायाः स्वदेशत्यागे प्रयोजक[९]-त्वादित्यर्थः।

---

[१] तत्तद्देशस्थत्वं V A^2 M^2 : देशस्थत्वं A^1 M^1*

[२] तथाप्यधिकं वक्तुमियं शङ्केति न दोषः V A^2 M^2 : तथापि स्वसमीपं प्राप्यत इत्युक्त्या शिथिलीकृतस्य तस्य तस्य दृढीकरणायेयं A^1 M^1*

[३] विधिवाक्येनैकवाक्यत्त्वाद्वा V A^2 : विधिना वाक्यैकवाक्यतया A^1 विधिवाक्येन एकवाक्ये नैकवाक्यत्वाद्वा M^2 M^1*

[४] प्रदेशे V A^2 M^2 : देशे A^1 M^1*

[५] स्वबुद्धिजननेन V A^2 M^2 : स्वस्य स्वबुद्धिजननेन A^1 M^1*

[६] अस्मदादिबुद्धिजननेन V A^1 M^2 : om A^2 M^1*

[७] वाक्यैकवाक्य० V A^1 M^2 : वाक्यतेत० A^2 M^1*

[८] वाक्यार्थबोधः V A^1 M^2 : वाक्यार्थाबोधः A^2 M^1*

[९] प्रयोजक० V A^1 M^2 : अप्रयोजक० A^2 M^1*

[४]

अन्यथेति। तत्र स्वबुद्धिजननमात्रेण तद्देशस्थत्वे[१] इत्यर्थः। वस्तुतस्तु उक्त-रीत्या संज्ञापरिभाषयोः कार्यकालपक्षे प्रदेशस्थत्वमपि। तयोस्तत्पक्षे केवलं कार्यपारतन्त्र्यात्। एकदेशस्थस्य[२] सर्वशास्त्राभिज्वालकत्वं तु यथोद्देशपक्षा-भिप्रायेण। पाणिनिपाठाभिप्रायेण वा। यथोद्देशे च तयोः स्वदेशे कार्यैकवा-क्यत्वेऽपि प्रधानानुगुण्येनैव[३] गुणानां तद्देशस्थत्व[४] कल्पना न गुणानुरोधेन प्रधानशास्त्रस्य तद्देशस्थत्वकल्पना। किञ्च गुणेन न प्रधानाकर्षणमित्युक्तम्। तथा च तेषां परत्वं व्याहन्येतेत्याद्युक्तम्। कार्यकालशब्दोऽप्यत्रैव स्वारसिकः इति दिक्[५]। ॥ ३ ॥

[१]

अनेकान्ताः अनुबन्धाः ॥ ४ ॥

अनुबन्धाः[६] **विधेयानवयवाः**। विधेये कदाप्यनुपलम्भात्। इत्यनुमाने[७] व्यतिरेकव्याप्तिमाह **यो हीति**। यथा वृक्षावयवशाखाया अवच्छेदनात्पूर्वं

---

[१] तद्देशस्थत्वे V A^1 M^2: तद्देशेस्थत्वे A^2 M^1*

[२] एकदेशस्थस्य V A^1 M^2: एकदेशस्य A^2 M^1*

[३] प्रधानानुगुण्येनैव A^2 : प्रधानानुगुण्येनैन V A^1 M^2 M^1*

[४] गुणानां तद्देशस्थत्वकल्प० V A^1 M^2 : गुणदेशकल्प० M^1*

[५] तद्देशस्थत्वकल्पना.....दिक्। VA^1 M^2 : तद्देश एत्वकत्यनाकायकालपक्षाप्यत्रैव स्वारसिक इत्येषा दिक् ॥ **प्रदेशेष्विति** ॥ विधिवाक्यविषय इत्यर्थः। यथोद्देशेऽपि विधिवाक्यैकवाक्यतयाङ्गीकारादिति भावः A^2 M^1*

[६] **अनुबन्धाः** V A^1 M^2 : om A^2 M^1*

[७] इत्यनुमाने V A^1 M^2 : इत्यनुमानेन A^2 M^1*

तत्रोपलब्धिः। **विधेये इति**[१]। अनुबन्धविनिर्मुक्तपदार्थोपस्थितेरिति भावः। यद्वा बोधकानवयवत्वमेव साध्यम्। न च हेत्वसङ्गतिः। बोधकानवयवत्वे[२] बोध्यत्व[३]विधेयत्वयोरपि सानुबन्धके स्वं रूपम् (1-1-68/25) इति शास्त्रेण प्राप्तिः[४]।

केचित्तु उक्तानुमानेन बोधकान[५]वयवत्त्वमेव साध्यम्। बोध्यबोधकयोरभेदाभिप्रायेण च अयं हेतुरिति वदन्ति।

[२]

अवयवत्त्वारोपेणेति[६]। सामीप्ये[७] बहुव्रीह्यनभिधानादिति भावः। शिदादिपदम् इत्संज्ञकः शकारादिः यस्य समीपे तद्बोध्य[८]परम्। **व्याख्यानत इति**। दध्नचश्चकारेण अन्त्यत्वप्रयुक्तेत्संज्ञाभाजां पूर्वोपकारकत्वम्[९] आदित्वप्रयुक्तेत्संज्ञाभाजां[१०] परोपकारकत्वमिति व्यवस्था। अत्र च[११] इत्संज्ञांऽत्यत्वप्रयुक्ता[१२]

---

[१] यथा .....तत्रोपलब्धिः। **विधेये इति** V M^2 : विधेय इति A^1 om A^2 M^1*

[२] बोधकानवयवत्वे V A^1 M^2 : बोधकावयवत्वे A^2 M^1*

[३] बोध्यत्ववि० V A^2 M^2 : बोध्यवि० A^1 M^1*

[४] शास्त्रेण प्राप्तिः V M^2 : शास्त्रेण चायं हेतुरिति वदन्ति A^1 शास्त्रेण प्राप्तेः A^2 M^1*

[५] बोधकानव० V A^1 M^2 : बोधकानबोधकानव० A^2 M^1*

[६] अवयत्वारोपेणेति। V A^2 M^2 : अवयवारोपेणेति। A^1 M^1*

[७] सामीप्ये V A^1 M^2 : न सामीप्ये A^2 M^1*

[८] तद्बोध्य प० V A^1 M^2 : तध्य प० A^2 M^1*

[९] अन्यत्वप्रयुक्तेत्संज्ञाभाजां पूर्वोपकारकत्वम् V A^2 M^2 : अन्यत्वप्रयुक्तेत्संज्ञकाभाजां प्रवेशाय कारकत्वम् A^1 M^1*

[१०] भाजां V A^2 M^2 : भाजां च A^1 M^1*

[११] अत्र च V A^2 M^2 : अत्र A^1 M^1*

[१२] ०ज्ञांऽत्यत्वप्रयुक्ता V A^2 : इत्संज्ञार्थम् अन्त्यत्वप्रयुक्ता A^1 ०ज्ञांऽन्त्यप्रयुक्ता M^2 M^1*

तत्र चा[१]दित्वप्रयुक्तेति तु व्याख्यानतो निर्णेयम्। एकान्तत्वेऽपि पूर्वस्य परस्य वाऽवयत्वमित्यत्र तवापि व्याख्यानमेव शरणमिति तात्पर्यम्। परसमीपेति कर्मधारयः[२] ॥ ४ ॥

[१]

एकान्ताः ॥ ५ ॥

एकान्ता इति। बोधकस्येति शेषः। तथा च अनुबन्धा बोधकावयवाः। बोधके येन सम्बन्धेनोपलभ्यन्ते तेन सम्बन्धेनान्यत्रानुपलभ्यमानत्वात्। णितीत्यादीनां तद्बोध्य इत्यर्थः। उक्तानुमानेन विधेयानवयवत्वसाधनं सिद्धसाधनम्। कल्पान्तरे तु इत्संज्ञालोपाभ्यामपहारेणसानुबन्धकस्याविधेयत्वोपपत्तेः अप्रयोजको हेतुः। अत्र तु अन्त्यशब्दादौ लक्षणानाश्रयणमेव लाघवमनुकूलतर्कः। तदिदमुक्तम् **एवं हि[३] इत्यादिना**। बोध्यबोधकयोरभेदाभिप्रायेणोक्तो हेतुरिति मते तु विधेयतादशायां तत्रानुपलम्भेऽपि[४] उच्चारणदशायां तत्रोपलम्भादवयवत्वोपपत्तेरुक्तहेतुरप्रयोजकः। एतेन सत्प्रतिपक्षे कस्याप्यसिद्धेरित्येव न्याय्यमित्यसङ्गतमित्यपास्तम्[५]। **कादेरिति**। ददाति...(3-1-139/2901) इति सूत्रे विभाषाग्रहणेन णशयोः इत्संज्ञाज्ञापनेन तयोस्त्याग[६] इति केचित्।

---

[१] तत्र चा० V M^2 : अत्र चा० A^1 A^2 M^1*

[२] कर्मधारयः V A^1 A^2 M^2 : कर्मधारयः शास्त्र इति। बोध्यबोधकयोः भेदमाश्रित्येदम्। एकजातीयसम्बन्धेन संयोगेन M^1

[३] एवं हि A^1 : एवं तर्हि V A^2 M^2 M^{1*}

[४] तत्रानुपलम्भेऽपि V A^2 M^2 : तत्रोपलम्भेऽपि A^1 M^{1*}

[५] एकान्ता इति।.....०पास्तम् V A^1 A^2 M^2 : om M^1

[६] तयोस्त्यागः V A^2 M^1 M^2 : तयोस्त्यागादिति A^1

इदं चिन्त्यम्[१]। अन्त्यशब्दवदादिशब्देऽपि[२] लक्षणयैवोपपत्तेः। किञ्च हलन्त्यम् (1-3-3/1) इत्येतत्सूत्राविषये[३] अनुबन्धविनिर्मुक्तोपस्थितेर-प्रमाणिकत्वेन विधेये कदाप्यदर्शनात्[४] इत्यनेकान्तत्वसाधकहेतोः तत्राभावेन णादेरेकान्तत्वमेव। केचित्तु नानुबन्धकृतमित्यादिपरिभाषात्रयाकरणप्रयुक्त-लाघवानुरोधेनानेकान्त[५] इत्येवमुक्तमिति वदन्ति[६] ॥ ५॥

[१]

नानुबन्धकृतमनेकाल्त्वम् ॥ ६ ॥

एकान्तत्व इति। विधौ निर्दिष्टो योऽनेकाल् स सर्वस्य इति सूत्रार्थः। तेनानुबन्धविनिर्मुक्तपदार्थोपस्थितावपि न दोषः। । **लोपो**[७]**पीति**। प्रकृते पुनर्लोपग्रहणसामर्थ्यात् घ्वसोरे...(6-4-119/2471) इति लोपस्य सर्वादेशत्व-सिद्धेः न तदर्थमपि शिद्ग्रहणम्। असञ्जातविरोधन्यायेन उत्तरत्रैवालः अन्त्यपरिभाषाबाधसम्भवात्। वस्तुतस्तु विधीयमानो योऽनेकाल् इत्यर्थेऽपि अनुबन्धानामनेकान्तत्वेऽपि[८] च शिद्ग्रहणं व्यर्थमेवेति शङ्का युक्तैव[९] । शकारोच्चारणसामर्थ्यात् आद्ये भूतपूर्वानेकाल्त्वमादायान्त्ये अनेकाल् पदे

---

[१] इति केचित्। इदं चिन्त्यम्।.....एषाव्यर्थेति तत्त्वम्। V A^1 A^2 M^2 : om M^1

[२] शब्देऽपि V A^2 M^2 : शब्दोऽपि A^1 M^{1*}

[३] ०तत्सूत्राविः० V A^2 M^2 : ०तच्छास्त्रविः० A^1 M^{1*}

[४] कदाप्यदर्शनात् V A^2 M^2 : कदाप्यदर्शनिन A^1 M^{1*}

[५] ०नानेकान्त V A^2 M^2 : ०नानेकान्ता A^1 M^{1*}

[६] इत्येवमुक्तमिति वदन्ति V A^2 M^2 : इत्येव वदन्ति। A^1 M^{1*}

[७] लोपोपीति। V A^2 M^2 : लोपो यीति । A^1 M^{1*}

[८] मनेकान्तत्वेऽपि V A^2 M^2 : मनेकाल्त्वेऽपि। A^1 M^{1*}

[९] व्यर्थमेवेति शङ्का युक्तैव V A^2 M^2 : व्यर्थमेव A^1 M^{1*}

गौणमुख्यसाधारणावयवत्ववतोऽन्यपदार्थत्वमाश्रित्य[१] सर्वादेशत्वसिद्धेः। **ज्ञापक-मिति**। ननु ज्ञापितेऽपि पुनः व्यर्थम्। शकारोच्चारणसामर्थ्यादेवानुबन्धकृत-मप्यनेकाल्त्वमादाय सर्वादेशत्वसिद्धेः। न च[२] उच्चारणसामर्थ्यादित्संज्ञालोपावपि बाध्येयातामिति वाच्यम्[३]। ज्ञापनात् पूर्वमपि तयोरबाधाय शिद्ग्रहणं स्यादिति तस्य न[४] वैय्यर्थ्यं यदि भूतपूर्वानेकाल्त्वमादाय सर्वादेशत्वसम्पादनेन कृतार्थतस्य शकारस्य नेत्संज्ञालोपबाधकत्वं तर्हि ज्ञापितेऽपि तथेत्यवेहि। पुरावादौ तु विजातीयानेकवर्णोच्चारणसामर्थ्यान्नेत्वम्। नाप्यस्याः प्रयोजनम्। अर्वणस्त्रसा...(6-4-127/364) इत्यादौ ऋकारस्य नुमर्थत्वेन भूतपूर्वानेकाल्त्वमादाय सर्वादेशाप्रवृत्तेः। विधौ योऽनेकालित्यर्थे तु न मानमिति चेन्न। उच्चारणसामर्थ्येन भूतपूर्वानुबन्ध[५]कृतानेकाल्त्वमादायापि न सर्वादेशत्वमि-त्यर्थस्य शिद्ग्रहणेन ज्ञापनात्। तेन दिव औत् (7-1-84/336) इत्यादीनां[६] तकारोच्चारणसामर्थ्येन भूतपूर्वगत्यानेकाल्त्वमादाय न सर्वादेशत्वम्। तत्रापि तपराकरणे तु एषा व्यर्थेति तत्त्वम्। **डादिविषयेत्विति**। केचित्तु अत्रानुबन्धपदं तद्योग्यपरम्। अत एव काणोर्विषयेनानुबन्धकृतमसारूप्यमिति विकल्पाभावः। अनेकाल्...(1-1-55/45) सूत्रे शित्पदं तद्योग्यपरम्।[७] अत एव डा आ इति

---

[१] ०रणावयवत्ववतोऽन्यपदार्थत्वमाश्रित्य V A^2 M^2: ०रण्यादेवानुबन्धकृतमप्यनेकाल्त्वमादाय A^1 M^{1*}

[२] न च V A^2 M^2 : ननु च A^1 M^{1*}

[३] वाच्यम् V A^2 M^2 : शिद्ग्रहमिति ज्ञापनेन वैयर्थ्यमिति वाच्यम् A^1 M^{1*}

[४] तस्य न V A^2 M^2 : न तस्य A^1 M^{1*}

[५] ०नुबन्ध० V A^2 M^2 : ०नुबन्धत्व० A^1 M^{1*}

[६] इत्यादीनां V A^2 M^2 : इत्यादौ A^1 M^{1*}

[७] अत एव काणोर्विषयेनानुब० .....०त्पदं तद्योग्यपरम् V A^2 M^1 M^2 : jmp A^1

प्रश्लेषेण[१] सर्वादेशत्वमुक्तमाकारे इति[२] वदन्ति[३] ॥ ६ ॥

नानुबन्धकृतमनेजन्तत्वम् ॥ ७ ॥

[१]

अनेजन्तत्वादिति। ननु आदेच...(6-1-45/2370) इति सूत्रे धातोः (3-1-91/2829) इत्यस्य निवृत्त्यायां तस्या[४] अनेजन्तत्वेऽपि ततः पूर्वमेजन्तत्वम् आदाय[५] आत्वं सुलभम्। न च एधादावात्ववारणाय शित्परत्वयोग्यस्यैव[६] एजन्तस्यात्वमिति पकारसत्तायां[७] नात्वम् अनेजन्तत्वादित्यस्य शित्परत्वयोग्यैज[८]न्तत्वाभावादित्यर्थ इति वाच्यम्। यलोपोत्तरं[९] तत्सम्भवात्। कथं वात्र[१०] तदन्तविधिः। विशेष्याभावात्। न च उपदेश इत्यस्य विभक्तिविपरिणामेन विशेष्यतया तदन्तविधौ समुदायोपदेशः। एवम्[११] ऋषीणां तात्पर्येण पकारसत्वे[१२] उपदिश्यमानैजन्तत्वं नेत्यात्वं नेति वाच्यम्। तथा सति यलोपोत्तर -

---

[१] प्रश्लेषेण V A^2 M^1 M^2 : प्रश्लेषे A^1

[२] ०त्वमुक्तमाकर इति A^1: ०त्वमुक्तम् अकारे इति V A^2 M^1 M^2

[३] केचित्तु .....इति वदन्ति V A^1 A^2 M^2 : अयं ग्रन्थः प्राचां रीत्या M^1

[४] निवृत्त्यायां तस्या० V A^1 A^2 M^2 : निवृत्त्या पान्तस्या० M^1

[५] ०जन्तत्वमादाय M^1 : ०जन्तमादाय V A^1 A^2 M^2

[६] शित्परत्वयोग्यस्यैव V A^1 A^2 M^2 : अशित्परयोग्यस्यैव M^1

[७] पकारसत्तायां V A^1 A^2 M^2 : पकारसत्त्वदशायां M^1

[८] शित्परत्वयोग्यैज० V A^1 A^2 M^2 : शित्परयोग्यैज० M^1

[९] यलोपोत्तरं V A^1 A^2 M^2 : पलोपोत्तरं M^1

[१०] कथं वात्र० V A^1 M^2 : कथञ्चात्र० A^2 M^1

[११] ०पदेशः। एवम् ऋ० V M^2 : ०पदेश एव ऋ० A^1 A^2 ०पदेशे एव ऋ० M^1

[१२] सत्वे V M^2 : सत्त्वेन A^1 A^2 M^1

मिति पूर्वोत्तरग्रन्थासङ्गतिरिति[१] चेन्न। यलोपोत्तरं[२] तदेवेदमिति[३] प्रत्यभिज्ञया[४] एकाच...(7-2-10/2246) इत्यादाविव उपदिश्यमानस्य[५] एजन्तत्वस्य च सत्वेनादोष इत्याशयात्।

[२]

ज्ञापक इति[६]। माङो व्यतीहारेऽनभिधानम् । एतद्भाष्यप्रामाण्या[७]दिति भावः। **विस्तर इति**। यद्यपि उञि च पदे (8-3-21/170) इत्यत्र पदग्रहणात्। घि (1-4-7/243) संज्ञा[८] सूत्रे नदीतरे ह्रस्वापादनपरभाष्यत्[९] स्थानिवत्..... (1-1-56 भा०प्र०ख०अ०आ०पृ०457) सूत्रे अतिखट्वायेत्यत्र दीर्घे कृतेऽपि अप्राप्तौ[१०] भूतपूर्वगत्या इति[११] भाष्यात् च अनुबन्धसहितशब्दोपादाने[१२] इत्संज्ञकतदवयव-स्येत्यर्थः[१३]। स्त्रीलिङ्गप्रकरणेऽप्येवं शब्दरत्ने[१४]। क्यस्य इत्यत्र च इत्संज्ञक-

---

[१] यलोपोत्तरमिति पूर्वोत्तरग्रन्थासङ्गतिरिति V M^2 : पलोपोत्तरमिति पूर्वोत्तर० A^1 पलोपोत्तरग्रन्थासङ्गतेरिति A^2 पलोपापत्तिरिति पूर्वोत्तरग्रन्थासङ्गतेरिति ०M^1

[२] यलोपोत्तरं V A^1 M^2 : पलोपोत्तरं A^2 फलोपोत्तरं M^1

[३] तदेवेदमिति V A^1 A^2 M^2 : तदेवेवमिति M^1

[४] प्रत्यभिज्ञया V A^2 M^1 M^2 : प्रत्यभिज्ञयाम् A^1

[५] उपदिश्यमानस्य V A^1 M^2 : उपदिश्यमानत्वस्य A^2 M^1

[६] ज्ञापक इति A^2 M^1: ज्ञापकमिति V A^1 M^2

[७] एतद्भाष्यप्रामाण्या० A^1 A^2 M^1 : एतद्भाष्याप्रामाण्या०V M^2

[८] घि संज्ञा V M^2 : घु संज्ञा० A^1 घ संज्ञा० A^2 घु नदीसंज्ञा० M^1

[९] ह्रस्वापादानपरभाष्यात् V A^2 M^1 M^2 : ह्रस्वापादनपरभाष्याप्रामाण्यात् A^1

[१०] कृतेऽपि अप्राप्तौ V A^1 M^2 : कृतेऽपि चासौ A^2 कृतेऽप्याचासौ M^1

[११] भूतपूर्वगत्या इति M^1 : भूतपूर्व इति V A^1 A^2 M^2

[१२] अनुबन्धसहितशब्दोपादाने V $A^1$$A^2$ M^2 : अनुबन्धोपादाने M^1

[१३] ०तदवयवस्येत्यर्थः V A^1 M^2 : ०तदनवयकेत्येवार्थः A^2 ०तदनवयवकेत्येवार्थः M^1

[१४] ०णेऽप्येवं शब्दरत्ने V A^1 M^2 : ०णे शब्दरत्नेऽप्येवं A^2 M^1

काद्यवयवकस्येत्यर्थ[१] इति न यकि दोषः। तथापि तदनाश्रित्येदम् इत्यदोषः ॥ ७ ॥

नानुबन्धकृतमसारूप्यम् ॥ ८ ॥

[१]

उभयगतिरिह भवति ॥ ९ ॥

अभिधानियामकत्वेति[२]। तत्त्वं च शक्तिसङ्कोचकत्वम्। तत्त्वं च[३] तात्पर्यज्ञानस्य शाब्दबोधकरणत्वे[४] तद्ग्राहकत्वं तदभावे प्रकरण सह कृतात्पदज्ञानादर्थविशेषस्यैव उपस्थितत्वादर्थविशेषे[५] शाब्दबोधप्रयोजकपदजन्योपस्थितिविषयतानियामकत्वं बोध्यम्। **त्यन्तेति**। अर्थवन्त्यन्तेत्यर्थः[६]। तेन कति इत्यस्य सत्वेऽपि न दोषः।

[२]

अकृत्रिमस्यैवेति[७]। सूत्रभेदेन कृत्रिमस्येवाकृत्रिमस्यैव[८] इत्याश्रयणेऽपि उभयगतिरागतैवेति[९] भावः। शब्दार्थे इति[१०] द्वन्द्वः। **न बोधोपयोगीति**। यद्यपि

---

[१] इत्संज्ञककाद्य० V A^2 M^2 : इत्संज्ञकाद्य० A^1 M^1

[२] अभिधानियामकत्वेति A^2 M^1 : अभिधानियामकेति। V A^1 M^2

[३] तत्त्वं च V A^1 A^2 M^2 : om M^1

[४] ०धकरणत्वे० V A^2 M^2 : ०धकारणत्वे० A^1 M^1

[५] ०दर्थविशेषस्यैव उपस्थितत्वादर्थविशेषे V A^1 M^2 : ०दर्थस्यैवोपस्थित्यार्थविशेषे A^2 M^1

[६] अर्थवन्त्यन्तेत्यर्थः V A^2 M^1 M^2 : अर्थवत्त्यन्तेत्यर्थः A^1

[७] अकृत्रिमस्यैवेति V A^2 M^1 M^2 : अकृत्रिमस्येति। A^1

[८] ०मस्येवाकृत्रिमस्यैव V A^1 M^2 : ०मस्यैवाकृत्रिमस्येव A^2 M^1

[९] ०यगतिरागतैवेति V A^2 M^1 M^2 : ०यगतिरागतेति A^1

[१०] शब्दार्थे इति M^1 : शब्दार्थेति V A^1 A^2 M^2

सकलादिशब्दानां सामान्यरूपेण शक्तिग्रहादेव शाब्दबोधः[१]। विशिष्य सकलज्ञानस्य असम्भवात्। तथापि हर्यादिपदानामिव[२] विशेषरूपेणाने-कार्थबोधकस्य वृद्ध्यादिशब्दस्य विशेषरूपेणानेकेषु[३] शक्तिग्रहः[४] एव तेषां तथा शाब्दबोधोपयोगी। शक्तिग्रहशाब्दबोधयोः समान प्रकारकत्वेनैव कार्यकारण-भा[५]वाङ्गीकारादिति न कश्चिद्दोषः।

कार्यमनुभवन्हि कार्यी निमित्ततया नाश्रीयते ॥ १० ॥

[१]

शयितेति। तृजन्तः पाठः। क्तान्ते तु निष्ठाशीङ् इति निषेधादेव[६] गुणसिद्धेः[७]। कार्यमनुभवन्[८] यत्कार्यं प्रति यः कार्यी स तत्प्रति निमित्तं न इत्यर्थो बोध्यः। यद्यपि शयिता अरिरिषति इत्यादौ कार्य्यानुभवितृत्वम् इकारादेः[९] निमित्तत्वं तु[१०] समुदायस्य तथापि घटकतयापि[११] निमित्तत्वस्य[१२] निषेधान्नदोषः।

---

[१] शाब्दबोधः V A^1 A^2 M^2 : बोधः M^1

[२] हर्यादिपदानामिव विशे० V M^2 : हर्षादिपदवद् विशे० A^1 A^2 M^1

[३] विशेषरूपेणानेकेषु V A^2 M^1 M^2 : विशेषणरूपेणानेकेषु A^1

[४] शक्तिरत एव M^1 : शक्तिग्रह एव V A^1 A^2 M^2

[५] कार्यकारणभा० V A^1 M^1 A^2 : कार्यकारणं भा० M^2

[६] क्तान्ते तु निष्ठाशीङ् इति निषेधादेव V $A^1$$A^2$ M^2 : om M^1

[७] गुणसिद्धेः V A^2 M^2 : गुणत्वसिद्धेः A^1 om M^1

[८] कार्यमनुभवन् यत्का०V M^2 : अत्र यत्का० A^1 A^2 M^1

[९] इकारादेः V A^1 M^2 : ईकारादेः A^2 M^1

[१०] निमित्तत्वं तु A^1 A^2 M^1: निमित्तत्वं च V M^2

[११] घटकतयापि V A^1 A^2 M^2 : घटकतया M^1

[१२] निमित्तत्वस्य निषे० V M^1 M^2 : निमित्तत्वस्यापि निषे० A^1 निमित्तत्वनिषे० A^2

[२]

समवायीति। तत्त्वं च अत्र कल्पितं बोध्यम्। इदं चिन्त्यम्। कालसंयोगं प्रति कालस्य अद्वैतवादिनये[१] जगत्प्रति ब्रह्मणः तदुभयपदर्शनात्।[२] केचित्तु[३] अद्विष्टकार्यस्थले[४] समवायिकारणस्य निमित्तकारणत्त्वं न। तेन[५] श्रायसावित्यादौ[६] एकादेशस्य अचः परस्मिन् ...(1-1-57/50) इति स्थानिवत्वमित्याहुः[७]। **ध्वनितेति**। अचीत्यस्य जेघ्नीयते देघ्नीयते[८] इति च प्रत्युदाहरणम्[९] अस्यां प्रतिकूलमिति नात्रैषा ध्वनिता ॥ १० ॥

यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते ॥ ११ ॥

[१]

दापेरिति। परिभाषासिद्धेः पूर्वमपि[१०] दारूपस्य निरर्थकत्वमित्याशयात्[११] ।

बोध्यत इति। घटकतयेति शेषः।

---

[१] अद्वैतवादिनये A^2 M^1: अद्वैतनये V A^1 M^2

[२] ०भयपदर्शनात् V A^1 M^2 : ०भयदर्शनात् M^1 ०भयदर्शनात्। घुद्युलोष्ठित्वमत्रज्ञापकम् A^2

[३] केचित्तु .....ध्वनिता V A^1 A^2 M^2 : om M^1

[४] अद्विष्टकार्यस्थले V A^2 M^2 : अदिष्टकार्यस्थले A^1 M^{1*}

[५] न तेन V A^1 M^2 : तेन A^2 M^{1*}

[६] श्रायसावित्यादौ V A^2 M^2 : श्रयसावित्यादौ A^1 M^{1*}

[७] स्थानिवत्वमित्याहुः V A^1 M^2 : स्थाद्वा शेरते एधिपीनिक्त्वमित्याहुः A^2 M^{1*}

[८] जेघ्नीयते देघ्नीयते V A^2 : जेघ्नीयते A^1 जेघ्नीयते देध्मीयते M^2 M^{1*}

[९] इति च प्रत्युदाहरणम् V M^2 : प्रत्युदाहरणम् A^1 M^{1*}

[१०] परिभाषासिद्धेः पूर्वमपि V A^1 M^1 M^2 : om A^2

[११] निरर्थकत्वादित्याशयात् M^1 : निरर्थकत्वमित्याशयः। V A^1 A^2 M^2

[२]

न दारिति। अवयवावयव इति न्यायस्तु समुदायावयवत्वेन गृहीत-स्यावयवविषयकः। प्रकृते तु रेफस्याकारावयवत्व[१]प्रतिपत्तिकालेनाकारस्य दृशब्दावयवत्त्वप्रतिपत्तिरिति[२] भावः। ट्युट्युलोष्टित्वमत्र ज्ञापकम्। यद्वा शेरते एधिषीष्ठेत्यादौ रुट् - सुट् विधौ उद्देश्यतया परम्परया वा आत्मनेपदलिङोः आश्रयणम्। दारयतीत्यादौ तु नैवम्।[३] **तद्वैय्यर्थ्यमिति।** ननु सानुनासिकौका-रार्थं तत्[४]। किन्तु आम् शब्दस्य[५] कण्ठोष्ठ्यतया सावर्ण्याभावः। किञ्च निर्दि-श्यमान...(परि०12) परिभाषया नात्रदीर्घसम्भवः इति चेन्न। आनस्य ऊँ (1-1-18/107) इत्यनुनासिकादेशं विधाय दीर्घविधौ[६] अक इत्यस्य पञ्चम्यन्ततां च आश्रित्य यदागम...(परि०11) न्यायेनैव सावर्ण्यमुपपाद्य वैयर्थ्योद्भावनस्य प्रसङ्गात्[७]। वस्तुतः मुकि कदाचिदौकारस्याचि दीर्घस्य आवृत्त्या ऊ इति न्यासेन तदसिद्ध्या नैतत् ज्ञापकं किन्तु स्यसिच् (6-4-62/2757) सूत्रस्थोपदेशग्रहण-मेवात्र ज्ञापकम्। **वुग्युटाविति**सिद्धवचन सामर्थ्यादेव यण् न इत्यरुचेराह[८]

---

[१] ०स्याकारावयवत्व० V A^2 M^1 : ०स्याकारावयवं० A^1 ०कारावयव० M^2

[२] दृशब्दा० V A^1 M^1 M^2 : दाशब्दा०A^2

[३] ट्युट्युलोष्टित्वमत्र ज्ञापकम्..... नैवम् V A^1 M^2 : एधिषीष्ठेत्यादौ..... नैवम् A^2 ट्युट्युलोष्टित्व मत्र ज्ञापकम्..... नैवम् om M^1

[४] ननु .....तत् V M^2 : ननु सानुनासिकात्तरार्थं तत् A^1 ननु सानुनासिकोकारार्थं तत् A^2 ननु सानुनासिकारार्थं तत् M^1

[५] किन्तु आम् श० V M^1 M^2 : किञ्चाम् श० A^1 A^2

[६] ऊँ इत्यनुनासिकादेशं विधाय दीर्घविधौ V M^2 : उ इत्येव विधेयदीर्घविधौ A^1 ऊँ आदेशं विधाय दीर्घविधौ A^2 M^1

[७] वैयर्थ्योद्भावनस्य प्रसङ्गात्।M^1 : वैयर्थ्योद्भावनसम्भवात्। V A^1 A^2 M^2

[८] वस्तुतः.....इत्यरुचेराह V M^2 : om A^1 A^2 M^1

जहारेति।[१] यत्तु भैरवेणोक्तं तक्रकौण्डिन्य ...(6-4-163भा०प०ख०च०आ०पृ 367) न्यायेन युटा बाधितस्य यण् नेति (भैरवी व्या०पृ०32)। तदसङ्गतम्। विषयभेदे तक्रकौण्डिन्यन्यायाप्रवृत्तेः वक्ष्यमाणत्त्वात्। असिद्धविषयेप्युक्तन्यायाप्रवृत्तेः वक्ष्यमाणत्त्वाच्च[२]। यदागमन्यायेन लब्धस्य तपरत्वेन न व्यावृत्तिरिति कृदन्त-शेखरे[३]। **असङ्गत्येति**। ननु वक्ष्यमाणो[४] भविष्यामि इत्याद्यर्थमकारान्तोपदि-श्यमान इत्यर्थ[५] आवश्यकः। किञ्च हत इत्याद्यर्थं तदन्तविधिरावश्यकः। अन्यथा अदुपदेशात्परत्वेनानुदात्तत्वापत्तेः। तथा च नात्र वर्णग्रहणम्। तास्यनुदात्त... (6-1-186/3730) इति सूत्रे शेखरेऽप्येवमेवोक्तम्। एरनेकाच् ...(6-4-82/272) इत्यत्र प्रत्ययावयवेऽचीत्यर्थः। यद्वा यस्योपदेशेऽदन्तत्वमेव यदागमन्याय-लभ्यमिति[६] एरनेकाच इत्यतोऽस्य वैषम्यं[७] दीङो युडचीत्यस्य तु क्ङिति योऽच् तस्मिन्नित्यर्थः। न च[८] जहि शत्रुमित्याद्यर्थं प्रत्ययाप्रत्यययोर्मध्ये प्रत्ययस्यैव ग्रहणमिति[९] परिभाषाऽनुसर्तव्या। तथा च तत एव हत इत्यादौ[१०] न दोषः। भविष्यामि इत्यादौ तु समुदायोपदेशेऽवयवस्याप्युपदेशान्न दोष इति वाच्यम्।

---

[१] जहारेति ।V A^1 A^2 M^2 : om M^1

[२] यत्तु .....वक्ष्यमाणत्त्वाच्च । V M^2 : om A^1 A^2 M^1

[३] यदाग०.....कृदन्तशेखरे । V M^2 : यदा०.....कृदन्तप्रकरणे शेखरे A^1 A^2 om M^1

[४] वक्ष्यमाणो V A^1A^2 M^2 : यक्ष्यमाणो M^1

[५] ०श्यमान इत्यर्थः V A^1 M^2 : ०श्यमानात् इत्यर्थः A^2 M^1

[६] यदागमन्यायलभ्यमिति V M^1 M^2 : यदागमन्यायमिति A^1 यदागमन्यायसंपाद्यमिति A^2

[७] एरनेकाच् इत्यत्र प्रत्य०.....वैषम्यम् V M^2 : एरनेकाच् इत्यस्य प्रत्य०.....वैयर्थ्यम् A^1 A^2 om M^1

[८] दीङो युडचीत्यस्य तु क्ङिति योऽच् तस्मिन्नित्यर्थः। न च A^2 M^1 : न च V A^1 M^2

[९] प्रत्ययाप्रत्यययोर्मध्ये प्रत्ययस्यैव ग्रहणमिति परि० V A^1 M^2 : प्रत्ययाप्रत्ययोरिति परि० A^2 om M^1

[१०] तत एव हत इत्यादौ V A^2 M^1 M^2 : तत ए इत्यादौ A^1

तदन्तविध्यभावे उक्तपरिभाषया प्रत्ययस्यैवकारस्य[१] ग्रहणापत्या वक्ष्यमाण[२] इत्यादौ दोषः।

[३]

तदवस्थ एव[३] इत्यरुचेराह **किञ्चेति। बोध्यत इति।** यद्यपि इदं परिभाषान्तरं तथापि इदमपि तद् ग्रहणेन गृह्यते इति अत्र घटकतयेति अस्यानध्याहारेणैव[४] तन्मूलकमेवेति भावः।[५]

यद्वा मुग्विधानेन पूर्वस्या इव अस्यापि वर्णग्रहणे अप्रवृत्तिरेव ज्ञाप्यते[६]। वर्णग्रहणे पूर्वाप्रवृत्तिकल्पनामात्रेण मुग्वैय्यर्थ्यापरिहारात्।[७] **इदं चिन्त्यम्।** आगमानामागमिधर्मवैशिष्ट्ये मानाभावात् फलाभावाच्च। प्रत्युत मिदचोन्त्यात् ...(1-1-47भा०प्र०ख०स०आ०पृ०403) इति सूत्रे भाष्ये परादित्वे द्विषन्तपः इत्यत्र मोऽनुस्वारः (8-3-23/122) इत्यस्याप्राप्त्यापादनं विरुध्यते।[८] रामाणाम् इत्यादौ पदान्तस्य (8-4-37/198) इति णत्वनिषेधापत्या[९] तदनित्यत्वाश्रयणे महाक्लेशः। पदान्तभक्तः पदान्तग्रहणेन ग्राहिष्यते इति ङमुट् (8-3-32 भा० ष०ख०प्र०आ०पृ०167) सूत्रस्थभाष्यस्यायमर्थः। यदागमा...(परि०11) इति न्यायेन

---

[१] प्रत्ययस्यैवकारस्य V M^2 : प्रत्ययस्यैवकरणस्य A^1 प्रत्ययस्यैवाकारस्य A^2 प्रत्ययस्यैकारस्य M^1

[२] वक्ष्यमाणः V A^1 A^2 M^2 : यक्ष्यमाणः M^1

[३] तदवस्थ एव V A^1 M^2 : तादवस्थ्यात् A^2 om M^1

[४] घटकतयेति अस्यानध्याहारेणैव V M^2 : घटकतयेत्यस्यानध्याहारेणैतन्मूलमेवेति A^1 A^2 M^1

[५] भावः V A^1 A^2 M^2 : भावः। प्रवृत्तिकल्पना मात्रेण मुग्वैयर्थ्यपरिहारात् M^1

[६] ०त्तिरेव ज्ञाप्यते A^1 : ०त्तिरेव ज्ञाप्या V A^2 M^2 ०त्ति ज्ञाप्या M^1

[७] वर्णग्रहणे.....परिहारात्। V A^1 A^2 M^2 : वर्णग्रहणे पूर्वा M^1

[८] मिदचोन्त्यात्.....विरुध्यते। V A^1 A^2 M^2 : om M^1

[९] णत्वनिषेधापत्या V A^1 A^2 M^1 : णत्वानिषेधापत्या M^2

अट्कुप्वाङ्... (8-4-2/197) इति सूत्रे नस्येत्यनेन ङमुट् सहितस्यैव ग्रहणात्[१] कुर्वन्नास्ते इत्यादौ[२] द्वयोर्नकारयोर्णत्वं प्राप्तं पदान्तस्य(8-4-37/198) इत्यनेन वार्यते। द्वयोर्नयोः पदान्तत्वे ङमोऽपि पदान्तत्वेन तावन्मात्रस्य णत्वम्। पदान्तस्य इत्यत्र पदान्तपर्याप्त्यधिकरणी भूतस्येत्यर्थे तु न मानम्[३]। फला-भावाच्च। नस्येत्यस्य पदान्तविशेषणतया नकारपर्याप्तपदान्तत्वाश्रयण-त्वनिषेधात् न रामाणामित्यादौ दोषः[४]। तत्र च वर्णग्रहणे एष एव यदागम-(परि०11) न्यायो भाष्याभिप्रेत इति दिक्।

[४]

अस्यां ज्ञापकमाह। **अत एव नेटि इति**[५]। **अयमर्थ इति**। टित् इत्यत्र बहुव्रीहिः आर्द्धधातुक...(7-2-35) इत्यस्य स्थानषष्ठ्यन्तताश्रयणपरमाद्यन्तौ ...(1-1-21 भा०प्र०ख०प०आ०पृ०299) इति सूत्रस्थं भाष्यन्त्वेकदेशिपरमिति भावः[६]।

---

[१] ग्रहणात् V A^1 M^2 : ग्रहणेन A^2 M^1

[२] इत्यादौ V M^2 : इत्यत्र A^1 A^2 M^1

[३] पदान्तत्वे ङमोऽपि ..... तु न मानम्। V M^2 : पर्याप्त्यधिकरणेत्यर्थे तु न मानम्। A^1 पदान्तत्वे ङमोऽपि पदान्तत्वेन तावन्मात्रस्यापि णत्वम्। पदान्तस्य इत्यत्र पदान्तत्वपर्याप्त्यधिकरणस्य भूतस्ये-त्यर्थे तु न मानम्। A^2 पदान्तत्वेन तावन्मात्रस्यापि न णत्वम्। पदान्तस्य इत्येतत् न पदान्तत्व - पर्याप्त्यधिकरणनिवेशे मानम्। M^1

[४] ०पदान्त.....दोषः V A^1 M^2 : ०पदान्तत्वाश्रयस्य णत्वनिषेधात् न रामाणामित्यादौ निषेधः A^2 M^1

[५] अस्यां ज्ञापकमाह। **अत एव नेटि इति**। V M^2: अत एव नेटि इति A^1 अस्यां ज्ञापकमाह अत एवेति। A^2 M^1

[६] टित्.....भावः। V M^2 : टित् इत्यत्र बहुव्रीहिः सूत्रस्थं भाष्यन्त्वेकदेशिपरमिति भावः। A^1 **इड्** इत्यत्र बहुव्रीहिणा आर्द्धधातुकस्य..... इत्यस्य स्थानषष्ठ्यन्तताश्रयणपरमाद्यन्ताविति सूत्रस्थं भाष्यन्त्वेकदेश्यु क्तिरिति भावः। A^2 **इड्** इत्यत्र बहुव्रीहिणा आर्द्धधातुकस्य... इत्यस्य स्थानषष्ठ्यन्तताश्रयण परं भाष्यमेकदेश्युक्तिरिति भावः। M^1

न त्यागेति। आवृत्त्या एरुः (3-4-86/2196) इत्यादौ द्विविधोऽपि स्थान्यादेशभावो विवक्षित इति भावः ॥ ११ ॥

निर्दिश्यमानस्यादेशा भवन्ति ॥ १२ ॥

[१]

षष्ठ्यन्तमिति। अन्तः शब्दः समीपवर्तिप्रकृतिवचनः। सूत्रे षष्ठीशब्दस्तत्प्रकृतौ लाक्षणिकः[१] निर्दिश्यमान इति चाध्याहारः इति भावः[२]। प्रत्युच्चारणं[३] शब्दभेदात् लक्ष्यस्थस्य[४] न निर्दिश्यमानत्वमत आह **सजातीयमिति**[५]। **अवयवरूपमिति।** ननु तदोः...(7-2-106/381) इत्यादौ त्यदादीनामः ... (7-2-102/265) इत्यादेः न स्थानषष्ठीत्वमिति[६] कथं तत्रैतत्प्रवृत्तिरिति चेदत्र नव्याः। तदो...(7-2-106/381) इति स्थानषष्ठीबलेनोपस्थितैषा[७] तत्रापि[८] फलाभावाद्विशेषणे पर्यवस्यति। इति वदन्ति।[९] परे तु सर्वादि...(1-1-27/ 213) सूत्रस्थभाष्यतः योग्येतरान्विते स्वार्थे पदानां शक्तिलाभेन स्वंरूपम्(1-1-68/25)

---

[१] **षष्ठ्यन्त .....** लाक्षणिकः V M^2 A^2 : om A^1 M^1

[२] इति चाध्याहारः इति भावः A^2 M^1 : इति वाध्याहारः इति भावः V M^2 om A^1

[३] प्रत्युच्चारणं V A^2 M^1 M^2 : प्रकृत्युच्चारणं A^1

[४] शब्दभेदाल्लक्ष्यस्थस्य V A^1 A^2 M^2 : शब्दभेदाल्लक्ष्यभेद इति सूत्रस्थस्य M^1

[५] **सजातीयमिति।** V A^1 A^2 M^2 : **सजातीय इति** M^1

[६] स्थानषष्ठीत्वमिति V A^1 A^2 M^2 : षष्ठीत्वमिति M^1

[७] ०बलेनोपस्थितैषा V M^2 : ०बलेनोपस्थापितैषा A^1 A^2 M^1

[८] तत्रापि V A^1 M^2 : तत्र A^2 M^1

[९] फलाभावाद्विशेषणे पर्यवस्यति। इति वदन्ति। V A^1 M^2 : फलाभावातद्विशेषणे विश्राम्यतीति। A^2 विशाषणविशेषणे विश्राम्यतीति M^1

इति शास्त्रातिरिक्तशक्तिग्राहक[१]शास्त्राननुसन्धानकालीकोपस्थिति[२] विषयत्वस्यैव निर्दिश्यमानत्वेन तदोः[३] ...(7-2-106/381) इत्यतस्य च[४] तदन्तविधितः पूर्व त्यदाद्यवयवतदोरेवोपस्थित्या तयोरेव निर्दिश्यमान- त्वान्नातित्यदित्यादौ दोष इति प्राहुः[५]। न प्रतीयमानमित्येवं पाठः।[६] इत्यर्थः इति पाठे[७] युज्यत इत्यस्य[८] पूर्वेणान्वयः। अयमर्थः इत्यस्य च शाब्दोऽर्थः इत्यर्थः। इत्यर्थ इत्यस्य च आर्थिकोऽर्थ इत्यर्थः।

[२]

धात्वादीनाम् इति। येन रूपेण प्रयोगघटकता तेन रूपेण पदोपस्थाप्यत्वं निर्दिश्यमानत्वम्। धातुपदाच्च भ्वादीनां तेनैव रूपेणोपस्थितिरिति भावः। **स्पष्टार्थमिति**। अत्र द्वयोः विरोधेन परया अनेकाल् इत्यनया अस्य बाधः स्यादतो ङित्वं सफलमिति केचित्[९]। **विरोधादिति** । यद्यपि विसर्गस्य नोच्चार्यमाणत्वम्। तथापि[१०] पूर्वोक्तरीत्या निर्द्दिश्यमानत्वं

---

[१] शास्त्रातिरिक्तशक्तिग्राहक० V A^2 M^1 M^2 : शास्त्रातिरिक्तग्राहक० A^1

[२] ०सन्धानकालिकोप० A^1 A^2 M^2 : ०सन्धानकालीनोप० V ०सन्धानोप० M^1

[३] ०त्वेन तदोः V A^1 M^1 M^2 : ०त्वेन च तदोः A^2

[४] इत्यस्य च तद० M^1 : इत्यतश्च तद० V A^1 A^2 M^2

[५] ०न्नातित्यदित्यादौ दोष इति प्राहुः। V M^2 : ०न्नाति स इत्यदोष इति प्राहुः। A^1 ०न्नाति स इत्यादौ दोष इति प्राहुः। A^2 ०न्नाति स इत्यादौ दोष इति आहुः M^1

[६] ०त्येवं पाठः। V A^1 A^2 M^2 : ०त्येव पाठः। M^1

[७] इत्यर्थः इति पाठे V A^1 M^2 : इत्यर्थः पाठे A^2 इत्यत्र इति पाठे M^1

[८] इत्यस्य पू० V A^1 A^2 M^2 : इति पू० M^1

[९] **स्पष्टार्थमिति**। .....केचित्। V M^2 : अत्र द्वयोः.....केचित्। A^1 **स्पष्टार्थमिति**। .....इत्यनयाऽस्याबाधः स्यादिति ङित्वं सफलमिति केचित्। A^2 om M^1

[१०] तथापि V A^2 M^1 M^2 : तयापि A^1

निर्वचनीयम्[१]। केचित्[२] स्वबोध्याघटितत्त्वे[३] सति स्वबोध्यत्वं तत्त्वमित्याहुः। तन्न। न च[४] अस्य च्वौ (7-4-32/2118) इत्यादिपूर्वग्रन्थविरोधात्। भिन्धकीत्यादौ साकच्कस्य हि शब्दाघटितत्वेन[५] तत्वापत्त्या तद-भावप्रतिपादकेन हुझल्भ्यः ...(6-4-101भा०प०ख०तृ०आ०पृ०338) इति सूत्रस्थ-भाष्येण विरोधाच्च। **इदं चिन्त्यम्।** वर्णग्रहणे[६] इत्यस्याल्ग्रहणे इत्यर्थात्। **नापीति।** विधिप्रदेशे द्वयोरङ्गाङ्गीभावेऽपि स्वातन्त्र्येण द्वयोर्न सः। तेन परस्परनैरपेक्ष्येण द्वयोः प्रवृत्तिसिद्धिः। तेन[७] अलोऽन्त्यस्य (1-1-52/42) इत्यनेनास्याः क्वचित् सामानाधिकरण्यम्[८] । यथा णेरनिटि (6-4-51/2313) इत्यादौ ण्यन्ताङ्गस्य अन्त्यस्य अलो णेरित्यर्थात् क्वचित् वैयधिकरण्यम् । यथा त्यदादीनामः (7-2-102/265) इत्यादौ। तेन तानीत्यादौ न नुमः त्यदाद्यत्वम् ।

---

[१] निर्वचनीयम्। V A^1 M^2 : निर्वक्तव्यम्। A^2 M^1

[२] केचित् V A^1 M^2 : केचित्तु A^2 M^1

[३] स्वबोध्याघटितत्त्वे V A^1 M^2 : स्वस्वबोध्याघटितत्त्वे A^2 स्वस्वबोध्यघटितत्त्वे M^1

[४] न च V A^1 A^2 M^2 : om M^1

[५] शब्दाघटितत्वेन V A^2 : शब्दस्याघटितत्वेन A^1 शब्दाघटकत्वे M^1

त्त्या तदभावप्रतिपादकेन **हुझल्भ्यः**...(6-4-101/24 25) इति सूत्रस्थभाष्येण विरोधाच्च ... .. प्रवृत्तौ देवदत्तार्तेत्यादाविव पचमान इत्यत्रापि निर्द्दि ॥ मातृका रिक्तेति ज्ञेया M^{1*}

[६] वर्णग्रहणे इत्यस्याल् V A^1 M^2 : वर्णग्रहणस्याल् A^2 M^{1*}

[७] तेन A^1 : तत्र V A^2 M^2 M^{1*}

[८] क्वचित् सामानाधिकरण्यम् V A^2 M^2 : सामानाधिकरण्यम् A^1 M^{1*}

[३]

उदःस्थादितीति। अस्मिन् लक्ष्ये इत्यर्थः। **सूत्रविषये इति।** उदः स्थ...(8-4-61/118) इति सूत्रविषये इत्यर्थः। उदः स्थेति सूत्रविषये इति पाठः सुगमः[१]। **सञ्चारितत्वादिति** । एतद् बाधकयोरपि एतत्[२] बाध्य यदागम ... (परि०11) न्यायोपजीवनेन उदस्थादित्यादौ तयोः प्रवृत्त्या एतद्बाध्यत्वमिति कैयटाशय इति परे। **अकज्विषये इति।** साकच्कानपहारकादेशविधौ इत्यर्थः। अत्र मानम् अनाप्यकः (7-2-112/346) इत्यत्र अक इति[३] प्रतिषेधः। फलन्तु युवकाभ्यामि-त्यादौ[४] आत्वसिद्धिः। तदपहारके[५] तु उपतिष्ठते एव अयं न्यायः[६]। यथा हुझल्भ्यः ...(6-4-101 भा०प०ख०तृ०आ०पृ०338) इति सूत्रे भाष्ये भिन्धकीत्यादौ अकचि हित्वाभावान्न धित्वमिति आशङ्कितम्। कादेशस्तु आवृत्त्या पुनः विधानसामर्थ्यात् साकच्कस्यापि प्रवर्तते। **अत्रेदं विचार्यते।** एषा अर्थवद्ग्रहणपरिभाषायाः[७]...(परि०14) बाधिका उत न इति[८]। नान्त्यः। लावस्थायामडिति पक्षे अपिबत् इत्यादौ पिबादेशानापत्तेः। स्यसिच् ...(6-4-62) सूत्रे भाष्ये आगमसन्निधाने तद्रहितस्यार्थवत्वाभावोक्तेः[९]। नाद्यः।

---

[१] **उदःस्थादितीति।** अस्मिन्.....सुगमः V M^2 : **उदस्थादिति।** अस्मिन्.....पाठस्तु सुगमः A^1 om A^2 M^{1*}

[२] बाधकयोरपि एतत् V A^1 M^2: बाधकयोरपि तयोः A^2 M^{1*}

[३] इत्यत्र अक इति A^2 : इति V A^1 M^2 M^{1*}

[४] युवकाभ्यामित्यादौ V A^2 M^2 : युवकाभ्यामित्यादिसिद्धिः A^1 M^{1*}

[५] तदपहारके V A^2 M^2 : तदपहारे A^1 M^{1*}

[६] अयं न्यायः A^2 : न्यायः V A^1 M^2 M^{1*}

[७] ०भाषायाः V M^2 : ०भाषाबा ० A^1 A^2 M^{1*}

[८] न इति A^2 : न V A^1 M^2 M^{1*}

[९] ०स्यार्थवत्वाभावोक्तेः V A^1 M^2 : ०स्यार्थाभावोक्तेः A^2 M^{1*}

राजेः पृथक् भ्राजिग्रहणवैय्यर्थ्यात्। वानरशब्दे नृनरयोः ¶ इति वृद्ध्यापत्तेश्च। एवं धातुत्वप्रत्ययत्वाद्यपि आगमसन्निधाने तद्रहितेऽङ्गीक्रियते न वा। नतावदाद्यः। स्यसिच् सूत्रस्थभाष्यविरोधात्। किञ्च ग्रहोऽलिटि...(7-2-37/2562) इत्यत्र एकाच्[१] इत्यस्य सम्बन्धे अग्रहीष्टाम्[२] इत्यत्र शेखरोक्तदीर्घाभावापादनासङ्गतिः[३]। अट्[४] रहितस्य एकाच्त्वात्। **नान्त्यः** । धातौ वृद्धिमटः[५] स्मरेत् ¶ ...(6-4-74 भा०ष०ख०तृ०आ०पृ०330) इति वार्त्तिकविरोधात्। लावस्थायामडिति सिद्धान्ते अखदीत्[६] इत्यादौ अतो हलादेः...(7-2-7/2284) इति वृद्ध्यनापत्तेः[७]। तत्सूत्रन्तु माङ्योगे चरितार्थम्।

किञ्च आज्जसेः ... (7-1-50/3572) इति सूत्रे[८] पूर्वासः इत्यत्र असुकि जसः शीभावः स्यादित्याशङ्क्य निर्द्दिश्यमान...(परि० 12) परिभाषया परिहृत्य यस्तर्हि निर्द्दिश्यते इति पुनराशङ्कितम्। तच्चोक्तपक्षेऽसङ्गतम्। निर्द्दिश्यमानजसोऽर्थवत्त्वाभावात्[९]। एवं यदागम... (परि० 11) न्यायस्य वर्णग्रहणेऽपवृत्तौ मूलोक्तानि दूषणानि प्रवृत्तौ[१०] लण् (मा०सू०6 भा०प्र०ख०द्वि० आ०पृ०144) सूत्रस्थ-

---

[१] एकाच् V M^2 : एकाच A^1 A^2 M^{1*}

[२] अग्रहीष्टाम् V M^2 : अग्रहीष्ट A^1 न इति A^2 M^{1*}

[३] ०भावापादनासङ्गतिः V M^2 : ०भावासङ्गतेः A^1 ०भावापादानासङ्गतिः A^2 M^{1*}

[४] अट् V A^2 M^2 : om A^1 M^{1*}

[५] वृद्धिमटः V A^2 M^2 : वृद्धिमत् A^1 M^{1*}

[६] अखदीत् V M^2 : अखादीत् A^1 स्यादीत् A^2 M^{1*}

[७] वृद्ध्यनापत्तेश्च A^2 : वृद्ध्यनापत्तेः V A^1 M^2 M^{1*}

[८] इति सूत्रे A^2 : इत्यादौ V A^1 M^2 M^{1*}

[९] ०सोऽर्थवत्त्वाभावात् V A^1 M^2 : ०सोऽर्थवत्त्वप्रत्ययत्त्वयोरभावात् A^2 M^{1*}

[१०] मूलोक्तानि दूषणानि प्रवृत्तौ V A^2 M^2 : om A^1 M^{1*}

भाष्यविरोधः। तत्र हि परेण अण् ग्रहणे चिकीर्षति इत्यादौ दीर्घे[१] रपरत्वे[२] इत्वाप्राप्तिमाशङ्क्य उपधाया श्च (7-1-101/2571) इत्येवं भविष्यति इत्युक्तम्। त्वद्रीत्या तु उक्तन्यायेन रपरत्वे[३] ऋदन्तत्त्वान्निर्दिश्यमान ऋकारस्येत्वे रूपसिद्धेः शङ्कायाः असङ्गतिः। अल्त्वावर्णत्वयोरपि[४] आगमसहिते एव सत्वेन समाधानासङ्गतिश्च। अनित्यत्वादुक्तन्यायाप्रवृत्तौ इष्टस्थले प्रवृत्तेरावश्यकतया तत एव मातृणामित्यादौ उपधाया श्च (7-1-101/2571) इति इत्ववारणे तदर्थं धातुग्रहणावश्यकत्वोक्त्य[५]सङ्गतिः। किञ्च जहर्थेत्यादौ गुणेऽप्यजन्त-सन्निपातेन अचस्तास्व ... (7-2-61/2294) इति सूत्रस्थं स्यसिच् सूत्रस्थं भाष्यं च विरुध्यते[६]। एवं निर्दिश्यमान ...(परि०12) परिभाषायाः वर्णग्रहणे अप्रवृत्तौ मूलोक्तं दूषणम् प्रवृत्तौ देवदत्तार्तेत्यादाविव पचमान इत्यादाापि[७] निर्दि[८]श्यमा-नपरिभाषया मुको[९] दीर्घाभावेऽपि[१०] विशिष्टस्य सवर्णदीर्घे तद्वैय्यर्थ्यमिति

---

[१] दीर्घे V M^2 : om A^1 A^2 M^{1*}

[२] रपरत्वे V A^2 : रपरत्वेन A^1 रपर M^2 M^{1*}

[३] रपरत्वे V A^2 M^2 : रपरे A^1 M^{1*}

[४] अल्त्वावर्ण० V M^2 : अल्त्ववर्ण० A^1 A^2 M^{1*}

[५] ०वश्यकत्वोक्त्य० V A^2 M^2 : ०वश्यकोक्त्य० A^1 M^{1*}

[६] किञ्च जहर्थेत्यादौ गुणेऽप्यजन्तसन्निपातेन अचस्तास्व...इति सूत्रस्थं स्यसिच् सूत्रस्थं भाष्यं च विरुध्यते V M^2 : किञ्च जहर्थेत्यादौ गुणेप्यजन्तत्वानपायेन अच स्ताविदिति सूत्रस्थं भाष्ये कारिष्यते इत्यादौ गुणे चिण्वद्भावो न स्यादिति स्यसिच् सूत्रस्थं भाष्यं च विरुध्यते A^1 A^2 M^{1*}

[७] इत्यादावपि A^2 : इत्यत्रापि V A^1 M^2 M^{1*}

[८] त्त्या तदभावप्रतिपादकेन **हुझल्भ्यः**...(6-4-101/24 25) इति सूत्रस्थभाष्येण विरोधाच्च। ... . प्रवृत्तौ देवदत्तार्तेत्यादाविव पचमान इत्यत्रापि निर्दि ॥ मातृका रिक्तेति ज्ञेया M^1

[९] मुको V A^1 A^2 M^2 : मुका M^1

[१०] दीर्घाभावेऽपि V A^1 M^2 : दीर्घाभावे A^2 M^1

पूर्वग्रन्थाऽसङ्गतिरिति। अत्र ब्रूमः। निर्द्दिश्यमानपरिभाषया अर्थवत्परिभाषा[१] ...(परि०14) बाधकत्वं नामागमप्रवृत्तेः पूर्वमागमिनो यथाऽर्थवत्वं[२] तत्तत्पद[३]-बोध्यत्वादितदागमे जातेऽपि तथैवेति वार्त्तिके धातुग्रहणं[४] सामर्थ्यात्तत्वेन दृष्टपरम्। हलादेः इति च अतोर्विशेषणम्।[५] यदागमन्यायस्तु...(परि०11) वर्णग्रहणे न प्रवर्तते। स्यसिच्...(6-4-62/2757) सूत्रे उपदेशग्रहणात्। पदान्त-त्त्वस्य[६] वर्णमात्रवृत्तित्वाभावादेव[७] न दोषः। गुणादिसंज्ञा[८] रेफरहिते एव। वर्णग्रहणे उक्तन्यायाप्रवृत्त्या सरेफस्य गुणत्वाभावेऽपि रेफस्य वचनबोधिता-वयवत्यागे मानाभावेन अवयवद्वारकान्तर्यमादायारारावेति[९] नियमोपपत्तेः। एतेन रदाभ्याम् ... (8 - 2- 42/3016) इति सूत्रस्थं भाष्यमपि व्याख्यातम्। उत्सर्ग-समानदेशा अपवादाः इति न्यायेन[१०] निर्द्दिश्यमानपरिभाषापि... (परि०12)

---

[१] अर्थवत्परिभाषा V A^1 M^2 : यदागमपरिभाषा A^2 M^1

[२] ०र्थवत्वं तत्त०V A^1 M^2 : ०र्थवत्वं प्रत्ययत्व तत्त० A^2 M^1

[३] तत्तत्पद० V A^1 A^2 M^1 : तत्पद० M^2

[४] वार्त्तिके धातुग्रहण V M^2 : वार्त्तिके अधातुपद A^1 वार्त्तिके धातुपद A^2 M^1

[५] हलादेः इति च अतोर्विशेषणम् V A^1 M^1 M^2 : यद्वा धात्ववयवेऽचीत्यर्थः। अस्व-पोऽहन्नित्यत्रादित्यनवृत्या न दोषः। सिजन्तस्याङ्गस्य अडित्यखादीत्यादौ न दोषः। लावस्थायामडिति पक्षेऽपि हलादेरिति कर्मधारयः आदि पदं च पूर्वोच्चारितपरं स्पष्टार्थम् A^2

[६] उपदेशग्रहणात्। पदान्तत्त्वस्य V A^1 A^2 M^2 : उपदेशग्रहणसामर्थ्यात्। पदान्तस्य M^1

[७] वृत्तित्वाभावादेव V A^2 M^2 : प्रवृत्तित्वाभावादेव A^1 वृत्तित्वाभावेन M^1

[८] संज्ञा तु A^1 A^2 M^1 : संज्ञा V M^2

[९] ०यारारावेति V A^1 M^2 : ०यारारावेवेति A^2 M^1

[१०] न्यायेन V A^1 M^1 M^2 : रीङ्रीङोर्ङित्वेन च चदिति। रूपार्तिदे फलतः ऊ न्यादेश इति भावः। उपस्थितस्य A^2

नाल्ग्रहणे। अत एवानुमानिकस्थान्यादेशभावे ईवर्णान्तस्य[१] तु विधीयमानो नेकारमात्रस्येति दिक्॥ १२॥

यत्रानेकविधमान्तर्यं तत्र स्थनत आन्तर्यं बलीयः ॥ १३ ॥

[१]

पद्दन्निति[२]। अर्थतः आन्तर्यात् अत्र[३] आदेशत्वे निर्णीति पदादिभिः आदेशैः[४] स्वानुरूपस्थान्याक्षेपसिद्धिः[५] नान्यथेति भावः। **समानवर्ण इति** । तत्फलं तु[६] चरणस्य न पदादेशः। तस्य तस्मिन्नपुंसकत्वापत्तिः[७] ॥ १३॥

अर्थवद्ग्रहणे नानर्थकस्य ॥ १४ ॥

[१]

कल्पितान्वयेति। अन्वयव्यतिरेकौ यत्सत्वे यत्सत्वं यदभावे यदभावो[८] तौ च प्रकृति प्रत्ययादिति कल्पितावेवेति भावः[९]। **वर्णग्रहणेषु नेति**[१०]। अत्र मानं नेदमदसोरकोः...(7-1-11/349) इति सूत्रे अकोरिति प्रतिषेधः॥ १४॥

---

[१] ईवर्णान्तस्य V M^2 : इवर्णान्तस्य A^1 A^2 M^1

[२] पद्दन्निति A^2 : पदन्निति V M^1 M^2 पदन्न इति A^1

[३] आन्तर्यात् अत्र M^1 : आन्तर्यवत एव V A^2 M^2 आन्तर्य एव A^1

[४] पदादिभिः आदेशैः V A^2 M^1 M^2 : पदादिस्थिरादेशः A^1

[५] स्वानुरूपस्थान्याक्षेपसिद्धिः V A^2 M^2 : स्थानरूपस्थान्यपेक्षास्ति A^1 स्वानुरूपस्थान्याक्षेपासिद्धिः M^1

[६] तत्फलं तु V M^1 M^2 : तत्फलं A^1 A^2

[७] तस्य तस्मिन्नपुंसकत्वापत्तिः V A^1 A^2 M^2 : तस्य च तस्मिन्नपुंसकत्वसिद्धिः M^1

[८] यत्सत्वे यत्सत्वं यदभावे यदभावो V A^1 M^2 : सत्वतदभावौ A^2 M^1

[९] प्रत्ययादिति कल्पितावेवेति भावः V M^2 : प्रत्ययादिना कल्पितावेवेत्यर्थः A^1 प्रत्ययादीनां कल्पिता उपवेवेत्यर्थः A^2 प्रत्ययादीनां कल्पितावेव इत्यर्थः M^1

[१०] वर्णग्रहणेषु नेति V M^2 : वर्णग्रहणेति A^1 वर्णग्रहणेनेति A^2 M^1

गौणमुख्ययोर्मुख्ये कार्यसम्प्रत्ययः ॥ १५ ॥

[१]

मुखमिवेति। शाखादिभ्यो यः (5-3-103/2058)। **निपातपदमिति**। ननु चादीनां तथोपस्थित्या[१] उपतिष्ठतां नाम तदा एषा। च्व्यन्तस्य[२] तु न तथेति कथं तत्र विशिष्टरूपोपादानम्। किञ्च प्रकृतावारोपेण[३] वर्तमानादेव[४] च्विविधानेन तस्य न[५] मुख्यगौणार्थौ सम्भवतः[६]। किञ्चैवं निपातोद्देश्यककार्यमात्रे[७] च्व्यन्तस्याग्रहणा-पत्तिरिति चेत् अत्र केचित्। चाद्यंशे[८] विशिष्ट- रूपोपादानमात्रेण प्रवृत्तौ परि-भाषाकार्यान्तरमप्यनुगृह्णाति[९]। कार्यान्तरे तु अनित्यत्वादस्या अप्रवृत्तिरिति[१०] भावः[११]।

---

[१] तथोपस्थित्या V A^1 A^2 M^2 : ततोपस्थित्या M^1

[२] उपतिष्ठतां नाम तदा एषा। च्व्यन्त० V M^1 M^2 : उपतिष्ठतां नाम तदंश एव च्यन्त० A^1 भाष्ये उपतिष्ठतां नाम तदंश एव घ्यन्त० A^2

[३] प्रकृतावारोपेण V A^1 A^2 M^2 : प्रकृतावारोपेणैव M^1

[४] वर्तमानादेव V A^1 A^2 M^2 : om M^1

[५] तस्य न V A^2 M^2 : तस्य M^1 om A^1

[६] ०णार्थौ सम्भवतः V A^2 M^2 : ०णार्थौ सङ्गतौ भवतः A^1 ०णार्थे सम्भवतः M^1

[७] निपातोद्देश्यककार्यमात्रे V A^2 M^1 M^2 : निपातोद्देश्ये कार्यमात्रे A^1

[८] चाद्यंशे V A^1 A^2 M^2 : च्व्याद्यंशे M^1

[९] प्रवृत्तौ परिभाषाकार्यान्तरमप्यनुगृह्णाति M^1: प्रवृत्ता परिभाषांऽशान्तरमनुगृह्णाति V प्रवृत्ता परिभाषांशान्तरमप्यनुगृह्णाति A^1 A^2 M^2

[१०] ०न्तरे तु अनित्यत्वादस्या अप्रवृत्तिरिति V A^2 M^1 M^2 : ०न्तरत्वे नित्यत्वादस्याप्रवृत्तिरिति A^1

[११] भावः V M^2 : om A^1 A^2 M^1

[२]

देवताद्वन्द्वेति। अत्यन्तसहचरिते लोकविज्ञाते[१] द्वन्द्वमित्युपसंख्यानम् (8-1-15 भा०ष०ख०प्र०आ०पृ०41) इति वार्त्तिकनिष्पन्नस्यात्र ग्रहणम्। ओत् (1-1-15) सूत्रस्थं कौस्तुभोक्तं दूषणं परिहरति[२] **गां पाठयेति**[३]। अस्य पदकार्यविषयत्वे शूद्राच ¶...(सू० 4-1-4/वा०सं०5125/5126) इति वार्त्तिके[४] जातिग्रहणमपि लिङ्गम्। ननु किमिदं पदकार्यत्वम्। न तावत्पदोद्देश्यकत्वम्[५]। तद्धित-विधावनुपस्थानापत्तेः। तेषां वस्तुतः सुबन्तात्प्रवृत्तावपि तदनुद्देश्यकत्वात्। नापि वस्तुतः पदसम्बन्धित्वम्। णित्वस्यापि तथात्त्वात्। त्वद्भूतः इत्यादौ त्वाद्यादेशाद्यनापत्तिश्च[६]। नापि प्रत्ययानिमित्तकत्वं तत्। हरितादिभ्योऽञ् (4-1-100/1102) इत्यस्यापि तथात्वेन तत्रैव[७] तस्याप्रवृत्तौ गौणेभ्योऽपि तेभ्यः फगापत्तेरिति[८] चेन्न। अङ्गसंज्ञाऽनिमित्तकत्वे सति वस्तुतः पदसम्बन्धिकार्यत्वं तत्त्वमिति न कश्चिद्दोषः॥ १५॥

---

[१] लोकविज्ञाते V A^2 M^1 M^2 : लोकज्ञाने A^1

[२] ओत् सूत्रस्थं कौस्तुभोक्तं दूषणं परिहरति V A^2 M^1 M^2 : ओत् सूत्रे कौस्तुभोक्तं परिहरति A^1

[३] गां पाठयेति V A^1 M^1 M^2 : गां पाठ्येति A^2

[४] वार्त्तिके ego: सूत्रे V A^1 A^2 M^1 M^2

[५] ०कत्वम् V A^1 M^1 M^2 : ०कम् A^2

[६] तेषां वस्तुतः.....त्वाद्यादेशाद्यनापत्तिश्च V A^2 M^2 : तेषां वस्तुतः....त्वाद्यादेशानापत्तिश्च A^1 om M^1

[७] तत्रैव V M^2 : तत्रैतस्या० A^1 A^2 M^1

[८] फगापत्तेरिति A^1 A^2 M^1 : फगापत्तिरिति V M^2

अनिनस्मिन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति ॥१६॥

[१]

अङ्गग्रहणादिति। इण इत्यस्य[१] षीध्वमादिविशेषणत्वेन बुबुधिध्वे इत्यादौ न दोष इति भावः ॥ १६ ॥

एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः ॥ १७ ॥

[१]

परस्परेति। एकेन योगेन सम्बन्धेन[२] निर्दिष्टानामिति विग्रहः। अत्र च ज्ञापकं सुबामन्त्रित...(2-1-2/3656) इत्यतः सुबिति अनुवर्तमाने सुप्प्रतिना...(2-1-9/663) इत्यत्र पुनः सुब्ग्रहणम्। **असम्बन्धार्थमिति**। सम्बन्धशङ्कावारणार्थमित्यर्थः ॥ १७ ॥

क्वचिदेकदेशोऽप्यनुवर्तते ॥ १८ ॥

[१]

तावन्मात्रांश इति। वस्तुतः संख्यापदे स्वरितत्वं प्रतिज्ञाय पुनरादिपदे तत्प्रति ज्ञानमेतन्मूलकम्[३]। केचिदादिमं परित्यज्यान्तिमेन प्रतिज्ञातम्[४] ॥ १८ ॥

---

[१] इण इत्यस्य V A^2 M^1 M^2 : इण् इत्यस्य A^1

[२] सम्बन्धेन V A^1 A^2 M^2 : om M^1

[३] ज्ञानमेतन्मूलकम् V M^2 : ज्ञानमेतन्मूलम् A^1 A^2 ज्ञानमेव तन्मूलम् M^1

[४] केचिदादिमं परित्यज्यान्तिमेन प्रतिज्ञातम् V M^2 : केचिदादिपरं परित्यज्यान्तिके तत् प्रतिज्ञानम् A^1 क्वचिदादिपरं परित्यज्यान्तिमे तत्प्रतिज्ञानम् A^2 M^1

भाव्यमानेन सवर्णानां ग्रहणं न ॥ १९ ॥

[१]

सामर्थ्यादिति। योगविभागसामर्थ्यादित्यर्थः। **ज्ञापयतीति।** स्थालीपुलाक-न्यायेन सूचयतीत्यर्थः।

[२]

ज्ञापकमिति। ननु ज्ञापितेऽपि व्यर्थे[१] लोपेन सिद्धेः अकारविधानसामर्थ्याद्दीर्घे[२] रूपसिद्धेरिति[३] चेन्न। लोपे सति अकृत्सार्व[४]...(7-4-25/2298) इति दीर्घापत्तेः ॥ १९ ॥

भाव्यमानोऽप्युकारः सवर्णान्गृह्णाति ॥ २० ॥

[१]

दिव उदिति। च्छ्वोः शूड् ...(6-4-19/ 25 61) इत्यत्र किद्ग्रहणाननुवृत्ति-पक्षमाश्रित्येदम्[५]। तदनुवृत्तिपक्षे आह[६] **ऋत उदिति** (6-1-111/2 79)। **नन्वेवम् उदुपधाया**...(6-4-89/2364) इत्येव सिद्धे दीर्घोच्चारणं व्यर्थमिति चेन्न[७]। गुहे ण्यन्ता

---

[१] व्यर्थे V A^1 A^2 M^2 : व्यर्थः M^1

[२] सिद्धेः अकारविधानसामर्थ्याद्दीर्घे V A^1 M^2 : सिद्धेऽकारविधानसामर्थ्येन दीर्घे A^2 सिद्धेः आकारविधानसामर्थ्याद्दीर्घे M^1

[३] रूपसिद्धेरिति V A^1 A^2 M^2 : रूपसिद्धिरिति M^1

[४] लोपे सति अकृत्साव० V A^2 M^1 M^2 : लोके सत्यपि अकृत्सार्वधातुक० A^1

[५] किद्ग्रहणाननुवृत्तिपक्षमाश्रित्येदम् V M^2 : ङिद्ग्रणानुवृत्तिपक्षमाश्रित्येदम्। A^1 ङिद्ग्रणाननुवृत्तिपक्षमाश्रित्येदम्। A^2 M^1

[६] तदनुवृत्तिपक्षे आह V A^1 M^1 M^2 : तदनुवृत्तिपक्षे त्वाह A^2

[७] नन्वेवम् **उदुपधाया**...यर्थमिति चेन्न V A^1 A^2 M^2 : om M^1

च्चङि[१] उपधाकार्यस्य द्वित्वात्प्राबल्येन गुणे ऊत्वे[२] णौ चङि...(7-4-1/2314) इति ह्रस्वाप्रवृत्त्यर्थत्वात्[३]। कुरुत इत्यत्र उदिति तपरकरणे[४] गुणाप्रवृत्तिवत्। अत एव ऊदुपधाया गोहः (4-1-100/1102) इति सूत्रे उ ऊदिति प्रश्लेषेण[५] गोह इति विकृतनिर्देशो भाष्यकृता प्रत्याख्यातः अजुगूहदित्यर्थं[६] प्रश्लेषस्या-वश्यकत्वात्। न चोत्वदृष्ट्या णौचङि ...(7-4-1/2314) इति ह्रस्वस्य बहिर-ङ्गतया असिद्धत्वेन[७] बाधासम्भवः[८] इति वाच्यम्। ऊदिति दीर्घोच्चारण-सामर्थ्येन उक्तभाष्यबलेन च बहिरङ्गस्याप्युपधात्वनिमित्तकह्रस्वस्य बाधकल्पनात्॥ २०॥

वर्णाश्रये नास्ति प्रत्ययलक्षणम्॥ २१॥

[१]

प्रत्ययस्येतराविशेषणत्वेति[९]। वर्णाविशेषणत्वे इत्यर्थः[१०]॥ २१॥

---

[१] गुहे ण्यन्ताच्चङि V A^1 M^1 M^2 : गूहयतीत्यत्र गुणे परत्वात् मितां ह्रस्व इति ह्रस्वे दीर्घार्थत्वात् गुहे ण्यन्ताच्घङि M^1

[२] ऊत्वे V A^2 M^2 : उत्वे A^1 M^1

[३] ह्रस्वाप्रवृत्यर्थत्वात् V A^2 M^1 M^2 : ह्रस्वप्रवृत्त्यर्थत्वात् A^1

[४] तपरकरणेन A^1 : तपरत्वेन V A^2 M^1 M^2

[५] उ ऊदिति प्रश्लेषेण V M^2 : ऊदिति प्रश्लेषेण A^1 उ ऊदिति प्रश्लिष्य M^1 उ उदिति प्रश्लेषेण A^2

[६] अजुगूहदित्यर्थम् V A^1 M^2 : अजुगूहदित्याद्यर्थम् A^2 M^1

[७] बहिरङ्गतयाऽसिद्धत्वेन V M^1 M^2 : बहिरङ्गतया सिद्धत्वेन A^1 A^2

[८] बाधासम्भवः V A^2 M^1 M^2 : बाधसम्भवः A^1

[९] ०स्येतराविशे० A^1 A^2 M^1 : ०स्येतरविशे० V M^2

[१०] ०षणत्वे इत्यर्थः V A^1 M^2 : ०षणत्वेत्यर्थः A^2 M^1

उणादयोऽव्युत्पन्नानि प्रातिपदिकानि ॥ २२॥

[१]

स्फुटमेतत् इति[१]। पाणिनेस्त्वित्यादि ॥ २२ ॥

प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम् ॥ २३ ॥

[१]

देवादेरिति। ततश्च[२] सुपो[३] धातु...(2-4-71/650) इति लुगापत्तिरिति भावः। **शब्दस्वरूपमिति**। केचित्तु तदादेरित्यंशस्य विशेष्यतया[४] तदन्तविधिरित्याहुः।

[२]

अंशमात्रेति। तदन्तांशस्तु[५] नोपतिष्ठते। लेखग्रहणेन सामान्यत एव सप्तम्य-न्ततयोपात्ते[६] प्रत्यये तदन्तविध्यभावकल्पनात्[७]। तेन सुपि च (7-3-102/202) इत्यादौ न तदन्तविधिः[८]। तत्र तदाद्यंशोपस्थितिफलन्तु सुषूददेवदत्ताभ्याम्[९] इत्यादौ सात्पदाद्योः (8-3-111/2123) इति षत्वनिषेधाभावः कथञ्चित् फलं[१०] बोध्यम्। **एवमिति**। प्रत्ययग्रहणे चेति निषेधस्तु तदन्तांशमात्रस्येति[११] भावः।

---

[१] स्फुटमेतत् इति V M^2 : स्फुटमेतत् A^1 A^2 M^1

[२] ततश्च V A^1 A^2 M^2 : om M^1

[३] सुपो V A^2 M^1 M^2 : कृपो ० A^1

[४] विशेष्यतया V A^2 M^1 M^2 : विशेषणतया A^1

[५] तदन्तांशस्तु V A^1 M^1 M^2 : तदंशस्तु A^2

[६] ०न्ततयोपात्ते V A^1 A^2 M^2 : ०न्ततयोः प्राप्ते M^1

[७] ०न्तविध्यभावकल्पनात् V A^1 A^2 M^2 : ०न्तविधिकल्पनात् M^1

[८] न तदन्तविधिः V A^2 M^1 M^2 : तदन्तविधिः A^1

[९] सुषूददेवदत्ताभ्याम् V A^1 A^2 M^2 : सुदृषद्देवदत्ताभ्याम् M^1

[१०] षत्वनिषेधाभावः कथञ्चित् A^1: निषेधाभावः कथञ्चित् V A^2 M^1 M^2

[११] तदन्तांशमात्रस्येति V A^2 M^1 M^2 : तदंशमात्रस्येति A^1

एङन्तादिति। नन्वेवमपि[१] कतरदित्यादौ अतिप्रसङ्गस्तदवस्थः। तदादित्वस्य प्रत्ययावयवाकारान्तेऽपि[२] सत्वादिति चेन्न। तत्र तदादीत्यंशोपस्थिति[३]सामर्थ्येन सम्बुद्ध्यवयवाघटितस्यैव तदादेर्ग्रहणात्। अङ्गसंज्ञायां प्रत्ययावयवाघटितस्यैव तदादेः ग्रहणेनात्रापि तादृशस्यैव ग्रहीतुमुचितत्वाच्च [४]।

[३]

न विशिष्टात् इति। विशिष्टस्य तु अर्थवत् ...(1-2-45/178) सूत्रेण प्रातिपदिकत्वम्। समासग्रहणकृतनियमस्तु न[५]। राजपुरुषौ इत्यादौ पुरुषावित्यादेरिव गार्ग्यायणस्यानर्थकत्वेन अर्थवदन्तर्भावाभावात्[६]। नियमत्वस्य[७] सजातीयापेक्षत्वेन परस्परसमानाधिकरणवृत्तिद्वयाश्रयाघटित[८] एव प्रवृत्तेः । राज्ञः कुमारीं श्रित इति युगपत् वृत्तिद्वयकल्पनायामपि[९] प्रातिपदिकत्वं समुदायस्य सुलभम्। अत्र समासत्वप्रत्युक्तत्वमवयवस्य[१०] यद्यपि प्रातिपदिकत्वं कृत्तद्धित ...(1-2-46/179) सूत्रेणास्ति तथापि सुबुत्पत्तिः समुदायादेव।

---

[१] नन्वेवमपि V A^1 A^2 M^1 : न चेवमपि M^2

[२] प्रत्ययावयवाकारान्तेऽपि V A^2 M^1 M^2 : प्रत्ययावाकारान्तेऽपि A^1

[३] तदादीत्यंशोपस्थिति० V A^1 A^2 M^2 : तदाद्यंशोपस्थिति० M^1

[४] ग्रहीतुमुचितत्वाच्च A^2 M^1 : ग्रहीतुमुचितत्वात् V A^1 M^2

[५] समासग्रहणकृतनियमस्तु न V A^2 M^2 : समासकृतनियमस्तु न A^1 ०यमस्तु M^1

[६] इत्यादौ .....अर्थवदन्तर्भावाभावात् V M^2 : इत्यादौ .....अर्थवदुत्तरभागाभावात्। A^1 इत्यादौ .....अर्थवदुत्तरभाग्यभावात् A^2 इत्यादेरिव गार्ग्यायणस्यार्थवदुत्तरभागाभावात् M^1

[७] नियमत्वस्य A^2 : नियमस्य V A^1 M^1 M^2

[८] द्वयाश्रयाघटित V A^1 A^2 M^2 : द्वयाघटित M^1

[९] कल्पनायामपि A^2 M^1 : कल्पनयापि V A^1 M^2

[१०] समासत्वप्रत्युक्तत्वमव० V M^2 : समासत्वप्रयुक्तत्वमव० A^1 समासत्वप्रयुक्तमव० A^2 समासद्वयप्रयुक्तमव० M^1

एकाच् द्विर्वचनन्यायात्।[१] **प्रत्ययमात्र इति**[२]। तत्फलं तु[३] उगितश्च (4-1-6/455) इत्यस्य प्राची इत्यादौ प्रवृत्तिः। अन्यथा उगित् यस्माद्विहितः तदादेरेवा-भावात्। तत्र तदनापत्तिः। ननु प्रतीषिषतीत्य[४]त्राभ्यासान्त्यस्य अज्झन... (6-4-16/ 2614) इति दीर्घवारणायोत्तरखण्डे प्रत्ययत्वाभावस्य[५] शब्देन्दुशेखरे उक्तत्वेन सन्वत्वस्य[६] प्रत्ययाप्रत्ययसाधारण्येन[७] सनाद्यन्ता ... (3-1-32/2304) इत्यत्र कथमेतदुपस्थितिरिति चेन्न। प्रत्ययमात्रग्रहणे इत्यस्य प्रत्ययधातूभय-साधारणरूपग्रहणात्[८] इत्यर्थेनादोषात्।

यद्वा[९] सन्त्वस्य प्रत्ययाप्रत्ययसाधारण्येऽपि[१०] सनाद्यन्ता...(3-1-32/2304) इत्यत्र प्रत्ययाधिकारस्थस्यैव ग्रहणेनादोषात्[११]। वस्तुतः द्विर्वचने सन् प्रत्ययत्वादि[१२] समुदाये एव नोत्तरखण्डे[१३] इति सन्त्वं प्रत्ययमात्रवृत्ति। अत एव

---

[१] द्विर्वचनन्यायात् V A^2 M^2 : द्विर्वचनन्यायात्। केचित्तु राजपुरुषावित्यादौ पुरुषादेरेव नोक्तयोरेक-देशयोरवयवत्वमिति न A^1 परुषावित्यादेरिव नोक्तयोरेकदेशयोरर्थत्त्वमिति न कश्चिद्दोषः इत्याहुः M^1

[२] प्रत्ययमात्र इति A^2 M^1: प्रत्ययमात्रे इति V A^1 M^2

[३] तत्फलं तु V M^2 : तत्फलं A^1 A^2 M^1

[४] प्रतीषिषतीत्य० V A^1 A^2 M^1 : प्रतीषीषतीत्य० M^2

[५] प्रत्ययत्वाभावस्य V A^1 A^2 M^2 : अर्थाभावस्य M^1

[६] सन्वत्वस्य V A^2 M^2 : सन्त्वस्य A^1 M^1

[७] ०साधारण्येन V A^1 A^2 M^2 : ०साधारणत्वेन M^1

[८] प्रत्ययधातूभयसाधारणरूपग्रहणात् V M^2 : प्रत्ययधातूभयसाधारणरूपग्रहण A^1 A^2 om M^1

[९] यद्वा V A^1 A^2 M^2 : om M^1

[१०] प्रत्ययाप्रत्ययसाधारण्येऽपि V A^2 M^1 M^2 : उभयसाधारण्येऽपि A^1

[११] ग्रहणेनादोषात् V A^2 M^1 M^2 : ग्रहणेनादोषः A^1

[१२] सन् प्रत्ययत्वादि V M^2 : सन्वत्त्वप्रत्ययादि A^1 A^2 सन्त्त्वाव्ययत्वादि M^1

[१३] नोत्तरखण्डे V M^2 : उत्तरखण्डस्य A^1 नोत्तरखण्डस्य A^2 M^1

सुविनिर्दुर्भ्यः...(8-3-88/2477) इति सूत्रे कैयटेन विषुषुवुः[१] इत्यत्र समुदायस्यैव सुपित्वमुक्तम्[२]। दयतेः...(7-4-9/ 2388) इति सूत्रस्थं भाष्यं तु सागमकस्येव[३] साभ्यासस्य निर्द्दिश्यमानत्वाभावेन उत्तरखण्डस्यैव[४] तत्वेनोपपन्नम्। अत एव भ्रस्जोः...(6-4-47 भा०प०ख०द्वि०आ० पृ०310) इति सूत्रे भाष्ये बरीभृज्जते इत्यत्र[५] रीको रेफस्य लोपमाशङ्क्योपदेश इत्यनुवृत्त्या समाहितम्। अत एवोर्णुनुवतुः इत्यादौ द्वित्वे उवङ्। अनुषस्यन्द[६] इत्यत्र अनुविपर्यभिनिभ्य[७]...(8-3-72/2349) इति षत्वम्। धत्तः इत्यत्र दधस्तथोः...(8-2-38/2501) इति भष् भावः। प्रतीषिषति इत्यत्र अभ्यासस्य दीर्घाभावश्च सिद्धः[८]। स्थादिषु... (8-3-64/2277) इति सूत्रे नव्योक्तं सुनोत्याद्यवयवस्येव[९] तत्सम्बन्ध्यवयवस्यापि षष्ठ्यर्थत्वम्। यद्वात्र प्रकरणे तत्तद्धातोरिव तत्तदानुपूर्वीकस्यापि[१०] ग्रहणमित्यादि तु[११] स्वरूपव्याक्रियैव[१२]

---

[१] विषुषुवुः M^1: विषुषुयुः V विषुषुपुः A^1 A^2 विषषुयुः M^2

[२] समुदायस्यैव सुपित्वमुक्तम् V A^1 A^2 M^2 : समुदायस्येव सन्त्वमुक्तम् M^1

[३] सागमकस्येव V A^1 M^2 : सागमकस्यैव A^2 M^1

[४] उत्तरखण्डस्यैव V A^1 A^2 M^2 : उत्तरखण्डेऽस्यैव M^1

[५] बरीभृज्जते इत्यत्र V A^1 M^2 : बरीभृज्जत इत्यादौ A^2 M^1

[६] उवङ्। अनुषस्यन्द V M^2: उवङ्। अनुसस्यन्द० A^1 उवङ्। अनुसस्यद० A^2 उवङि अनुष्यन्दते M^1

[७] अनुविपर्यभिनिभ्य० V A^1 A^2 M^2 : अनुपर्यभिनिबिभ्य० M^1

[८] सिद्धः V A^1 A^2 M^2 : om M^1

[९] सुनोत्याद्यवयवस्येव V A^1: सुनोत्यावयवस्येव A^2 सुनोत्यावयत्वस्येव M^1 सुन्नोत्याद्यवयवस्येव M^2

[१०] तत्तद्धातोरिव तत्तदानुपू० V A^1 M^2 : तद्धातोरिव तदानुपू० A^2 तत्तद्धातोरिव तदानुपू० M^1

[११] ०मित्यादि तु V A^2 M^1 M^2 : ०मित्यादिक A^1

[१२] स्वरूपव्याक्रियैव V A^2 M^2 : स्वरूपव्याक्रिययैव । A^1 M^1

पराकृतम्। प्रतीषिषतीत्यत्रोत्तरखण्डेऽस्य[१] प्रत्ययाधिकारस्थत्वाभावे च[२] उत्तरखण्डस्य तनादिशेषे स्वोक्तं[३] धातुत्वमपि न स्यात्। भ्वादित्वाभावात्। ननु उत्तरखण्डस्य प्रत्ययत्वाद्यनङ्गीकारे[४] प्रतीषिषति इत्यत्र कथं सन्यतः (7-4-79/2317) इतीत्वमिति चेन्न। सन्यतः (7-4-79/2317) इत्यत्र सनीत्यस्य[५] निमित्तसप्तमीत्वेन सन्निमित्ताभ्यासस्येत्यर्थेनादोषात्। प्रत्ययाद्यसमभिव्याहारे तु अज्झन...(6-4-16/2614) इति दीर्घेण ईषिषतीत्येव साधु[६]। आटिटदित्यादौ णिलोपस्तु ण्यन्ताङ्गस्यान्त्यास्याल[७] इत्यर्थेन सुलभः। एवं च पूर्वं धातुः साधनेन इति सिद्धान्ते द्वित्वोत्तरं नेर्विशः (1-3-17 /2683) इत्यादीनां प्रवृत्तिः साधु सङ्गच्छत[८] इति दिक्॥ २३॥

प्रत्ययग्रहणे चापञ्चम्याः॥ २४॥

[१]

यत्रेति[९]। **अपञ्चम्या**...(परि०24) इति प्रसज्यप्रतिषेधः इति भावः। कार्यान्तर-

---

[१] प्रतीषिषतीत्यत्रोत्तरखण्डेऽस्य V M^2 : प्रतिषेषतीत्यत्रोत्तरखण्डेऽस्य A^1 प्रतीषिषतीत्यत्रोत्तरखण्डंऽस्य A^2 प्रतीषिषतीत्यत्रोत्तरखण्डऽस्य M^1

[२] प्रत्ययाधिकारस्थत्वाभावे च V M^2 : प्रत्ययाधिकाराभावे च A^1 प्रत्ययाधिकारत्वाभावेन A^2 प्रत्ययाधिकारत्वाभावे च M^1

[३] तनादिशेषे स्वोक्तं V A^1 M^2 : तनादिशेषोक्तं A^2 तनादिषु उक्तं M^1

[४] प्रत्ययत्वाद्यनङ्गीकारे V M^1 M^2 : प्रत्ययत्वानङ्गीकारे A^1 प्रत्ययधत्वानङ्गीकारे A^2

[५] सनीत्यस्य V A^2 M^2 : सनित्यस्य A^1 सनीत्यस्मिन् M^1

[६] ईषिषतीत्येव साधु V M^2 : ईषिषतीत्येव साधुः A^1 A^2 ईषिषतीत्याद्यसाधु M^1

[७] ०स्यान्त्यास्यालः V A^2 M^1 M^2 : ०स्यान्तस्यालः A^1

[८] साधु सङ्गच्छत A^1 A^2 M^1 : साधुः सङ्गच्छत V M^2

[९] **यत्रेति**। V A^1 A^2 M^2 : om M^1

विधानायेति स्वरूपकथनम्[१]। **धातुतकारस्येति**। धातोः परस्य प्रत्ययतकारस्य इत्यर्थः। निर्दिश्यमानस्येति परिभाषणात् [२]। स्वं रूपं[३]...(1-1-68/25) शास्त्रातिरिक्तसंज्ञाशास्त्रं विना उपस्थाप्यत्वं निर्दिश्यमानत्वमिति नात्र सोपतिष्ठते[४]। अत एव रदाभ्याम् ...(8-2-42 भा०ष०ख०द्वि०आ०पृ०116-117) इति सूत्रे भाष्ये रदाभ्यामिति किमर्थं चरितं मुदितम्। ननु रदाभ्याम् इत्युच्यमानेऽप्यत्र प्राप्नोति। न रदाभ्यां निष्ठा विशेष्यते[५] किं तर्हि तकारो विशेष्यते इत्युक्तम्। अन्यथा निर्दिश्यमाननिष्ठायाः रेफदकाराभ्यां[६] परत्वा-भावेनातिप्रसङ्गवारणेन[७] तदसङ्गतिः। सूत्रे अन्तग्रहणमप्युक्तार्थे[८] एव सफलं नान्यथेति दिक्। **एकविषयत्वमिति**। तदादितदन्तांशयोः सामानाधिकरण्येना-न्वये[९] इत्यर्थः।

---

[१] स्वरूपकथनम् V A^1 M^2 : स्वरूपकीर्त्तनम् A^2 स्वरूपकीर्त्तनपरम् M^1

[२] धातुतकारस्येति। धातोः परस्य प्रत्ययतकारस्येत्यर्थः। निर्दिश्यमानस्येति परिभाषणात् A^1 M^1 धातोः परस्य प्रत्ययकारस्येत्यर्थः। निर्दिश्यमानस्येति परिभाषणात् A^2 : धातुतकारस्येति V M^2

[३] स्वं रूपं V A^2 M^1 M^2 : om A^1

[४] स्वं रूपं.....नात्र सोपतिष्ठते। V M^2 : शास्त्रातिरिक्तसंज्ञाशास्त्र..... सात्र नोपतिष्ठते A^1 स्वं रूपं...इति शास्त्रा० A^2 M^1

[५] अत एव रदाभ्याम् ... विशेष्यते V M^2 : अत एव रदाभ्याम् ... रदाभ्यां निष्ठा न विशेष्यते A^1 अत एव रदाभ्याम् ...०तम्। ननु च रदाभ्याम् इत्युच्यमानेप्यत्र प्राप्नोति। न रेफदकाराभ्यां निष्ठा विशे ष्यते A^2 : jmp M^1

[६] रेफदकाराभ्यां A^2 M^1 : रेफदाभ्यां V A^1 M^2

[७] ०ङ्गवारणेन तद० V M^1 M^2 : ०ङ्गवारणेन तदसङ्गवारणेन तद० A^1 A^2

[८] सूत्रे अन्तग्रहणम० V M^2 : तत्र सूत्रे तग्रहणम० A^1 सूत्रे तग्रहणम० A^2 सूत्रे तद्ग्रहणम० M^1

[९] ०नान्वये इत्य०V M^2 : ०नान्वय इत्य० A^1 A^2 M^1

[२]

ननु स्यतासी…(3-1-33/2186) इत्यत्र धातोरित्यस्य[१] स्यतासिभ्यामेव अन्वयेन तयोश्चकार्यान्तरविधानायानाश्रयणात् तदन्तविधिः दुर्वारोऽत आह। **स्यतासीति**[२]। यद्वा अत्र धातोः इत्यस्य स्यतासिभ्यामेव अन्वयेन[३] लृलुटोः पञ्चम्यन्तात्परत्वेनाऽनाश्रयणात् तदन्तविधिर्दुर्वारोऽत आह **स्यतासीति**। **ङ्याब्भ्य**[४] **इत्यादाविति**। ङ्याबंशे[५] तदन्तविध्यनापत्तिरूपो दोष इत्यर्थः। विशेषणत्वाभावादिति शेषः[६]। **उत्तमैकाभ्यामिति**। सुपि च (7-3-102/202) इत्यस्य सुबन्त इत्यर्थे[७] तन्निर्देशासङ्गतिरिति भावः।

परे तु एवं सति घरूप… (6-3-43/985) इत्यत्रापि तदन्तविध्यभावोपपत्तौ उत्तरपदाधिकारे प्रत्ययग्रहण इत्युत्तर[८]परिभाषावैय्यर्थ्यम्। तस्मादयुक्त-मेतदित्याहुः॥ २४॥

उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणम्॥ २५॥

[१]

कुमारी ब्राह्मणिरूपेति[९]।

---

[१] धातोरित्यस्य V A^1 M^1 M^2 : om A^2

[२] स्यतासीति V A^1 M^1 M^2 : स्यतासीतीति A^2

[३] तयो..... अन्वयेन लृलुटोः V A^2 M^2 : om A^1 तयो..... अन्वयेन om M^1

[४] ङ्याब्भ्यः V A^1 A^2 M^2 : हल्ङ्याब्भ्य M^1

[५] ङ्याबंशे तद० V A^1 A^2 M^2 : ङ्याबंशे न तद० M^1

[६] शेषः V M^1 M^2 : ङ्याबंश इति शेषः A^1 A^2

[७] इत्यर्थेतन्नि० V A^1 M^2 : इत्यर्थे एतन्नि० A^2 M^1

[८] प्रत्ययग्रहण इत्युत्तर० A^2 : प्रत्ययग्रहणम् इत्युत्तर० VM^2 प्रत्ययेत्युत्तर० A^1 प्रत्ययग्रहणे उत्तर० M^1

[९] ब्राह्मणिरूपेति A^2 M^1: ब्राह्मणीरूपेति V A^1 M^2 ब्राह्मणिरूपेति A^2 M^1

स्थिति[१]प्रदर्शनमेतत्। अन्यथा पुंवद्भावेनोक्तरूपस्य दुर्लभत्वात्।

[२]

उत्तरपदेति। परे तु लेखग्रहणेन सप्तम्यन्ततया प्रत्ययग्रहणे न तदन्तग्रहणम्[२] इत्येव ज्ञाप्यते[३]। उत्तरपदाधिकार इति[४] विशेषणे प्रयोजनाभावात्। तेन सुपि च (7-3-102/202) इत्यादौ न दोषः। रात्रेः कृति... (6-3-72/1008) उपसर्गस्य घञि....(6-3-122/1044) इत्यादौ[५] तु सामर्थ्यात्तदन्तविधिः इत्याहुः[६] ॥ २५॥

स्त्रीप्रत्यये चानुपसर्जने न ॥ २६ ॥

[१]

इत्यत्रेवेति। पुस्तकान्तरे एतदग्रे इत्याशय इति पाठस्तत्सिद्ध्यर्थं तदन्तविधिद्वयस्वीकार इति शेषः। केचित्तु **स्त्रीप्रत्यये** तदादिनियमो न । उपसर्जने तु सोऽस्ति इत्यंशद्वयवती परिभाषा। तत्रोत्तरांशस्येदमव-तरणमित्याहुः[७] ॥ २६ ॥

सञ्ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति ॥ २७ ॥

---

[१] स्थिति० A^1 M^1 : स्थित० V A^2 M^2

[२] लेखग्रहणेन सप्तम्यन्ततया प्रत्ययग्रहणे न तदन्तग्रहणम् V A^2 M^1 M^2 : लेखग्रहणेन तदन्तग्रहणम् A^1

[३] ज्ञाप्यते V A^2 M^1 M^2 : सप्तम्यन्ततया प्रत्ययग्रहणेन तदन्तग्रहणमित्येव ज्ञाप्यते A^1

[४] ०धिकारे इति M^1 : ०धिकार इति V A^1 M^2 ०धिक इति A^2

[५] घञीत्यादौ तु V M^2 : घत्रीत्यादौ तु A^2 घञ् इत्यादौ A^1 M^1

[६] विधिरित्याहुः V A^1 M^2 : विधिरिति प्राहुः A^2 M^1

[७] **इत्यत्रेवेति**। पुस्तकान्तरे ..... मवतरणमित्याहुः V M^2 : jmp A^1 A^2 M^1

कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ॥ २८ ॥

[१]

पदात्परत्वाभावेन[१] **चेति।** पदात् ...(8-1-17/402) इत्यस्य कुत्सने च[२](8-1-69/3976) सुपि...(7-3-102/202) इत्यतः प्रागेव[३] निवृत्तेरयुक्तमेतत्।

[२]

कृत्स्वरेणेति। नन्वनन्तरग्रहण[४]स्योदोऽपूर्वपदत्वेऽपि[५] स्वरार्थत्वे उक्तपरिभाषाज्ञापकत्वासम्भवेन[६] तस्या एवाभावे[७] कथमेतत्। उद्धृतशब्दस्याकृतदन्तत्वात्[८]। न च वनोर च (4-1-7/456) इत्यादाविव तदन्तविधिद्वयाङ्गीकारादेतदुपपत्तिरिति[९] वाच्यम्। एवमेवोपपत्तौ उक्तपरिभाषावैयर्थ्यापत्तेः[१०]। गतिकारकेतरपूर्वस्यापि[११] स्वरापत्तेश्चेति चेन्न। गतिरित्यस्यैव अनुवृत्त्या[१२]

---

[१] ०भावेन V A^2 M^1 M^2 : ०भावेनेति A^1

[२] कुत्सने च A^1: कुत्स्ने च V A^2 M^2 कृत्स्ने च M^1

[३] प्रागेव A^1 A^2 M^1 : प्राग् V M^2

[४] नन्वनन्तरग्रहण० V A^2 M^1 M^2 : नन्वन्तरग्रहण० A^1

[५] ०स्योदोऽपूर्वपदत्वेऽपि V M^2 : ०स्योदोः पूर्वपदत्वेऽपि A^1 ०स्योदो पूर्व पदत्वेऽपि A^2 ०स्योदः पूर्वपदत्वेऽपि M^1

[६] ०ज्ञापकत्वासम्भवेन V A^1 A^2 M^2 : ०ज्ञापकत्वसम्भवेन M^1

[७] एवाभावे V M^2 : एवाद्याप्यभावे A^1 A^2 : एवाद्याप्यभावेन M^1

[८] उद्धृतशब्दस्याकृतदन्तत्वात् V M^2 : उद्धृतशब्दस्याकृदन्तत्वात् A^1 उधृतशब्दस्याकृदत्वात् A^2 उद्धृतशब्दस्य कृदन्तत्वात् M^1

[९] ०कारादेतदुपपत्तिरिति V A^1 A^2 M^2 : ०कारादेव तदुपपत्तिरिति M^1

[१०] ०षावैयर्थ्यापत्तेः V A^1 A^2 M^2 : ०षायाः वैयर्थ्यापत्तेः M^1

[११] पूर्वस्यापि V A^1 A^2 M^2 : पूर्वपदस्यापि M^1

[१२] गतिरित्यस्यैवानुवृत्त्या V A^1 M^2 : गतिरित्यस्यैवावृत्त्या A^2 M^1

पुनर्विधानेनोदो पूर्वपदत्वेऽपि स्वरसिध्यानन्तरग्रहणस्य[१] व्यवहित-व्यावृत्त्यर्थत्वे निश्चिते[२] तेनोक्तपरिभाषायां ज्ञापितायां तामङ्गीकृत्यैव[३] कृत्स्वरे-णोदातत्त्वस्य साधनात्। यद्वाऽनन्तरग्रहणस्य प्राचीनपठितोक्तपरि-भाषा[४]ज्ञापनपूर्वकं कारकादेव परमित्युक्तनियमेनाभ्युद्धृतमित्यादौ उदः स्वरप्र-योजनकत्वे[५] अनेकप्रयोजनकत्वसिद्ध्या तत्परित्यागेन अपूर्वपदस्वरमात्रप्र-योजकत्व[६]स्यान्याय्यत्वेन पूर्वकल्पस्यैवाश्रयणम् इत्याशयः। अथवानन्तर-ग्रहणेन परिभाषायां ज्ञापितायाम् अभ्युद्धृतमित्यत्रोदः स्वरश्रवणसिद्धेः। कारकादिति योगविभागेनापि सम्भवः इत्याशयात्[७]। अपूर्वपदत्वेऽपि स्वरप्रवृत्तिरूप-फलस्य परिभाषाज्ञापनोत्तरकालिकेन कारकादिति योगविभागेन सिद्ध्या[८] अनन्तरग्रहणफलत्वाभावनिश्चयात्। ज्ञापनोत्तरं स्वस्मिन् चारितार्थ्यमात्रेण ज्ञापकत्वसम्भवात्। तदेतदभिप्रेत्य वक्ष्यति व्यवहितनिवृत्त्यर्थमेवेति[९]। । **परत्वादिति।** उत्कृष्टत्वादपवादत्वादिति यावत्। यद्वा कृद्ग्रहण...(परि० 28) परिभाषायाः अवकाशः व्यावलेखी व्यावचर्चि इति[१०] णचः स्त्रियाम् ...(5-4-14/3216) इति

---

[१] स्वरसिध्यानन्तरग्रहणस्य V A^1 A^2 M^2 : स्वरसिद्ध्यानन्तरग्रहणस्य M^1

[२] निश्चिते V A^1 A^2 M^2 : आश्रिते M^1

[३] तामङ्गीकृत्यैव A^2 M^1 : तामङ्गीकृत्य V A^1 M^2

[४] प्रचीनपठितोक्तपरिभाषा० A^2 : प्राचीनपरिभाषा० V A^1 M^1 M^2

[५] स्वरप्रयोजनकत्वे V A^1 M^2 : स्वरप्रयोजकत्वे A^2 M^1

[६] मात्रप्रयोजकत्व० V A^1 M^2 : मात्रप्रयोजनकत्व० A^2 M^1

[७] इत्याशयात् A^1 : इत्याशयः V M^2 A^{2*} M^{1*}

[८] सिद्ध्या० A^1: सिध्या० V M^2 A^{2*} M^{1*}

[९] अथवानन्तरग्रहणेन परिभाषायां ..... निवृत्यर्थमेवेति V A^1 M^2 : om A^2 M^1

[१०] व्यावलेखी व्यावचर्चीति V M^2 :व्यावलेखिA^1 व्यावलेखी व्यावचीति A^2 व्यावक्रोशी,व्यावहासीति M^1

गतिपूर्वस्यापि[१] णजन्तत्वात् अजि[२] सति वृद्धिस्वरौ भवतः। अत्र हि प्रत्ययग्रहणपरिभाषा स्त्रीप्रत्यये च अनुपसर्जने नेति[३] (परि०23) निषेधान्नोप तिष्ठते। न च अत्र कृद्ग्रहणपरिभाषायाः फलाभावः अधिक-व्यवच्छेदार्थत्वात्। स्पष्टं चेदं समासेऽनञ् पूर्व ...(7-1-37/3332) इति सूत्रे भाष्यकैयटयोः ।

[३]

अत एवेति। उक्तार्थकरणादेवेत्यर्थः[४]। **परिभाषाभ्यामिति**। ननु गतिकारकोप-पदानामित्यस्य किमत्र कृत्यमिति चेन्न। संपूर्वात् कूटेरभिविधौ भाव इनुणि-त्यनेन इ नुणि[५] कूटिन्नित्यस्मात्प्राप्तसमासार्थविभक्तिं बाधित्वा स्वार्थिकत्वेन अन्तरङ्गत्वात् । अणिनुण इत्यनेन अण् प्रत्यये उकारस्य[६] वृद्ध्यापत्तिः प्राक्सुबुत्पत्तेः[७]। समासे[८] अन्तरङ्गत्वात् पूर्वं समासः। अण् प्रत्ययो हि[९] प्रातिपदिकविशेषापेक्षत्वाद् बहिरङ्गः। अत्र[१०] संकूटिन्नित्यस्मात्समासप्रातिपदिकादण् प्रत्यये सतीष्टं

---

[१] गतिपूर्वस्यापि V A^1 M^2 : पूर्वस्यापि A^2 गतिकारकपूर्वपदस्यापि M^1

[२] अजि A^2 M^1 : अत्र V A^1 M^2

[३] अनुपसर्जने नेति V A^1 M^2 : अनुपसर्जनेति A^2 M^1

[४] अत एवेति। उक्तार्थकरणादेवेत्यर्थः V A^1 M^1 M^2 : om A^2

[५] इ नुणित्यनेन इ नुणि V A^1 M^2 : इति नुणि A^2 इ नुणि M^1

[६] ऊकारस्य A^2 : उकारस्य V A^1 M^1 M^2

[७] प्राक्सुबुत्पत्तेः A^1 A^2 M^1 : प्राक्सुतुत्यतेः V M^2

[८] समासे V A^1 M^2 : समासे तु A^2 M^1

[९] प्रत्ययो हि V A^1 A^2 M^2 : प्रत्ययो वा M^1

[१०] अत्र V : तत्र A^1 A^2 M^2 om M^1

सिद्ध्यति। **अन्यथेति।** उक्तार्थमनङ्गीकृत्य गत्यादिसमवधानेऽपि केवलस्य ग्रहणे।

[४]

केवलस्य क्तान्तत्वेनेति[१] । ननु[२] गतिरनन्तरः (6-2-49/3783) इत्यत्रोक्तपरिभाषया गत्यादिपूर्वकस्यैव ग्रहणे सूत्रस्योक्तिसम्भवाभावः। गतेः क्तान्तपरत्वासम्भवात्[३]। सामर्थ्यादुक्तपरिभाषायाः अप्रवृत्तौ अभ्युद्धृतमित्यादौ[४] अभेः केवलक्तान्तपरत्वाभावात् एव स्वराप्रवृत्तौ ज्ञापितायामपि[५] अनन्तरग्रहणवैयर्थ्यम्[६] इति चेन्न। यस्य गतेः प्रकृतिस्वरः कार्यः[७] तस्यैव सामर्थ्येन क्तान्ताप्रवे[८]शकल्पनात्। ननु कृद्ग्रहणे गतिपूर्वस्य[९] ग्रहणं (परि० 28) ज्ञाप्यताम्। कारकपूर्वस्य कथं[१०] ज्ञाप्यते । उच्यते -- एकदेशानुमत्या[११]

---

[१] ०न्तत्वेनेति V A^1 A^2 M^2 : ०न्तत्वेति M^1

[२] ननु गति० V A^1 M^2 : परे तु सुखप्राप्त इत्यादौ प्रकृतिस्वराप्रवृत्तये हीनवाचिनि समासे क्तान्ते परे द्वितीयान्ते प्रकृत्येयर्थके हीन इति सूत्रेऽनुपसर्ग इति वक्तव्यमिति वार्त्तिकमस्यां कारकांशे गतिरनन्तरः इत्यत्रानुवर्तमानमनुपसर्ग इति गत्यंशे ज्ञापकम्। एवं च नव्यस्येवनमये स्थालीपुलाकन्यायाश्रयणे क्लेशः। ननु गति० A^2 M^1

[३] ०त्वासम्भवात् V A^1 A^2 M^2 : ०त्वाभावात् M^1

[४] अभ्युद्धृतमित्यादौ V A^1 A^2 M^2: अभ्युदयधृतमित्यादौ M^1

[५] ज्ञापितायामपि A^1 : ज्ञापितेऽपि V A^2 M^1 M^2

[६] णवैयर्थ्यम् V A^1 A^2 M^2 : ०णवैयर्थ्यापत्तेः M^1

[७] स्वरः कार्यः A^1 A^2 : स्वरकार्यः V M^2 स्वराः कार्याः M^1

[८] क्तान्ताप्रवे० V A^2 M^1 M^2 : क्तान्तप्रवे० A^1

[९] गतिपूर्वस्य V A^2 M^2 : गतिकारकपूर्व A^1 गतिपूर्वस्यैव M^1

[१०] कारकपूर्वस्य कथं V M^2 : कथं कारपूर्वस्य ग्रहणं A^1 कारकपूर्वस्य तु कथं A^2 कारकपूर्वपदस्य तु कथं M^1

[११] एकदेशानुमत्या V A^2 M^1 M^2 : एकदेशानुमित्या A^1

प्राचीनपठितपरिभाषाज्ञापनात्। यद्वा हीने (1-4-86 /550) इति[१] सूत्रेऽनुपसर्गग्रहणं ज्ञापकम्। ननु ज्ञापितेऽपि न चारितार्थ्यम्। अभ्युद्धृतमित्यादौ परत्वात् गतिर्गतौ ? इत्यस्यैव प्रवृत्तेरिति चेन्न। क्वचित् पूर्वविप्रतिषेधाश्रयणस्याप्यनेन ज्ञापनात्। इयं गतिरनन्तरः (6-2-49/3783) इति सूत्रे भाष्ये स्पष्टा[२] ॥ २८ ॥

पदाङ्गाधिकारे तस्य च तदन्तस्य च ॥ २९ ॥

[१]

अत एवेति। परमातिमहानित्यादौ दीर्घस्येष्टत्वादेव इत्यर्थः ॥ २९ ॥

व्यपदेशिवदेकस्मिन् ॥ ३० ॥

[१]

अस्यापत्यमिति। तस्य चेति[३] पाठमनाश्रित्येदम्[४]। एतदाश्रयणे[५] तु कुरुत इत्यादि[६]-बोध्यम्। **तेन तुल्यमिति**। आर्थिकार्थकथनमेतत्[७]। वतिस्तु[८] सप्तम्यन्तात्।

---

[१] हीने इति VM^2 : कारकांशेनैव हीने इति A^1 कारकांशे हीने इति A^2 कारकांशे हीने द्वितीया इति M^1

[२] ननु ज्ञापितेऽपि न चारितार्थ्यम्। अभ्युद्धृतमित्यादौ परत्वात् गतिर्गतौ ? इत्यस्यैव प्रवृत्तेरिति चेन्न। क्वचित् पूर्वविप्रतिषेधाश्रयण स्याप्यनेन ज्ञापनात्। इयं गतिरनन्तरः इति सूत्रे भाष्ये स्पष्टा A^1: इयं गतिरनन्तरः इति सूत्रे भाष्ये स्पष्टा V M^1 M^2 ननु ज्ञापितेऽपि न चारितार्थ्यम्। अभ्युद्धृतमित्यादौ परत्वात् गतिर्गतौ ? इत्यस्यैव प्रवृत्तेरिति चेन्न। क्वचित् पूर्वविप्रतिषेधाश्रयणस्याप्यनेन ज्ञापनात्। इयं गतिर्ण ग्रहणे उक्तन्यायाप्रवृत्तेरनन्तरः इति सूत्रे भाष्ये स्पष्टा A^2

[३] तस्य चेति A^1 A^2 : तस्य त्वेति V M^2 स्वस्य चेति M^1

[४] पाठमनाश्रित्येदम् V A^1 M^2 : पाठ्यमित्यनाश्रित्येदम् A^2 M^1

[५] एतदाश्रयणे M^1 : तदाश्रयणे V A^1 A^2 M^2

[६] इत्यादि V A^2 M^1 M^2 : इति A^1

[७] आर्थिकार्थकथनमेतत् V A^1 M^2 : आर्थिकार्थप्रदर्शनमेतत् A^2 M^1

[८] वतिस्तु V A^1 A^2 M^2 : वस्तुतः M^1

उपमेये सप्तमीदर्शनात्।

[२]

हरिष्विति। ननु हरी इत्यादौ ईदन्तत्वव्यपदेशभावः[१] स्वसमुदायस्य सत्त्वेन ससहायत्वात्कथमत्र[२] सः। द्विवचनत्वसमानाधिकरणमीदन्तत्वं[३] न मुख्यम-न्यत्रेति चेत् **हरिष्वि**त्यत्रापि[४] सुप्त्वसमानाधिकरणं[५] सुबन्तत्वमपि मुख्यं नान्यत्रेति तुल्यम्। अथ द्विवचनवत् सुब्वि[६]शेष्यतया न उपात्त इति चेत् तथापि भवतीत्यादौ भू इत्यस्य कथमङ्गत्वम्[७]। अङ्गसंज्ञायां सामान्यतः प्रत्ययः इत्युक्तत्वेन तिपोऽपि ग्रहणसम्भवेन तमादाय[८] मुख्यतदादित्व[९]सम्भवेन ससहायत्वात्। अथ प्रत्ययपदेन शपो ग्रहणे असहायत्वमिति[१०] चेत् अत्रापि शब्दस्वरूपविशेष्येण सुप एव ग्रहणेऽसाहायत्वमिति चेन्न[११]। शब्दस्वरूपस्य समुदायावयवसाधारण्येन तद्विशिष्टस्य सुबन्तस्य[१२]

---

[१] ईदन्तत्वव्यपदेशभावः V M^2 : ईदन्तत्वव्यपदेशभाजस्समुदायस्य A^1 A^2 इदन्तत्वव्यपदेशीवद्भावात् M^1

[२] ससहायत्वात्कथमत्र सः V M^2 : सत्त्वात् कथमत्र सः A^1 ससहायत्वात्कथं सः A^2 M^1

[३] द्विवचनत्वसमानाधिकरणमीदन्तत्वम् V A^1 A^2 M^2 : द्विवचनसमानाधिकरणमीदन्तत्वम् M^1

[४] हरिष्वित्यत्रापि V A^1 A^2 M^2 : हरिष्वित्यादावपि M^1

[५] ०समानाधिकरणं V A^2 M^1M^2 : ०समाधिकरणं A^1

[६] ०ब्वि ० ego : प्वि V A^1 A^2 M^1M^2

[७] भू इत्यस्य कथमङ्गत्वम् V M^2 : कथं भू इत्यस्याङ्गत्वम् A^1 A^2 M^1

[८] तमादाय V A^2 M^1 M^2 : तदादाय A^1

[९] मुख्यतदादित्व० M^1 : मुख्यतदादि० V A^1 A^2 M^2

[१०] असहायत्वमिति V M^2 : सहायत्वमेवेति A^1 असहायत्वमेवेति A^2 M^1

[११] अत्रापि....चेन्न V M^2 : अत्रापि शब्दस्वरूपमितिवि ..... ०सहायत्वमिति चेन्न A^1 अत्रापि शब्दस्वरूपमितिवि..... हायत्वमे वेति चेन्न A^2 om M^1

[१२] सुबन्तस्य V A^2 M^1 M^2 : सुबन्तत्वस्य A^1

सत्त्वेन[१] ससहायत्वात्। प्रत्ययत्वस्य तु प्रत्येकं पर्याप्ततया तत्तद्व्यक्तेरेव[२] ग्राह्यतया[३] शपो ग्रहणे[४] असाहायत्वमिति वैषम्यात्। **कार्यकालपक्षेति।** यथोद्देशे तु स्थानिवत्त्वेनैव प्रातिपदिकत्वसिद्धिरिति भावः। इदम् उपलक्षणम्। इ शब्दात् यञि ञोश्च (4-1-101/1103) इति फक्सिद्धिश्चेति[५] बोध्यम्।

[३]

शिलापुत्रकस्येति[६] वर्तुला दृषत् अनेन च अतिदेशेनाधाराधेयभाव-अवयव-त्वतद्व्याप्या एव धर्मा[७] अतिदिश्यन्ते नान्येति[८]। तेन प्रस्तनय्येत्यादौ[९] अल्लोपस्यासि-द्धत्वात्। ल्यपि लघुपूर्वात् (6-4-56/3336) इति अय् न स्यात्[१०] इत्यर्थकेन असिद्धवत् (6-4-22भा०प०ख०द्वि०आ०पृ०294) सूत्रस्थभाष्येण न विरोधः। लोके[११] अदर्शनेन पूर्वोच्चारितत्वस्यानतिदेशात्।

---

[१] सत्त्वेन V M^2 : सत्त्वे A^2 om A^1 M^1

[२] तत्तद्व्यक्तेरेव V A^2 M^2 : तद्युक्तेरेव A^1 तद्व्यक्तेरेव M^1

[३] ग्राह्यतया V A^2 M^2 : शपो ग्रहणाय A^1 ग्रहणतया M^1

[४] ग्रहणे V M^1 M^2 : ग्रहणायाशपो ग्रहणे A^1 अग्रहणे A^2

[५] फक्सिद्धिश्चेति V M^2 : फक्सिद्धेश्चेत्यपि A^1 A^2 फक्सिद्धिरित्यपि M^1

[६] शिलापुत्रकस्येति V A^2 M^1 M^2 : शिलापुत्रस्येति A^1

[७] अतिदेश.....धर्माः V A^2 M^2 : अतिदेशेनाधाराधेयभावस्य तद्व्यप्यधर्माः A^1 अतिदेशेनाधाराधेयभा-वापन्न तत्तद्व्याप्यधर्माः M^1

[८] अतिदिश्यन्ते नान्येति V M^2 : निर्दिश्यन्ते नान्ये A^1 A^2 om M^1

[९] प्रस्तनय्येत्यादौ V A^2 M^1 : प्रशमय्येत्यादौ A^1 प्रस्तेनय्येत्यादौ M^2

[१०] ल्यपि लघुपूर्वात् इति अय् न स्यात् V M^2 : लोपो न स्यात् A^1 ल्यप् न स्यात् A^2 ल्यपि न स्यात् M^1

[११] लोके V A^2 M^1 M^2 : लोको A^1

[४]

अपर्यालोचनयेति। परे तु धात्ववयवस्यैकाचः[१] प्रथमस्य द्वे स्तः इति[२] हि द्वित्वविधावुपात्तम्। तत्र निजौ[३] नैतत् त्रितयोपेतं[४] किञ्चिदित्यसहायतैव[५]। यथा[६] हरी इत्यादौ ईदन्तत्वद्विवचनाभावेन[७] सा । तथा च[८] निजिति समुदायस्य एकाच्त्वेऽपि न धात्ववयवत्वम् इकारस्य। धात्ववयवत्वेऽपि नैकाच्त्वम्। स निशब्दे इज् शब्दे तयोः सतोरपि न प्रथमत्वमित्यसहायता सुस्थैवेत्याहुः॥ ३०॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्ति॥ ३१॥

[१]

अत एवेति। प्रत्ययांशानुवादकत्वादेवेत्यर्थः[९]।

[२]

तत्तद्रूपेणेति[१०]। उगिद्वर्णान्यरूपेणेत्यर्थः। **तेनावृद्धाभ्यः**...(4-1-113/1116)

---

[१] धात्ववयवस्यैकाचः V A^1 A^2 M^2 : धात्ववयवस्यैवैकाचः M^1

[२] प्रथमस्य द्वे स्तः इति V A^1 M^2 : प्रथमस्येति A^2 प्रथमस्येति वा M^1

[३] निजौ V A^1 M^1 M^2 : निजो A^2

[४] त्रितयोपेतम् V A^1 A^2 M^2 : त्रितयोपात्तम् M^1

[५] ०सहायतैव V A^2 M^2 : ०सहायतयैव A^1 M^1

[६] यथा V A^1 A^2 M^2 : तथा M^1

[७] ईदन्तत्वद्विवचनाभावेन V A^1 M^1 M^2 : ईदन्तद्विवचनाभावेन A^2

[८] च V A^1 A^2 M^2 : om M^1

[९] प्रत्ययांशानुवादकत्वादेवेत्यर्थः A^2 M^1 : प्रत्ययांशानुवादत्वादेवेत्यर्थः V A^1 M^2

[१०] तत्तद्रूपेणेति A^2 M^1 : तद्रूपेणेति V A^1 M^2

ऋष्यन्धक...(4-1-114/1117) इत्यादौ न तदन्तविधिः ॥३१॥

व्यपदेशिवद्भावोऽप्रातिपदिकेन ॥ ३२ ॥

[१]

चरितार्थम् इति। मटः प्रत्ययत्वमाश्रित्येदम्।[१] **तेनाहन्निति।** वस्तुतः सूत्रोपात्तान्तादिशब्द एवैषा। अन्यथा रोणी (4-2-78/1290) इत्यादीनां वनो र च (4-1-7/456) इत्यादीनां च केवले अप्रवृत्त्यापत्तेः। एतदर्थं तदन्तविधिसूत्रे[२] तस्य चेति पाठे गौरवम्[३]। निष्कृष्यैकार्थीभावाद्यभावेऽपि तद्धितस्त्रीप्रत्यययोः प्रवृत्त्या अजकरोणे तथा पाठे अवयवादपि तद्धितापत्तिश्चेति केचिदिति दिक्[४] ॥ ३२ ॥

यस्मिन्विधिस्तदादावल्ग्रहणे ॥ ३३ ॥

[१]

अपवाद इयमिति[५]**।** तेन सामानाधिकरण्येन[६] विशेषणविशेष्यभाव एवैषा। तेन **इषुगमि**...(7-3-77 भा० ष० ख० द्वि० आ०पृ०216) इत्यत्र एतदप्रवृत्त्या[७] इषाणेत्यत्र न छत्वम्।

---

[१] ०त्येदम् A^1 A^2 M^1: ०त्येदम् ।

पतितेषु द्विजातीषु प्रविशत्यन्ततोधरः।

संप्रविष्टेषु तदनु जायते वर्णसङ्करः ॥१॥ V M^2

[२] तदन्तविधिसूत्रे M^1: तदन्तविधौ V A^1 A^2 M^2

[३] गौरवं च M^1: गौरवम्। V A^1 A^2 M^2

[४] तद्धितापत्तिश्चेति केचिदिति दिक् M^1 : तद्धितापत्तिश्चेति दिक् V A^1 A^2 M^2

[५] अपवाद इयमिति A^2 : अपवादोऽयमिति V A^1 M^1 M^2

[६] सामानाधिकरण्येन A^1 A^2 : समानाधिकरण्येन V M^2 समानाधिकरण्येन तत् M^1

[७] इत्यत्र एतदप्रवृत्त्या V A^1 M^1 M^2 : इत्यत्रैव तदप्रवृत्त्या A^2

वाचनिकीति[१]। यत्तु न ल्यपि (6-4-69/3335) इति ज्ञापकसिद्धैषेति पाठकेनोक्तम्[२]। तन्न। प्रदाय छत्रमित्यत्र[३] तुकि ईत्ववारणार्थत्वात्[४]। न च बहिरङ्गत्वेन तुकोऽसिद्धत्वम्। नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः (परि० 51) इति[५] निषेधात्। **स्वरूपसतीति**[६]। न तु तदर्थोऽपीत्यर्थः।

[२]

निरूपितमिति। तत्र हि एवमुक्तम्। वलादेरित्यनुवृत्तविशेषणं वल्पदार्थस्य[७] तकारेण विशेषणात्। तकाररूपवलादेरित्यर्थ इति। परे तु आदिग्रहणाभावे वलि परे आर्धधातुकस्येड्[८] ...(7-2-35/ 2184) इत्यर्थापत्तिः। विजातीय-विभक्त्युच्चारणे वैयधिकरण्येनान्वयस्यौत्सर्गिकत्वात् । तीषसह...(7-2-48/2340) इत्यादौ रुषरिष इति पञ्चम्या[९] तीति सप्तम्याः[१०] षष्ठ्यर्थनिर्णयेन रावणं तृणाय मेने[११] श्रीराम इत्यादाविव सामानाधिकरण्येनान्वयः। **ती** इत्यस्य

---

[१] वाचनिकीति A^2 : वाचनिकेति V A^1 M^1 M^2

[२] ज्ञापकसिद्धैषेति पाठकेनोक्तम्। V A^1 A^2 M^2 : ज्ञापकं पाठकेनोक्तमिति M^1

[३] प्रदाय छत्रमित्यादौ A^2 : प्रदायच्छत्रमित्यत्र V M^1 M^2 प्रदायच्छत्रमित्यादौ A^1

[४] तुकि ईत्ववारणार्थत्वात् A^2 : तुकि इत्ववारणार्थत्वात् V A^1 M^2 तुग्वारणार्थत्वात् M^1

[५] नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः इति V A^1 M^2 : नाजानन्तर्ये A^2 M^1

[६] स्वरूपसतीति A^2 M^1 : स्वरूपे सतीति V A^1 M^2

[७] ०नुवृत्तविशेषणं वल्पदार्थस्य V A^1 A^2 M^2 : ०नुवृत्त्या विशेषणवल्पदार्थस्य M^1

[८] आर्धधातुकस्येड् V A^1 A^2 : आर्द्धधातुकस्येड् M^1 M^2

[९] पञ्चम्या A^2 M^1 : पञ्चम्यां V A^1 M^2

[१०] सप्तम्याः A^2 : सप्तम्या V A^1 M^1 M^2

[११] तृणाय मेने A^2 M^1 : तृणाय मन्ये V A^1 M^2

वलि[१] विशेषणत्वं तु अयुक्तमिति स्पष्टमेव। ङःसि...(8-3-29/131) इत्यादौ तु सीत्यस्य पदस्य (8-1-16/401) इत्यनेन सामानाधिकरण्येनान्वये त्वदुक्तरीत्या तदादिविध्यभावेऽपि[२] तदन्त[३]विध्यापत्त्यानिष्टप्रसङ्गेन तद्वारणाय न लोप...(8-2-7भा०ष०ख०प्र०आ०पृ०97) सूत्रे भाष्योक्तस्यौत्सर्गिकस्य पदस्य इत्यस्य[४] वैयधिकरण्येनान्वयस्वीकारे तत एव तदादिविधेरभावेन[५] अदोषादित्याहुः ॥ ३३॥

सर्वो द्वन्द्वो विभाषैकवद्भवति ॥ ३४ ॥

[१]

तद्धि इति।[६] द्वन्द्वश्च...(2-4-2/906) इत्यत्रैषामेव समाहार इति नियमे एकवचनस्य[७] दौर्लभ्यात्तद्वैयर्थ्यमिति भावः। तदेतद्वक्ष्यति[८]। **अत एव द्वन्द्वश्चेति।**[९] द्विवचनव्यावृत्त्यर्थं तु न तत्। तिष्यः एकातारा। पुनर्वसूद्वन्द्वेतारे[१०] इत्याकरात्।

---

[१] वलि V A^1 M^1 M^2 : वल् A^2

[२] तदादिविध्यभावेऽपि A^2 M^1 : तदादिविधिभावेऽपि V A^1 M^2

[३] तदन्त A^2 M^1 : तदन्ते V A^1 M^2

[४] इत्यस्य V A^1 M^1 M^2 : om A^2

[५] तदादिविधेरभावेन V A^1 M^1 M^2 : तदादिविधेरण्यभावेन A^2

[६] तद्धि इति V A^1 A^2 M^1 M^2 : तद्धिद इति A^1

[७] एकवचनस्य V A^1 A^2 M^2 : समाहारस्य M^1

[८] तदेतद्वक्ष्यति V A^1 M^1 M^2 : तदेत्तद्वक्ष्यति A^2

[९] अत एव द्वन्द्वश्चेति V A^1 A^2 M^2 : द्वन्द्वश्चेति अत एव M^1

[१०] पुनर्वसूद्वन्द्वेतारे V A^1 M^2 : पुनर्वसुर्द्वेतारे A^2 पुनर्वसूद्वेतारे M^1

[२]

तद्वैकल्पिकत्वस्येति[१]। केचित्तु **क्षीरोदके** (6-1-85भा०प०ख०च०आ०पृ०86) इति भाष्यप्रयोगात् जातिप्राधान्य एवेदमित्याहुः[२]। नन्वेकशेषेण बहुवचनसम्भवात्[३] जातिरप्राणिनाम् (2-4-6/910) इत्यस्यानुवादकतया तन्निवर्तनासामर्थ्या[४]दिति चेन्न। तिष्यपुनर्वसू[५] समुदायस्य अनेकत्वाभावात्। युगभेदेन तद्भेदकल्पनया तथा प्रयोगे तु[६] न दृढतरं[७] मानम् इत्याशयात् ॥३४॥

सर्वे विधयश्छन्दसि विकल्पन्ते ॥ ३५ ॥
प्रकृतिवदनुकरणं भवति ॥ ३६ ॥

एकदेशविकृतमनन्यवत् ॥ ३७ ॥

[१]

कार्यकालपक्ष इति[८]। आकडारीयसंज्ञासु यथोद्देशपक्ष एवेति। पूर्वग्रन्थेनेदं विरुणद्धि इति केचित्[९]। एतदुदाहरणं तु[१०] चकारेति। अत्र हि उरदित्यत्वे[११]

---

[१] तद्वैकल्पिकत्वस्येति A^2 M^1 : तद्वैकल्पिक इति V M^2 तद्वैकल्पिकस्येति A^1

[२] एवेदमित्याहुः V A^2 M^2 : एवेदमित्यनादरः A^1 एवेत्याहुः M^1

[३] बहुवचनसम्भवात् V M^2 : बहुवचनसम्भवः A^1 A^2 M^1

[४] ०र्तनाऽसामर्थ्या० V M^1 M^2 : ०र्तनासामर्थ्या० A^1 ०र्तनाऽसामर्थ्या० A^2

[५] तिष्यपुनर्वसू V A^1 M^1 M^2 : तिष्यपुनर्वसु A^2

[६] प्रयोगे तु V M^1 A^2 M^2 : प्रयोगे A^1

[७] दृढतरं V A^1 M^2 : दृढं A^2 M^1

[८] कार्यकालपक्ष इति A^1 : कार्यकाल पक्षेति V M^1 A^2 M^2

[९] पूर्वग्रन्थेनेदं विरुणद्धि इति केचित् V M^2 : पूर्वग्रन्थेन विरुद्धमेतदिति A^1 पूर्वग्रन्थेन विरुणद्धि इति केचित् A^2 पूर्वग्रन्थेनेदं विरुद्धमिति केचित् M^1

[१०] एतदुदाहरणं तु A^2 M^1 : एतदुदाहरणम् V A^1 M^2

[११] उरदित्यत्वे V A^1 M^2 : उरदित्युत्वे A^2 उरदत्यत्वे M^1

हलादित्यत्वे[१] हलादिः शेषे[२] (7-4-60/2179) सिद्धिः। आनुमानिकस्थान्या-देशाभावमाश्रित्य[३] तु न निर्वाहः। अभ्यासस्य निरर्थकत्वात्। न च स्थानिवत् …(1-1-56/49) सूत्रे शेखरे आरेत्यादाविव पुनरभ्याससंज्ञा। तथा सति उत्तरसूत्रे[४]ऽनवयवत्वे[५] वव्रे इत्यत्र[६] भाष्योक्तस्य स्वेनापि तथानुदितस्यासङ्ग-त्यापत्त्या[७] द्विरुच्चारणविषयस्य पूर्वस्यैव[८] ग्रहणात्। अधिकं तु[९] शब्देन्दुशेखर-व्याख्यायां बोध्यम्। नन्वनन्यशब्दाद्वति[१०] नातिदेशोयमिति प्रतीयते। तत्तु न युक्तम्। भेद एव अतिदेशाङ्गीकारादित्यत **अनन्यवदिति**। आदेशग्रहण मूलकोऽयमिति दीक्षितोक्तं खण्डयति[११]। **लोकेति**।

[२]

अत एवेति। लोकन्यायसिद्धत्वादेव इत्यर्थः। **दीव्यच्छब्दैक देश इति**[१२]। अत्र

---

[१] हलादित्यत्वे V M^2 : om A^1 A^2 M^1

[२] शेषे V M^2 : शेष A^1 A^2 M^1

[३] ०न्यादेशाभावमाश्रित्य V A^1 M^2 : ०न्यादेशाभावेन A^2 M^1

[४] उत्तरसूत्रे V A^1 M^2 : उरण्सूत्रे A^2 M^1

[५] ०नवयवत्वे V A^2 M^1 M^2 : ०नवयत्वे A^1

[६] वव्रे इत्यत्र V M^2 : वव्रश्चेत्यत्र A^1 वव्रे इत्यादौ A^2 व्रश्च इत्यादौ M^1

[७] तथानुदितस्यासङ्गत्यापत्त्या V A^1 M^2 : तथानुदितस्यासङ्गत्त्या A^2 तथानुदितस्यसङ्गत्यापत्त्या M^1

[८] ०विषयस्य पूर्वस्यैव V A^1 A^2 M^2 : ०विषयस्यैव पूर्वस्य M^1

[९] अधिकं तु A^1 : अधिकं V A^2 M^1 M^2

[१०] नन्वनन्यशब्दाद्वति V A^1 M^2 : ननु अन्यशब्दाद्वति A^2 ननु अनन्यद्वतिना M^1

[११] खण्डयति V A^2 M^1 M^2 : दूषयति A^1

[१२] दीव्यच्छब्दैक० M^1 : शब्दैक० V A^1 A^2 M^2

ह्यर्थस्यैव[१] अवधित्वमेष्टव्यम्[२]। अर्थानामेवावधिमत्त्वस्येष्टत्वे[३] सजातीयाना- मेव अवध्यवधिमद्भावस्य प्रसिद्धत्वात्। तेन प्राक्रीताच्छः (5-1-1/1661) इत्यस्य न असमासे.....(5-1-20/1682) इत्यादौ सम्बन्धः[४]। अनुकरणत्वं च न[५] शब्दस्व-रूपार्थकत्वम्। शब्दस्यैवावधित्वमित्यापत्तेः। किन्तु तत्त्वेन[६] प्रत्यभिज्ञेयपरम्। अत एव प्राग्दीव्यतः...(4-1-83/1073) इत्यत्र भाष्ये[७] दीव्यति शब्दे दीव्यच्छब्दोऽस्ति तस्मादेषा पञ्चमीत्युक्तम्। तथा च एकदेशविकृतस्य...(परि०37) अनन्यत्वात् दीव्यति[८] शब्दो दीव्यत्यर्थ इत्यर्थस्यावधित्वमुक्त्वा त्यन्तस्य[९] तात्पर्यं **किमर्थमिति**। दीव्यतेरित्यनुक्त्वा कुत इयं[१०] वक्रगतिरिति प्रश्नार्थः[११]। **ज्ञापयतीति**। बोधयतीत्यर्थोऽत्र विवक्षित[१२] नार्थापत्तिः। **अक्तपरिमाणेति**[१३]। परिच्छिन्नपरिमाणेत्यर्थः। यथा जराया इत्यादौ। नन्वनेन न्यायेनैव सिद्धे[१४]

---

[१] अत्र ह्यर्थस्यैव V A^1 M^2 : अत्र ह्यर्थस्य A^2 अर्थस्यैव M^1

[२] अवधित्वमेष्टव्यम् V A^1 A^2 M^2 : अवधित्वं द्रष्टव्यम् M^1

[३] ०ष्टत्वे स० V M^2 : ०ष्टत्वेन स० A^1 A^2 M^1

[४] ०मास.....इत्यादौ सम्बन्धः V A^1 A^2 M^2 : ०मासे निष्कादिभ्यः इत्यादौ सङ्ग्रहः M^1

[५] अनुकरणत्वं च न V A^2 M^2 : अनुकरणे तु न A^1 अनुकरणत्वं न M^1

[६] तत्त्वेन V A^1 M^1 M^2 : नत्वेन A^2 तत्वे तेन M^2

[७] भाष्ये V A^1 A^2 M^2 : om M^1

[८] दीव्यति V A^1 M^2 : दीव्यत् A^2 M^1

[९] ०वधित्वमुक्त्वा त्यन्तस्य M^1 : ०वधित्वमित्युक्ते त्यन्तस्य V A^2 M^2 ०वधित्वमत्त्वेऽत्यन्तस्य A^1

[१०] इयं व० V A^1 A^2 M^2 : इयं पञ्चमीतिव० M^1

[११] प्रश्नार्थः V A^1 A^2 M^2 : प्रश्नः M^1

[१२] ०यतीत्यर्थोऽत्र विवक्षित V A^2 M^2 : ०यति इत्यत्रार्थो विवक्षितो A^1 ०यतीत्यर्थेन

[१३] अक्तपरिमाणेति V A^2 M^1 M^2 : अत्र परिमाणेति A^1

[१४] नन्वनेन न्यायेनैव सिद्धे VA^2 $M^1$$M^2$: नन्वनैव न्यायेन सिद्धे A^1

स्थानिवत्...(1-1-56/49) सूत्रं व्यर्थमित्याशङ्क्याह[१]

[३]

यत्रेति। यथा राममित्यादौ मकारस्यानेन[२] सुप्त्वाभावात् सुपि च (7-3-102/202) इति दीर्घो न। **विकृतेति।** यथा पञ्चवः न इत्यादौ[३] सुबन्तत्वेन पदत्वम्। त्वं[४] तिष्ठेत्यादौ तिङ्ङ[५]तिङः (8-1-28/3935) इति निघातः। अगुरित्यादौ[६] सिजभ्यस्त... (3-4-109/2226) इति जुसभावश्च[७] सिद्ध्यति[८]। नन्वेवं मघवत इत्यत्र स्थानिवद्भावेनान्नन्तत्वात्[९] श्वयुव...(6-4-133/362) इति सम्प्रसारणापत्तिरिति चेन्न अन इत्यस्यानुवृत्त्या[१०] श्रूयमाणान्नन्ते एव तत्प्रवृत्तेः। अत एव बहुश्वेत्यत्र न सम्प्रसारणम्। नन्वेवं[११] गुडोदकमित्यादौ एकदेशविकृत...(परि० 37) न्यायेन[१२] दकशब्दे उदकशब्दत्वं न स्यात्। अक्तपरिमाणे एतदप्रवृत्तेः[१३]।किञ्च[१४]

---

[१] व्यर्थमित्याशङ्क्याह V A^1 A^2 M^2 : किमर्थमित्याशङ्क्याह M^1

[२] मकारस्यानेन V A^2 M^2 : मकारस्यानेक A^1 मकारे M^1

[३] पञ्चवः न इत्यादौ V A^1 A^2 M^2 : यञ्चवः नः M^1

[४] त्वं V A^1 M^1 M^2 : om A^2

[५] तिङ्ङ A^2 : तिङ्ङः V A^1 M^2 तिङ् M^1

[६] अगुरित्यादौ V A^1 M^2 : अगुरित्यत्र A^2 M^1

[७] जुसभावश्च V A^1 M^2 : जुस् भावश्च A^2 M^1

[८] सिद्ध्यति A^1 A^2 M^1 : सिध्यति V M^2

[९] स्थानिवद्भावेनान्न० V M^1 M^2 : स्थानिवत्त्वेनान्न० A^1 A^2

[१०] अन इत्यस्यानुवृत्त्या V A^1 M^2 : अन इत्यस्यावृत्त्या A^2 अन् इत्यस्यावृत्त्या M^1

[११] नन्वेवं V A^1 A^2 M^2 : om M^1

[१२] एकदेशविकृतन्यायेन V A^2 M^2 : एकादेशविकृतन्यायेन A^1 om M^1

[१३] अक्तपरिमाणे एतदप्रवृत्तेः V M^1 M^2 : तत्र परिमाणे एतदप्रवृत्तेः A^1 अक्तपरिमाणो तदप्रवृत्तेः A^2

[१४] किञ्च V A^1 A^2 M^2 : om M^1

प्राग्दीव्यतः[१]...(4-1-83/1073) इत्यत्राप्यक्तपरिमाणसत्वेनैतदप्रवृत्तौ[२] उक्त-भाष्यासङ्गतिः। किञ्च चकार इत्यादौ अर्धविकारसत्वेनाभ्यासत्वानापत्तिः। अतः सिद्धान्तनिष्कर्षमाह। **क्वचिदिति।** तथा च स्थानिवत्...(1-1-56/49)

सूत्रे आदेशग्रहणात् क्वचित् एतदनाश्रयणमित्येव सारं नत्वक्तपरिमाण इत्यादिप्रागुक्तमिति भावः॥ ३७॥

॥ इति श्री सतारा राघवेन्द्राचार्यविरचितायां परिभाषेन्दुशेखर-व्याख्यात्रिपथगायां शास्त्रत्वसम्पादनोद्देशनामकं प्रथमं प्रकरणम्॥

P P P P P P P

---

[१] प्राग्दीव्यत A^1 A^2 : प्राग्दीव्यति V M^1 M^2

[२] ०सत्वेनैतदप्रवृत्तौ A^2 M^1 : ०सत्वेन तदप्रवृत्तौ V A^1 M^2

॥ त्रिपथगाव्याख्याने बाधबीजनामकं द्वितीयं प्रकरणम् ॥

पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ॥ ३ ८ ॥

पुनः प्रसङ्गविज्ञानात्सिद्धम् ॥ ३९॥

[१]

भिन्धकीति। क्वचित्[१] पुस्तके भिन्धीत्यत्र परत्वात् तातङि धिभावो न[२] स्यादिति पाठो दृश्यते। स तु न युक्तः। तातङो वैकल्पिकत्वेन तदभावे धि - भावप्रवृत्त्योक्तरूपसिद्धेः। अत्र वदन्ति। विकल्पशास्त्राणामभावपर्यन्तमपि तात्पर्यम्। तथा च यस्य हलः (6-4-49भा०प०ख०द्वि०आ०पृ०314) इत्यत्र भाष्यं सङ्घातग्रहणं चेत् क्यस्य[३] विभाषायां दोषो भवति। समिधिता , समिध्यिता । यदा लोपः तदा सर्वस्य लोपः[४]। यदाऽलोपस्तदा सर्वस्या लोपः[५] प्राप्नोतीति[६]। तथा च[७] भिन्धीति पाठोऽपि सुयोजः[८]। शब्देन्दुशेखरे विप्रतिषेध...(1-4-2/ 175) सूत्रस्थोप्येवमेव योजनीय इति। अत्रोच्यते - अभावपर्यन्तं तात्पर्येऽपि धि भावस्याभावेन अविरोधात्। विप्रतिषेधासङ्गतिः किञ्च प्राप्तविभाषाणामेव अभावपर्यन्तं तात्पर्यं नाप्राप्तविभाषाणाम्। तथा च

---

[१] क्वचित् V A^1 M^1 M^2 : क्वचित्तु A^2

[२] तातङि धिभावो न V A^1 A^2 M^2 : तातङा धिर्न M^1

[३] चेत् क्यस्य A^2 M^1 : चेत्वं यस्य V A^1 M^2

[४] सर्वस्य लोपः V A^2 M^2 : सर्वस्यालोपः A^1 सर्वलोपः प्राप्नोति M^1

[५] यदाऽलोपस्तदा सर्वस्यालोपः V M^2 : om A^1 यदालोपस्तदा सर्वस्याल्लोपः A^2 सर्वस्य लोपः M^1

[६] प्राप्नोतीति V A^2 M^1 M^2 : प्राप्नोति A^1

[७] तथा च भि०V A^1 A^2 M^2 : तदा भि० M^1

[८] सुयोज्यः M^1 : सुयोजः V A^1 A^2 M^2

स्वरति ...(7-2-44 भा०ष० ख०द्वि०आ०पृ०135) इति सूत्रे भाष्यम्। यदि[१] तर्हि उदात्तः स्वरतिः[२] पठिष्यति[३] विप्रतिषेधं स्वर[४]तेर्वेट्त्वादृतः स्ये[५] विप्रतिषेधेनेति[६] । तन्नोपपद्यते। किं कारणम् ? सविधिरयं प्रतिषेधः विप्रतिषेधयोश्च[७] अयुक्तो विप्रतिषेधः इति[८]। यदा तु[९] स्वरतिरनुदात्तः। तदा विध्योर्विप्रतिषेधोप-पत्तिरिति[१०]। क्यस्य[११] विभाषा (6-4-50/2660) इत्यस्यापि प्राप्तविभाषात्वात् तत्पर्यन्तं तात्पर्यम्। अत एव मुमुक्षुते[१२] वत्सः इत्यत्र न अभ्यासलोपः। अन्यथा मुचोऽकर्मकस्य...(7-4-57/2624) इत्यनेन अभावस्यापि विधनात् तस्य च अत्र लोप... (7-4-58/2620) इत्यत्र अत्र ग्रहणेन ग्रहणे तदापत्तेः[१३]। मम तु हलन्ताच्च (1-2-10/2613) इति कित्त्वेनाप्राप्तगुणविधानेन प्राप्तविभ

---

[१] यदि V A^2 M^1 M^2 : यदिति A^1

[२] तर्हि उदात्तः स्वरतिः ego : यदि सवरतिरुदात्तः V A^1 A^2 M^1 M^2

[३] पठिष्यति V A^1 A^2 M^2 : पठ्यते M^1

[४] ०तिषेधं स्वर० $M^1$० : तिषेधःस्वर० V A^1 A^2 M^2

[५] स्वरतेर्वेट्त्वादृतः स्ये विप्रतिषेधेन ego: स्वरतेर्दृतः स्य प्रतिषेधेन V A^1 A^2 M^1 M^2

[६] ०कत्वादत्तस्य इति V A^1 : ०कत्वादत्तः स्य इति A^2 ०कत्वात् अतो स्ये M^1 ०कत्वादतस्य इति M^2

[७] विप्रति० V A^1 A^2 M^2 : विधिप्रति० M^1

[८] विप्रतिषेधः इति M^1 : विप्रतिषेधः V A^1 A^2 M^2

[९] यदा तु V A^1 A^2 M^2 : यदा M^1

[१०] विध्योर्विप्रतिषेधोपपत्तिरिति V M^2 : विध्योर्विप्रतिषेधयोर्विध्योर्विप्रतिषेधोप० A^1 ०प्रतिषेधोपपत्तिः A^2 ०प्रतिषेधोपपत्तिरिति कैयटः M^1

[११] क्यस्य V A^2 M^1 M^2 : यस्य A^1

[१२] मुमुक्षुते A^1 A^2 M^1 : मुमुक्षुत्वं V M^2

[१३] लोप... इत्यत्र अत्र ग्रहणेन ग्रहणे तदापत्तेः M^1 : लोप... इत्यत्र अत्र ग्रहणे तदापत्तिः V M^2 लोपेन त्रान्तग्रहणेन तत्र ग्रहणात्तदापत्तिः A^1 लोप... इत्यत्र अत्र ग्रहणेन ग्रहणे तदापत्तिः A^2

षात्वाभावात् न अभावपर्यन्तं तात्पर्यमिति न दोषः[१]। एवञ्च प्रकृते तातङोऽप्राप्तविभाषात्वेन नाभावपर्यन्तं तात्पर्यमिति[२]। नन्वेवं प्राप्तविभाषायाभावतात्पर्यकत्वे[३] उभयथर्क्षु (8-3-8/3630) इत्यस्यापि[४] तथात्वापत्त्या रुत्त्वाभावेऽपि अत्रानुनासिक...(8-3-2/136) इत्यनुनासिकापत्तिः। किञ्च द्वितीयतृतीयेत्यस्याऽपि[५] तथात्वेनैतद्बोधित- समासाभावेन अपवादेन बाधितस्य षष्ठीसमासस्य पक्षेऽनापत्तिरिति चेन्न। अत्रानुनासिक इत्यत्र पूर्वत्वस्य सावधिकत्त्वेनैतत्प्रकरणविहितकार्यापेक्षस्यैव तस्य सन्निधानात् ग्रहेणावध्यवधिमतोः[६] साजात्यनियमेनाभावस्य तदवधित्वासम्भवादेकरुत्वाप्रवृत्तेः[७]। समो वा...¶ (8-3-5व्या०म०भा०ष०ख ०प्र०आ०पृ०156) इति विहितसलोपस्य[८] तु वैजात्येऽप्यत्रप्रकरणे विधानसामर्थ्यादवधित्वम्। षष्ठीसमासस्त्वन्यतरस्यां ग्रहणसामर्थ्यात्पक्षे सुलभः। यद्वा द्वितीयादीनि प्रथमान्तेन निर्दिश्य[९] केनापि समासो विहितः इत्यत्र प्राप्तविभाषैवैषा[१०]। किञ्च,

---

[१] न दोषः V A^1 A^2 M^2 : om M^1

[२] एवञ्च प्रकृते तातङोऽप्राप्तविभाषात्वेन नाभावपर्यन्तं तात्पर्यमिति V A^1 A^2 M^2 : om M^1

[३] प्राप्तविभाषायाभावतात्पर्यकत्वे V A^2 M^2 : प्राप्तविभाषाया अभावान्ततात्पर्यकत्वे A^1 प्राप्तविभाषाया भावतात्पर्यकत्वेन M^1

[४] उभयथर्क्षु इत्यस्यापि V A^1 A^2 M^2 : उभयथाक्षिप्तस्यापि M^1

[५] ०यतृतीयेत्यस्याऽपि V A^2 M^1 M^2 : ०यतृतीयचतुर्थेत्यस्यापि A^1

[६] सन्निधानात् ग्रहेणावध्यवधिमतोः V A^2 M^2 : सन्निधात् ग्रहणेनाव० A^1 M^1

[७] तदवधित्वासम्भवादेकरुत्वा०V M^1 M^2: तदव *** वादेव रुत्वा० A^1 तदवधित्वासम्भवादेवरुत्वा० A^2

[८] विहितसलोप० A^2 : विहितलोप० V M^1 M^2 विहितमलोप० A^1

[९] निर्दिश्य V A^1 A^2 M^2 : अनिर्दिश्यमान M^1

[१०] इत्यत्र प्राप्तविभाषैवैषा A^1 : इत्यप्राप्तविभाषैषा V M^1 M^2 : इत्यप्राप्तविभाषैवैषा A^2

भिन्धीति पाठे तातङा बाधितस्य धेः पुनः प्रसङ्गविज्ञाने...(परि०39) भिन्तादित्यस्य दत्ततिलाञ्जलिता[१]। भावांशे सकृद्गतिन्यायाश्रयणे...(परि०40) अभावांशे पुनः प्रसङ्गाश्रयणे[२] च अर्धजरतीयतेति दिक्[३] ॥३९॥

सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ॥ ४०॥

[१]

सकृद्यद्बाधितं तत्सर्वथा बाधितमेवेत्यर्थः। **पर्यायेणेति**। अत्र दृष्टान्तस्तृजादिवत् इति। हेतुस्तु बाधकाभावादिति[४]। यथा[५] इत्यारभ्य कार्यं करोतीत्यन्तो ग्रन्थः दृष्टान्तहेतुप्रतिपादक[६] इति न भ्रमितव्यम्। तत्र लक्ष्यानुसारात्क्वचित् शास्त्रीयदृष्टान्ताश्रयणम्, क्वचिल्लौकिकदृष्टान्ताश्रयणमित्युत्तरग्रन्थानुरोधात्[७]। किन्तु यथा इत्यारभ्य तथा इत्यन्तो एको[८] दृष्टान्तः। उत्तरत्र द्विर्यथातथयोरभावात्[९]। एवमेव भाष्यस्वरसाच्च। स तयोः[१०] पर्यायेण इत्यन्तोक्तिस्तु उत्तरत्र[११]

---

[१] दत्ततिलाञ्जलिता V M^2 : दत्तजलाञ्जलिता A^1 A^2 M^1

[२] प्रसङ्गाश्रयणे V A^1 M^1 M^2 : विज्ञानाश्रयणे A^2

[३] ०तीयतेति दिक् V A^2 M^2 : ०तीयं चे दिक् A^1 M^1

[४] सकृद्यद्बाधितम् ..... बाधकाभावादिति V A^2 M^1 : om A^1 सकृद्यद्बाधितम् ..... बाधकोऽभावादिति M^2

[५] यथा V A^2 M^2 : यथेत्यादिश्च A^1 तथा M^1

[६] दृष्टान्तहेतुप्रतिपादकः V M^2 : अत्र दृष्टान्तो हेतुप्रतिपादकः A^1 अत्र दृष्टान्तहेतुप्रतिपादकः A^2 दृष्टान्तहेतुप्रतिपादक हेतुः M^1

[७] ०त्युत्तरग्रन्थानुरोधात् V A^2 M^2 : ०त्तरग्रन्थविरोधात् A^1 M^1

[८] तथा इत्यन्तो एको V A^2 M^1 M^2 : तथैव एको A^1

[९] द्विर्यथातथयोरभावात् V A^2 M^1 M^2 : द्विध्यतथरीयोरभावात् A^1

[१०] स तयोः V A^2 M^1 M^2 : om A^1

[११] उत्तरत्र V A^1 M^1 M^2 : उत्तर A^2

युगपदित्यस्य नानादिक्षु[१] च इत्यस्य व्यावर्त्य प्रदर्शनाय। अत्र च प्रेष्यस्थानीयता[२] संस्कार्यस्य लक्ष्यस्य। तुल्यबलपुरुषद्वयस्थानीयता[३] तुल्यबलयोः लक्षणयोरिति बोध्यम्। युगपदुभयोः सम्भवांशे[४] चायं दृष्टान्तः। नानादिक्षु च इत्येतत्तु[५] युगपदुभयासम्भवे हेतुकथनाय[६]। न तु[७] दार्ष्टान्तिकानुगमाय[८]। 'अनवयवेन' इत्यस्य विवरणं साकल्येनेति।

[२]

अनुबन्ध्य[९] इति। सानुस्वारः[१०] पाठः[११]। अन्यथा वृध्यापत्तेः[१२]। प्रतिबध्येति नैयायिकानां पाठः[१३] प्रामादिक एव। **भाष्यसम्मतमार्ग एवेति[१४]**। परे तु दृष्टा-न्तस्य सम्भावकत्वेऽपि नार्थनिश्चायकत्वम्। अर्थनिश्चयस्तु हेतुत एव ।

---

[१] नानादिक्षु A^2 M^1: नादिक्षु V A^1 M^2

[२] प्रेष्यस्थानीयता V A^2 M^1 M^2 : प्रेक्ष्यस्थानीयता A^1

[३] ०षद्वयस्थानीयता V A^2 M^1 M^2 : ०षस्थानीयता A^1

[४] सम्भवांशे V M^2 : असम्भवांशे A^1 A^2 M^1

[५] इत्येतत्तु V A^2 M^1 M^2 : इत्येतत् A^1

[६] हेतुकथनाय A^1 : हेतुः कथनाय V A^2 M^1 M^2

[७] न तु A^2 M^1 : ननु V A^1 M^2

[८] दार्ष्टान्तिकानुगमाय V A^2 M^2 : दार्ष्टान्तिके अनुगमाय A^1 M^1

[९] अनुबन्ध्य V A^1 A^2 M^2 : अनुबन्ध्यत M^1

[१०] सानुस्वारः V A^2 M^1 M^2 : अनुस्वारः A^1

[११] पाठः V A^1 A^2 M^1 : पाठाः M^2

[१२] वृध्यापत्तेः V A^1 M^2 : अण्यदापत्तेः A^2 थार्णनदापत्तेः M^1

[१३] प्रतिबध्येति नैयायिकानां पाठः V A^2 M^1 M^2 : प्रतिबन्धेति वा नैयायिकानाम् A^1

[१४] भाष्यसम्मतमार्ग एवेति V A^1 A^2 M^2 : भाष्यसम्मतं तु एवमेवेति M^1

तथा च विप्रतिषेध...(1-4-2/175) सूत्रस्थभाष्यस्य हेतुविशेषं पुरस्कृत्य[१] न दृष्टा- न्तमात्रेणोक्तन्यायद्वयसाधनाय प्रवृत्तिः। किन्तु तत्पुरस्कारेणैव। तत्र अप्रतिपत्तौ हेतुस्तुल्यबलत्वादिति। अत्र शास्त्रीयदृष्टान्ताभावात्। यदा तमु-भाविति लौकिक एव[२] दृष्टान्तो भगवता भाष्यकृतोपन्यस्तः। पर्यायेण प्राप्तौ[३] हेतुस्तु अनवयवप्रसङ्गात्प्रतिपदविधिश्चेति[४] दृष्टान्ते हेतूपपादनमुखेन दार्ष्टान्तिके तत्सङ्गमन[५] एव तात्पर्यात्। अत्र च दृष्टान्तस्तृजादिः। तत्र च प्रतिपदविधि-रूपो हेतुः व्यक्तिपदार्थपक्षे[६] एवोपपद्यते। तथाहि[७] व्यक्तिपक्षे पाणिनिपठितं शास्त्रं न[८] साक्षाल्लक्ष्यसंस्कारकम्। अनेकविषयकत्वानापत्तेः। किन्तु यणो मयः...¶ (8-4-47 भा०ष०ख०प्र०आ०पृ०229) इतिवद्विनिगमनाविरहात् । तत्तल्ल-क्ष्यविषयकानेकवाक्यकल्पकम्[९]। कल्पितैश्चतैर्लक्ष्यसंस्कार इति क्रमः। एवञ्च अत्र शास्त्राणाम् अनवकाशत्वलक्षणं प्रतिपदविधित्वं स्पष्टमेव। अत एव विप्रतिषेध...(1-4-2 भा०द्वि०ख०प्र०आ०पृ० 105 - 106) सूत्रे भाष्ये अप्रतिपत्तिर्वोभ-योस्तुल्यबलत्वात्। तत्र प्रतिपत्त्यर्थं वचनमित्युक्त्वा तव्यदादीनां तु

---

[१] हेतुविशेषं पुरस्कृत्य V A^1 M^2 : हेतुविशेषमपुरस्कृत्य A^2 हेतुविशेषणमपुरस्कृत्य M^1

[२] लौकिक एव V A^2 M^1 M^2 : लौकिक A^1

[३] प्राप्तौ V A^2 M^2 : प्रतिपत्तौ A^1 M^1

[४] पदविधिश्चेति M^1 : पदविधेश्चेति V A^1 A^2 M^2

[५] तत्सङ्गमन V A^1 A^2 M^2 : तत्समान M^1

[६] व्यक्तिपदार्थपक्षे V A^1 M^1 : व्यक्तिपदार्थपक्ष A^2 व्यक्तिपक्षे M^2

[७] तथाहि V A^1 M^2 : तथा A^2 M^1

[८] शास्त्रं न V A^1 A^2 M^2 : शास्त्रं M^1

[९] विषयकानेकवाक्यकल्पकम् V A^1 A^2 M^2 : विषयकत्ववाक्यकल्प्यम् M^1

अप्रसिद्धिः[१] न हि किञ्चित्तव्यदादिषु[२] नियमकारिशास्त्रमारभ्यते। येन तव्यदादयः स्युः। यश्च भवता हेतुर्व्यपदिष्टः **अप्रतिपत्तिर्वोभयोः तुल्यबलत्वात् इति।** सः तुल्यस्तव्यदादिषु नैष दोषः। अनवकाशास्तव्यदादयः। उच्यन्ते च तव्यदादयः[३]। उच्यन्ते च ते[४] वचनाद्भविष्यन्ति यश्च भगवता[५] हेतुर्व्यपदिष्टस्तृजादिभिस्तुल्यं पर्यायः प्राप्नोतीति स तुल्यस्तव्यदादिष्वित्युक्तम् । तत्र तृजादिभिरिति प्रतीकमुपादाय कैयटेनोक्तम् आदिशब्दस्य प्रकारार्थत्वात् तृजादिभिस्तव्यदादयो[६] न भिन्नाः इत्यर्थः इति। जातिपक्षे च शास्त्रस्य सर्वविषयकत्वात्तेनैव लक्ष्यसंस्कारात्तस्य च[७] अन्यत्र चारितार्थ्यात् न प्रतिपदविधित्वमित्याहुः[८]।

[३]

असम्भव एवेति। न त्वेककार्यित्वम् इत्यर्थः[९]। तत्फलमाह--**यथेति।** शाभावः नाशिषि चरितार्थः। संज्ञानां तु एकविषयाणामेव बाध्यबाधकभावः। आकडारात् ... (1-4-1/232) इत्यनेन तादृशीनामेव[१०] परस्प[११]रमसमावेश-

---

[१] तु अप्रसिद्धिः V A^1 A^2 M^2 : प्रसिद्धिः M^1

[२] किञ्चित्तव्यदादिषु V A^2 M^1 M^2 : तव्यदादिषु A^1

[३] तव्यदादयः V A^1 M^2 : ते तव्यदादयः A^2 M^1

[४] उच्यन्ते च ते V A^2 M^1 M^2 : उच्यते ते च A^1

[५] भगवता M^1 : भवता V A^1 A^2 M^2

[६] तृजादिभिस्तव्यदादयो V A^1 M^1 M^2 : तृजादिभ्यस्तव्यदादयो A^2

[७] ०त्तस्य च V A^2 M^1 M^2 : ०त्तत्र स च A^1

[८] ०दविधित्वमित्याहुः V A^1 M^2 : ०दविधित्वम् इति प्राहुः A^2 ०दविधित्वं भाव इति प्राहुः M^1

[९] इत्यर्थः V A^2 M^1 M^2 : इति भावः A^1

[१०] तादृशीनामेव V M^2 : तादृशानामेव A^1 A^2 M^1

[११] परस्पपर० V A^1 M^1 M^2 : परस्यपर० A^2

बोधनात्। **ह्रस्वान्ताङ्गेति।** यदागम...(परि०11) न्यायस्य नुम्प्रवृत्त्युत्तरं प्रवृत्तावपि अङ्गसंज्ञाविधौ तदादिग्रहणान्नान्तस्यैव अङ्गत्वमिति भावः॥ ४०॥

[१]

विकरणेभ्यो नियमो बलीयान्॥ ४१॥

परत्वादिति। ननु सार्वधातुके शब्विधानात्कृत एव नियमे विकरण इति तयोर्विप्रतिषेधानुपपत्तिरिति[१] चेन्न। अविशेषात्सामान्यशास्त्रेण लस्याष्टादशसु तिबादिषु कृतेषु पश्चात् नियमेन लुगादिनेव जातनिवृत्तिरित्याशयात्। **तिङ्विधानमिति[२]।** तङ्विधा[३]नमित्यपपाठः। परस्मैपदविधानात्।

[२]

स्येऽपीति। परत्वादिति भावः। **शबादिभ्यस्त्विति।** शबादीनां सार्वधातुकनिमित्तत्वादिति भावः। **यद्वेति।** इदं चिन्त्यम्। एकवाक्यतया विधिरिति पक्षे लादेशानामपि प्रकृतिविशेषापेक्षत्वेन[४] सामान्यात्[५]। **अत्र पक्षे इति[६]।** दिग्योगलक्षणपञ्चम्यामित्यर्थः[७]। **भाविसंज्ञेति।** तङानौ...(1-4-100/2156) इत्यत्र च अनशादिव्यावृत्तये[८] ' ल ' इत्यस्यानुवृत्त्या एकवाक्यतया विधिरिति पक्षे

---

[१] ०धानुपपत्तिरिति V A^1 A^2 M^2 : ०धाभावादिति M^1

[२] तिङ्विधानमिति V A^1 M^1 M^2 : om A^2

[३] तङ्विधा० A^1 A^2 : तिङ्विधा० V M^1 M^2

[४] ०षापेक्षत्वेन V A^1 M^1 M^2 : ०षापेक्ष्यत्वेन A^2

[५] सामान्यात् A^1 A^2 : स्याम्यात् V M^1 M^2

[६] पक्षे इति V A^1 M^1 M^2 : पक्ष इति A^2

[७] पञ्चम्यामित्यर्थः V A^1 A^2 M^2 : पञ्चम्या इत्यर्थः M^1

[८] अनशादिव्यावृत्तये V A^1 A^2 M^2 : शानशादिव्यावृत्तये M^1

लस्थानेष्वाद्यनिवृत्तेरिति[१] भावः। एकवाक्यतया विधिरिति सिद्धान्तपक्षं परिष्कृत्य विकरणेभ्य इति प्रकृतपरिभाषाश्रयणपक्षं गौरवेण निराकरोति । **भिन्नेति।**

[३]

वैयर्थ्यापादने इष्टापत्तिं परिहरति --- **शास्त्रानर्थक्यमिति। इति गौरवमिति।** एतस्य विहितानां नियमः इत्यनेन अन्वयः। यद्यपि पूर्वस्मात्परं बलवदित्युत्तरं परान्नित्यं[२] बलवदित्येवं[३] पठितुं युक्तम्। तथापि परं बलवदित्येतदपवादत्वादेतन्मध्ये[४] पठितम्॥ ४१॥

परान्नित्यं बलवत्॥ ४२॥

[१]

बीजमिति। ननु न्यायादपि प्रत्यक्षशास्त्रस्य बलवत्वेन कथं परान्नित्यादेः बलवत्त्वमिति चेन्न। तुल्यबलयोः विरोधस्यैव[५] विप्रतिषेध[६]शब्दार्थत्वात्। नित्यानित्ययोः अतुल्यबलत्वात्[७]। यत्तु तत्र[८] नित्यस्यावश्यकतया अन्तरङ्गस्य ज्ञापनादिना[९] अपवादस्य वचनसामर्थ्याद्बाधकत्वे[१०] स्थिते तद्भिन्नो अस्य विषयः

---

[१] स्थानेष्वाद्यनिवृत्तेरिति V M^2 : स्थानेष्वप्यनिवृत्तेरिति A^1 स्थानेद्याप्यनिवृत्तेरिति A^2 स्थानेद्यात्रप्यनिवृत्तेरिति M^1

[२] परान्नित्यं V A^1 M^1 M^2 : परान्नित्येव A^2

[३] बलवदित्येवं V A^1 M^2 : बलवदित्येव A^2 बलवदिति M^1

[४] ०त्वादेतन्मध्ये V A^1 A^2 M^2 : ०त्वादित्येतन्मध्ये M^1

[५] विरोधस्यैव V A^1 A^2 M^2 : विप्रतिषेधस्यैव M^1

[६] विप्रतिषेध० V A^2 M^1 M^2 : प्रतिषेध० A^1

[७] ०बलत्वात् V A^1 M^1 M^2 : ०बलवत्वात् A^2

[८] यत्तु तत्र V M^1 M^2 : तत्र A^1 A^2

[९] ज्ञापनादिना V M^1 M^2 : ज्ञापकादिना A^1 A^2

[१०] वचनसामर्थ्याद्बा० V M^1 M^2 : वचनप्राधान्याद्बा० A^1 वचनप्रामाण्याद्बा० A^2

इत्याह -- तुल्यबलेति इति[१] शब्देन्दुशेखरोक्तम् ।

तत्तु अयुक्तमेव[२] । शब्दान्तरादित्यादीनां[३] फलानि मृग्यानि ।

शब्दान्तरस्य प्राप्नुवन्विधिरनित्यो भवति ॥ ४३॥
शब्दान्तरात्प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम् ॥४४ ॥
लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ॥ ४५ ॥
[१]

एतन्मूलकमिति । कृताकृतप्रसङ्गी...(परि०42) इत्यत्र विशेषनिवेशमूलकमित्यर्थः ॥ ४५॥

क्वचित्कृताकृतप्रसङ्गमात्रेणापि नित्यता ॥ ४६ ॥
यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् ॥ ४७ ॥
[१]
यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्यम् ॥ ४८॥
निमित्तमिति[४] । प्रसङ्ग इत्यर्थः ।

स्वरिभन्नस्य प्राप्नुवन्विधिरनित्यो भवति ॥ ४९ ॥
[१]
णौ चङीति । अत एवेति शेषः । तस्य चेच्छयान्यतरस्योभयस्य वा नियामकत्वेनोल्लेख्यत्वादेवेत्यर्थः[५] ।

---

[१] तुल्यबलेति इति V A^1 A^2 M^2 : तुल्यबलादीति M^1

[२] तत्तु अयुक्तमेव V A^1 A^2 M^2 : युक्तमेव M^1

[३] शब्दान्तरादित्यादीनां V M^1 M^2 : शब्दान्तरादीनामनन्वयासिद्धानि A^1 शब्दान्तरत्वादित्यादीनाम् अनन्यथा सिद्धानि A^2

[४] निमित्तमिति V A^2 M^1 M^2 : om A^1

[५] ०ख्यत्वादेवेत्यर्थः V A^1 A^2 M^2 : ०ख्यत्वादित्यर्थः M^1

असिद्धं बहिरङ्गमन्तरङ्गे ॥ ५० ॥

[१]

तदसङ्गतिरिति[१]। नन्वन्तरङ्गत्वात् त्रयादेशेऽपि पुनस्तिस्त्रा[२]देशे न तत्सङ्गतिरिति चेन्न। त्रयादेशवदन्तरङ्गत्वात् नामि (6-4-3/209) इति दीर्घे पश्चात्तिस्त्रादेशे[३]। लक्ष्ये लक्षणस्य...(प्रौढ०पृ०92) इति न्यायेन पुनर्दीर्घाप्रवृत्तेः[४]। **एतेनेति**। अङ्गशब्देन शब्दरूपनिमित्तस्यैव[५] ग्रहणेनेत्यर्थः। **अपरनिमित्तकत्वेनेति**[६]। इदं परनिमित्तत्वेन[७] स्यादीनां बहिरङ्गत्वमिति वक्ष्यमाणं च अयुक्तम्। प्रमाणाभावात्। भाष्यविरोधाच्च। तथाहि नामि (भा०प०ख०प्र०आ०पृ०274) इति सूत्रे आमीति[८] न्यासे नित्यत्वाद्दीर्घत्वमापादितम्। त्वद्रीत्या बहिरङ्गत्वात्तदसङ्गतिः। तथा ऋतो भारद्वाजस्य (7-2-63भा०ष०ख०द्वि०आ०पृ०142) इति सूत्रे[९] अच इत्यत्र उपदेशग्रहणानपकर्षे[१०] जहर्थेत्यादौ[११] परत्वाद्गुणे अनजन्तत्वात्प्रतिषेधो[१२] न प्राप्नोति

---

[१] तदसङ्गतिरिति V A^2 M^2 : तदसङ्गति A^1 M^1

[२] पुनस्तिस्त्रा० A^1 A^2 M^1 M^2 : पुनस्तिसा० V

[३] ०देशे A^1 A^2 M^1 : ०देशे तस्य असिद्धत्वान्न दीर्घः स्थानिबुद्ध्या तु न भवति V M^2

[४] पुनर्दीर्घाप्रवृत्तेः V A^1 A^2 M^2 : पुनर्दीर्घप्रवृत्तेः M^1

[५] निमित्तस्यैव V A^1 A^2 M^2 : निमित्त M^1

[६] अपरनिमित्तकत्वेनेति V A^1 A^2 M^2 : परनिमित्तकत्वेनेति M^1

[७] परनिमित्तकत्वेन M^1 : परनिमित्तत्वेन V A^1 A^2 M^2

[८] आमीति A^1 A^2 : आनीति V M^2 M^1

[९] सूत्रे V A^1 A^2 M^2 : सूत्रे भाष्ये M^1

[१०] ०हणानपकर्षे V A^1 M^1 M^2 : ०हणानपकर्षो A^2

[११] जहर्थेत्यादौ A^1 : जहर्थेत्यत्र V A^2 M^1 M^2

[१२] अनजन्तत्वात्प्रतिषेधो V A^1 A^2 M^2 : अनजन्तत्वात् M^1

इत्युक्तम्। त्वद्रीत्या गुणस्य बहिरङ्गत्वात् तदसङ्गतिरिति[१] दिक्। पचेदिति पाठः। पचेरन् इति पाठे तु अङ्गस्य संज्ञेति षष्ठीतत्पुरुषेण धातुसंज्ञापि ग्राह्या[२]।

[२]

यणा बाधित्वादिति। ननु तदन्तविधिपक्षे यणो बहिरङ्गस्य गुणेनैव बाधनात् कथमेतदिति चेन्न। तदन्तविध्यभावपक्षे[३] एवैतस्य प्रवृत्तेः। तदुक्तं **सिद्धान्तेति।** नन्वेवमपि प्रकृतासङ्गतिः। तदन्तविधिमाश्रित्य प्रवृत्तप्रकृतभाष्यासङ्गतिताद-वस्थ्यादिति चेन्न। यणो गुणबाधकत्त्वानापत्युक्त्या ऊठोऽनित्यत्वविघटन एव प्रकृतभाष्यतात्पर्यमित्याशयात्। परमनिष्कर्षे तु ऊडिदम्... (6-1-176 / 3717) इति सूत्रे शब्देन्दुशेखरे च्छ्वोः शूड्...(6-4-19/3717) इति सूत्रे अनुनासिकेत्यस्य विषयसप्तमीत्वस्योक्तत्त्वेन गुणादन्तरङ्गत्वात् ऊडिति न काप्यनुपपत्तिः[४]। **सप्तम्याद्यन्ततयेति।** नन्विदं कथं प्रकृतभाष्याल्लब्धमिति चेन्न। यणो निमित्तांशेऽधिकप्रवेशे गुणस्याप्युद्देशांशे अधिकप्रवेशेन साम्यापत्त्या

---

[१] तदसङ्गतिरिति V A^1 A^2 M^2 : तदसिद्धिरिति M^1

[२] पचेदि .....०ज्ञापि ग्राह्या A^2 : पचेदि .....०ज्ञा ग्राह्या V M^2 om A^1 M^1

[३] ०भावपक्षे V M^2 : ०भावकल्प A^1 ०भावकल्पे A^2 ०भावकल्पने M^1

[४] **सिद्धान्तेति।** नन्वेवमपि प्रकृतासङ्गतिः। तदन्तविधिमाश्रित्य प्रवृत्तप्रकृतभाष्यासङ्गतितादवस्थ्यादिति चेन्न। यणो गुणबाधकत्त्वानापत्युक्त्या ऊठोऽनित्यत्वविघटन एव प्रकृतभाष्यतात्पर्यमित्याशयात्। परमनिष्कर्षे तु ऊडिदमिति सूत्रे शब्देन्दुशेखरे च्छ्वोः शूडिति सूत्रे अनुनासिकेत्यस्य विषयसप्तमीत्व-स्योक्तत्त्वेन गुणादन्तरङ्गत्वात् ऊडिति न काप्यनुपपत्तिः A^2 : **सिद्धान्तेति** V M^2 सिद्धान्त इति। नन्वेवमपि प्रकृतासङ्गतिः। तदन्तविधिमाश्रित्य प्रवृत्तप्रकृतभाष्यस्यासङ्गतितादवस्थ्यादिति चेन्न। यणोंऽशे बाधकत्वानुपपत्त्या ऊठोऽनित्यत्वविघटन एव प्रकृतभाष्यतात्पर्यमित्याशयात् A^1 **सिद्धान्तेति।** नन्वेवमपि प्रकृतासङ्गतिः। तदन्तविधिप्रवृत्तप्रकृतभाष्यासङ्गति तादव स्थ्या दिति चेन्न। यणो गुणबाधकत्त्वानुपपत्युक्त्या ऊठोऽनित्यत्वविघटमेव भाष्यतात्पर्यात्। M^1

अन्तरङ्गत्वोपपा[१]दनासम्भवात्। **इति न तु युक्तमिति**[२]। वस्तुतः[३] इदमेव युक्तम्। ज्ञापकञ्च अत्र स्वरदीर्घयलोपेषु ...(1-1-58/51) इत्यत्र यलोपग्रहणम्। तद्धि वाय्वोः इत्यत्र वलि लोपे स्थानिवत्वाय[४]। वलिलोपे तत्प्रवृत्तौ तु[५] तथैव सिद्धे तद्वैय्यर्थ्यम्।[६] 'फलं पचेत्' इत्यत्र तत्प्रवृत्तिः[७]। अन्यथा इयादेशस्य[८] प्रकृतिप्रत्ययापेक्षत्वेन बहिरङ्गत्वाल्लोपानापत्तिः। एवमक्षद्यूः[९] इत्यत्र ऊठो असिद्धत्वाद्यलोपो[१०] न। नाजानन्तर्य ...(परि०51) इत्यस्यान्तरङ्गे कृते इत्यर्थे मानाभावो गौरवं च। वलिलोपे जातबहिराङ्गसि[११]द्धत्वाभावस्यैव कल्पनान्न[१२] तत् सूत्रस्थैतद्भाष्यविरोधः[१३]। किञ्च अत्र सम्प्रसारणस्य वलोपापवादकत्वेन तक्रन्यायेन पुनर्वलोपाप्रवृत्तौ तत्र वकारोच्चारणस्य चारितार्थ्यात्। वव्रेत्यादौ लोपो दुर्वारः भाष्यमपि त्वन्मते असङ्गतम्[१४]। ननु पञ्चेत्यत्र[१५] षट्संज्ञायां नलोपासिद्धत्वस्य न फलमिति नलोपः सुप् ...(8-2-2भा०ष०ख०प्र०आ०पृ०81) इति सूत्रस्थ-

---

[१] ०रङ्गत्वोपपा० V M^2 : ०रङ्गत्वोपा० A^2 ०रङ्गोपपा० A^1 ०रङ्गत्वापा० M^1

[२] इति तु न युक्तम् इति A^2 M^1 : इति न युक्तमिति V A^1 M^2

[३] वस्तुतस्तु A^1 : वस्तुत V A^2 M^1 M^2

[४] स्थानिवत्वाय V A^1 A^2 M^2 : स्थानिवत्वात् M^1

[५] तत्प्रवृत्तौ तु V A^2 M^2 : तत्प्रवृत्तौ A^1 M^1

[६] तद्वैय्यर्थ्यम् V A^1 M^1 M^2 : चेलेक्नोपेरिति निर्देशश्चात्र गमकः A^2

[७] पचेत् इत्यत्र तत्प्रवृत्तिः A^2 M^1 : पचेत् इत्यत्र तत्प्रवृत्तेः V M^2 पचेरित्यत्र तत्प्रवृत्तिः A^1

[८] इयादेशस्य V M^2 : यादेशस्य A^1 इयादेश A^2 om M^1

[९] ०मक्षद्यूः V A^2 M^1 M^2 : ०मक्षद्युः A^1

[१०] असिद्धत्वाद्यलोपो V A^1 A^2 M^2 : असिद्धत्वाभावात् वलोपो M^1

[११] ०हिरङ्गासि० A^1 A^2 M^1: ०हिरङ्गसि० V M^2

[१२] कल्पनान्न V A^1 A^2 M^2 : कल्पनात् M^1

[१३] सूत्रस्थैतद्भाष्यविरोधः V A^1 A^2 M^2 : सूत्रस्थतद्भाष्यविरोधः M^1

[१४] किञ्च ..... त्वन्मते असङ्गतम् V M^2 : om A^1 A^2 M^1

[१५] पञ्चेत्यत्र V M^2 : om A^1 A^2 M^1

भाष्यासङ्गतिः। बहिरङ्गासिद्धत्वाभावेन पञ्चेत्यत्र टाब्वारणाय तदावश्यकत्वात्[१] इत्यत आह -- **पञ्चेत्यत्रेति। सामर्थ्येनेति।** इदं चिन्त्यम्। प्रियपञ्चा द्रौपदी इत्यत्र डाब्ङीपोः निषेधायोक्तव्याख्यानस्यावश्यकत्वात्। व्याख्यानसामर्थ्येन अर्थविशेषकल्पनस्य[२] कुत्राप्यदृष्टत्वाच्च।

[३]

वृत्रहभ्यामिति। ननु त्रिपाद्यां बहिरङ्गपरिभाषायाः अप्रवृत्त्या[३] कथमेतदिति चेन्न। नलोपः सुबिति सूत्रे कृति तुग्ग्रहणाभावे न लोपस्य तुक्यसिद्धत्वाभावे त्रिपाद्याम-प्रवृत्तिबीजस्या[४]सिद्धत्वस्याभावात्। ननु तत्कालप्राप्तिकमितिवत् प्राप्स्यमानमि-त्यपि निवेशनीयम्। वलिलोपसूत्रे भाष्ये अनया[५] परिभाषया वलिलोपे[६] प्राप्स्य-मानसम्प्रसारणासिद्धत्वोक्तेरित्यत[७] आह -- **व्रश्चादिष्विति। तद्वैयर्थ्यमिति।** ननु परम्परया बहिरङ्गत्वानाश्रयणात् ज्ञापितेऽपि न चारितार्थ्यम्। सम्प्रसारणस्य भसंज्ञाद्वारैव बहिरङ्गत्वादिति चेन्न वहेर्णिजन्ताद्विचि ऊठभावाया[८]ङ्गसंज्ञाक्षिप्त-प्रत्ययेन वाहो विशेषणेन साक्षादेव बहिरङ्गत्वात्। ननु ज्ञापितेऽपि पुनर्व्यर्थम्। बहिरङ्गासिद्धत्वेऽपि[९] अन्तरङ्गस्य पूर्वरूपस्य सिद्धत्वेन[१०] तस्य गुणे रूपसिद्धेः।

---

[१] तदावश्यकत्वात् V A^1 A^2 M^2 : एतदावश्यकत्वात् M^1

[२] ०षकल्पनस्य V A^2 M^1 M^2 : ०षस्य A^1

[३] परिभाषायाः अप्रवृत्त्या V A^1 A^2 M^2 : परिभाषाप्रवृत्त्या M^1

[४] ०भावे त्रिपाद्यामप्रवृत्तिबीजस्या० V M^2 M^1 : ०भावेन त्रिपाद्याः प्रवृत्तिबीजस्य० A^1 ०भावेन त्रिपाद्यामप्र वृत्तिबीजस्या० A^2

[५] अनया V A^1 A^2 M^2 : तया M^1

[६] वलिलोपे V A^2 M^2 : om A^1 M^1

[७] ०रणासिद्धत्वोक्तेरित्यत V M^1 M^2 : ०रणासिद्धत्वोक्तिरित्यत A^1 ०रणसिद्धत्वोक्तेरित्यत A^2

[८] ऊठभावाया० A^1 A^2 M^1 : उठ्भावाया० V M^2

[९] सिद्धत्वेऽपि V A^2 M^1 M^2 : सिद्धत्वे A^1

[१०] सिद्धत्वेन V A^2 M^1 M^2 : असिद्धत्वेन A^1

न च सम्प्रसारणाच्च (6-1-108 / 330) इत्यस्य पूर्वपरयोः पूर्वः शिष्यते इत्यर्थात् न दोष इति वाच्यम्। अमि पूर्वः (6-1-107/194) इत्यत्रापि[१] तथापत्तौ राममित्यादौ[२] सुपि च (7-3-102/202) इति दीर्घापत्तेरिति[३] चेन्न; ऊठ्ग्रहणेनैव एकादेशस्य स्थानिसमाननिमित्तकत्वस्यापि कल्पनात्। अत एव क्ङिति च (1-1-5/2217) इति सूत्रे भाष्ये औयतेत्यत्र वृद्धे[४]र्बहिरङ्गत्वमुक्तम्। असिद्धवत् ... (6-4-22 भा०प०ख०द्वि०आ०पृ० 292) सूत्रे भाष्ये पपुषः इत्यादौ सम्प्रसारणशब्देन पूर्वरूपमुपादाय तस्य बहिरङ्गासिद्धत्वमापादितम्। कृन्मेजन्तः (1-1-39/449) इति सूत्रे भाष्ये त्यदाद्यकारपदेन पररूपमादाय[५] सन्निपात (परि० 86) परिभाषया तस्य टाप्[६] निमित्तत्वमापादितम्[७]। ननु कथम् ऊङ्ग्रहणं ज्ञापकम्। प्रष्ठौह इत्यादौ ऊडिदम्[८]....(6-1-176/3717) इति स्वरार्थं तस्यावश्यकत्वादिति चेन्न; स्वरविधायके उहेरपि[९] पाठ्यत्वात्। ह्रस्वपाठेन एकमात्रालाघवात्। वहेः[१०] क्विपः अनभिधानमेतद्भाष्यप्रामाण्यात्। यद्वा ह्रस्वः उठ्विधेयः[११]। स्वरविधायके च ठिदिति

---

[१] इत्यत्रापि V A^1 A^2 M^2 : om M^1

[२] तथापत्तौ राममित्यादौ V M^1 M^2 : तथात्वापत्तौ राममित्यत्र A^1 A^2

[३] दीर्घापत्तेरिति V A^2 M^1 M^2 : दीर्घापत्ति A^1

[४] वृद्धेः V A^2 M^1 M^2 : om A^1

[५] तस्य बहिरङ्गा०.....०पमादाय V M^2 : बहिरङ्गासिद्ध०.....०पमादाय A^1 om A^2 तस्य बहिरङ्गा०.....०पमुपादाय M^1

[६] तस्य टाप् V A^1 M^2 : om A^2 टाप् M^1

[७] निमित्तत्वमापादितम् V A^1 A^2 M^2 : निमित्तत्वमुपपादितम् M^1

[८] ऊडिदम् A^2 M^1 : उडिदम् V A^1 M^2 (ऊडिदम्पदाद्यप्पुम्रैद्युभ्यः)

[९] उहेरपि V M^2 : ऊहेरपि A^1 A^2 M^1

[१०] वहेः V A^1 A^2 M^2 : वाहौ M^1

[११] उठ्विधेयः V A^2 M^1 M^2 : ऊठ्विधेयः A^1

पाठ्यम्। तस्मादूङ्विधानमनन्यार्थमिति भाष्योक्तं ज्ञापकं[१] सम्यगेवेति स्थितम्। **वाहेर्वेति**[२]। अत्र मानं चिन्त्यम्। णिलोपस्य स्थानिवत्वेन[३] ऊठोऽत्र[४] अप्रवृत्तेः।

[४]

विसर्जनीय...(8-3-34/138) सूत्रस्थं कैयटोक्तमनुवदति[५] — **येऽपीति**। नादरणीया[६] इति।

परे तु कार्यकालपक्षेऽपि त्रिपाद्यामप्रवृत्तौ मानाभावः। न च पूर्वं प्रति परस्य असिद्धत्वादित्युक्तयुक्तिर्मूलम्[७]। पूर्वत्र कर्तव्ये परस्य असिद्धत्वेऽपि[८] तत्र कृते परस्यासिद्धत्वे[९] मानाभावात्। त्वयाप्येवमेव शब्दरत्ने शेखरे च[१०] उपपादितत्वाच्च[११]। कर्तरिचर्षिदेवतयोः (3-2-186/3167) इत्यादिनिर्देशाश्च कार्यकालपक्षेऽस्यास्त्रिपाद्यां प्रवृत्तौ गमकाः। अन्यथा विसर्गे तदसङ्गतिः। न चात्र गुणविसर्गयोः तुल्यनिमित्तकत्वेन[१२] नान्तरङ्गबहिरङ्गभावः। विसर्गविधौ रेफस्य स्थानितया उपादानेन उत्तरपदसम्बन्ध्येकवर्णनिमित्तकत्वम्। गुणस्य तु पदद्वयसम्बन्धिवर्णद्वय-

---

[१] ज्ञापकम् V A^1 A^2 M^2 : om M^1

[२] वाहेर्वेति V A^1 A^2 : वाहेति M^1 वाहेर्वोति M^2

[३] स्थानिवत्वेन V A^1 M^1 M^2 : स्थानित्वेन A^2

[४] ऊठोऽत्र A^1 A^2 M^1 : उठोऽत्र V M^2

[५] कैयटोक्तमनुवदति A^1 A^2 M^1 : कैयटमनुवदति V M^2

[६] नादरणीया V A^2 M^1 M^2 : नादरणीय A^1

[७] ०त्युक्तिर्मूलम् V A^2 M^1 M^2 : ०त्युक्तिर्निर्मूलम् A^1

[८] असिद्धत्वेऽपि V A^2 M^1 M^2 : सिद्धत्वेऽपि A^1

[९] ०सिद्धत्वे V A^2 M^1 M^2 : ०द्धत्वेऽपि A^1

[१०] शब्दरत्ने शेखरे च A^2 : शब्दरत्ने V A^1 M^1 M^2

[११] उपपादितत्वाच्च V A^2 M^2 : कथितत्वात् A^1 उदाहृदत्वाच्च M^1

[१२] ०निमित्तकत्वेन V A^2 M^1 M^2 : ०निमित्तत्वेन A^1

निमित्तकत्वमति[१] तत्सम्भवात्। किञ्च सर्वथा[२] अस्यास्त्रिपाद्यामप्रवृत्तौ[३] दध्यत्रेत्यत्र संयोगा-न्तलोप...(8-2-23/54) अप्रवृत्तये[४] कार्तिरित्यत्र निष्ठानत्वाप्रवृत्तये[५] नार्कुट इत्यत्र[६] विसर्ज्जनीयप्रवृत्तये[७] च अनेकवचनारम्भे गौरवम्। एतेषु उक्तकार्याप्रवृत्तये[८] भाष्यवार्त्तिककाराभ्यां बहिरङ्गपरिभाषयैव[९] उक्तत्वेन तदसङ्गतिश्च[१०]। विसर्जनीय.. ...(8-3-34/138) सूत्रस्थमतोऽयुक्तः अयं[११] परिहारो न वा बहिरङ्गलक्षणत्वादिति भाष्यं तु तस्य दोषः ¶ ...(सू० 1-1-58 वा०सं०363) इत्यत्र लत्वग्रहणं कुर्वता वार्त्तिककृता पूर्वत्र कृतेऽपि परस्यासिद्धत्वाङ्गीकारात् तद्रीत्या तं प्रति तत्परिहार-स्यायुक्तत्वाभिप्रायकमिति[१२] न तद्विरोधः। अत एव प्रत्याहाराह्निके नार्नम-निरित्यत्र[१३] णत्वं प्रति वृद्धिरसिद्धेत्युक्तं भाष्ये[१४]। किञ्च वार्त्तिके लत्वग्रहणं प्लायते इत्यत्र लत्वे स्थानिवद्भावार्थम्। अत्रैकादेशापेक्षया विशिष्टसमुदायनिमित्तकं

---

[१] निमित्तकत्वमिति V A^2 M^1 M^2 : निमित्तकमिति A^1

[२] सर्वथा V A^1 A^2 M^2 : सर्वत्र M^1

[३] त्रिपाद्यामप्रवृत्तौ V A^2 M^1 M^2 : त्रिपाद्यां प्रवृत्तौ A^1

[४] अप्रवृत्तये V A^2 M^1 M^2 : प्रवृत्तये A^1

[५] कार्तिरित्यत्र निष्ठानत्वाप्रवृत्तये V A^2 M^2 : कार्तिरित्यत्र निष्ठानत्वप्रवृत्तये A^1 om M^1

[६] नार्कुट इत्यत्र V A^1 A^2 M^2 : नार्कुटिः M^1

[७] विसर्ज्जनीयप्रवृत्तये V M^2 : विसर्जनीयाप्रवृत्तेश्च A^1 विसर्जनीयाप्रवृत्तये A^2 विसर्जनीयप्रवृत्तये M^1

[८] उक्तकार्याप्रवृत्तये V M^2 : उक्तकार्यप्रवृत्तेः A^1 उक्तकार्याप्रवृत्तेः A^2 M^1

[९] परिभाषयैव M^2 : परिभाषायैव V A^1 A^2 M^1

[१०] तदसङ्गतिश्च V A^1 A^2 M^2 : तदसङ्गतिः M^1

[११] ०मतोऽयुक्तः अयं M^1 : ०मतोऽयुक्तः V A^1 M^2 ०मतो युक्तः A^2

[१२] ०यकमिति V A^1 A^2 M^2 : ०यकत्वमिति M^1

[१३] नार्नमनिरित्यत्र V A^1 A^2 M^2 : नार्मनिरित्यत्र M^1

[१४] भाष्ये V A^1 A^2 M^2 : om M^1

लत्वमेव[१] बहिरङ्गमिति न बहिरङ्गपरिभाषया सिद्धिः। विसर्जनीयसूत्रस्थं तु एवम् एषा परिभाषा सिद्धा भवति इत्यन्तमेव भाष्यं[२] सिद्धान्त्युक्तिः। कुतो नु खल्वित्यादित्वेकदेशिन[३]ः । पूर्वत्र कृते परस्यासिद्धत्वे मानाभावात्। फला-भावात्[४] पूर्वोक्तानेकभाष्यविरोधाच्चेति प्राहुः। अन्तरङ्गे कर्तव्ये जातं[५] बहिरङ्गमसिद्धमित्यंशे ज्ञापकमुक्त्वा तत्कालप्राप्तिकम् असिद्धमित्यंशे[६] ज्ञापकमाह-**अत एवेति। परमपि इति।** अपवादो यद्यन्यत्र[७] चरितार्थः इति न्यायादिति भावः।

[५]

सम्बन्धोत्तरमेवेति। ननु साधनसम्बन्धात्[८] पूर्वं क्रियाबोधकत्वाभावे[९] कथं धातुत्वमिति चेन्न;

" धातोः साधनयोगस्य[१०] भाविनः प्रक्रमाद्यथा।
धातुत्वं कर्मभावश्च तथान्यदपि दृश्यताम् ॥" (वाक्य०द्वि०भागे वा०का०श्लोकः 184) इति हरिणैव समाधिकरणात्[११]। अस्यार्थः। यथा भाविसाधन-

---

[१] लत्वमेव V A^2 M^2 : तत्वमेव A^1 लत्वम् M^1

[२] भाष्यं V A^1 A^2 M^1 : भाष्य M^2

[३] खल्वित्यादित्वेकदेशिनः V A^2 M^2 : खल्वित्येकदेशिनः A^1 खल्वित्यादौ त्वेकदेशिनः M^1

[४] फलाभावात् V A^2 M^2 : फलाभावाच्च A^1 M^1

[५] जातं बहिरङ्गमसि० V A^2 M^2 : अजन्तत्बहिरङ्गमसि० A^1 जातस्य बहिरङ्गस्यासि० M^1

[६] असिद्धमित्यंशे V A^2 M^1 M^2 : प्रसिद्धमित्यंशे A^1

[७] यद्यन्यत्र A^1 M^1 : यद्यप्यन्यत्र V A^2 M^2

[८] साधनसम्बन्धात् A^1 A^2 M^1 : साधनसम्भवात् V M^2

[९] क्रियाबोधकत्वाभावे V A^2 M^1 M^2 : क्रियाबोधाभावेन A^1

[१०] ०योगस्य V A^2 M^1 M^2 : ०योग्यस्य A^1

[११] समाधिकरणात् A^1 M^1 : समानाधिकरणात् V A^2 M^2

सम्बन्धाश्रयेण[१] क्रियावाचित्वमाश्रित्य धातुसंज्ञोच्यते तथा च[२] भावीषि कर्मत्वमाश्रित्येषिकर्मत्वमुक्तम्[३], तथा भाव्युपसर्गसम्बन्धादुपक्रम एव विशिष्टक्रियावचनत्वं[४] दृश्यतामिति। कर्मणि लकारासिद्धिं[५] परिहरति -- **उपसर्गद्योत्येति**। पूर्वं धातुरुपसर्गेण युज्यते इत्यस्य तदर्थेन युज्यते इत्यर्थकल्पनप्रतिषेध[६] इति भावः। **एवञ्च इति**॥ साधनसम्बन्धात्पूर्वमु-पसर्गद्योत्यार्थान्तर्भाविण[७] धातुनैव अर्थाभिधाने[८] उपसर्गार्थस्य पूर्वमुपस्थित्या[९] पूर्वोपस्थितार्थनिमित्तकत्वरूपमन्तरङ्गत्वं स्फुटमिति[१०] भावः। **णत्वमिति**। इदं चिन्त्यम्। त्रिपाद्यामन्तरङ्गपरिभाषाया अप्रवृत्तेः। अन्तरङ्गत्वात्सवर्णदीर्घ इति वार्णादाङ्गम्...(परि० 55) इति तु समकाल[११]प्राप्तिक एवेति भावः।

[६]

किञ्चेति। पूर्वं तिङि तु[१२] विशिष्टेनैव सामर्थ्यं स्यात्[१३]। विभक्तिसमवधाने तदन्तरे-

---

[१] भाविसाधनसम्बन्धाश्रयेण V A^2 M^2 : भाविसाधनसम्बन्धश्रयण A^1 भावसाधनसम्बन्धाश्रयेण M^1

[२] तथा च V A^1 M^1 M^2 : यथा च M^1

[३] भावीषिकर्मत्वमाश्रित्येषिकर्मत्वमुक्तम् V A^1 M^2 : भावीषिकर्मत्वमाश्रित्य उपक्रम एव इषिकत्वमुक्तम् A^2 भाविकर्मत्वमाश्रित्य उपक्रम एव कर्मत्वमुक्तम् M^1

[४] ०यावचनत्वं V A^1 A^2 M^2 : ०यावाचकत्वं M^1

[५] लकारासिद्धिं V A^1 A^2 M^2 : लकारसिद्धिं M^1

[६] इत्यर्थकल्पनप्रतिषेधः V M^2 : इत्यर्थस्य प्रतिषेधः A^2 इत्यर्थकस्य न प्रतिषेधः A^1 M^1

[७] ०त्यार्थान्तर्भाविण V A^2 M^2: ०त्यार्थान्तर्भाविणैव A^1 ०त्यार्थम् अन्तर्भाविण M^1

[८] धातुनैव अर्थाभिधाने V A^2 M^1 M^2 : धातुनैकार्थाभिधाने A^1

[९] पूर्वमुपस्थित्या V A^2 M^1 M^2 : पूर्वमुपस्थितार्थ A^1

[१०] स्फुटमिति M^1 : सुट इति V A^1 A^2 M^2

[११] समकाल० V A^2 M^2 : समानकाल० A^1 M^1

[१२] तु V A^1 M^2 : नु A^2 ति M^1

[१३] स्यात् V A^1 A^2 M^2 : न स्यात् M^1

णैकार्थीभावस्य कल्पनात्[१]। तत्र अतिङ्यपि साधन[२]सम्बन्धो जायते[३] एवेति तदा समासो दुर्वारः। तिङ् पदेन तिङ् भाविनोऽपि ग्रहणात् । प्रपिपठिषतीत्यादौ समानकर्तृकादित्युक्तेः। सनर्थ[४]साधनेनैव प्रकृतेरपि तदाकाङ्क्षाशान्तेः सनेकार्थी[५] भावात्तद्विशेषणत्वाच्च प्रकृत्यर्थस्य तदुत्तरं प्रादियोग[६] इति न समासः[७]। नेर्विशः (1-3-17/2683) इत्यादेस्तत्परत्वयोग्यादित्यर्थः[८]। **अलं बहुनेति।**

परे तु साधनसम्बन्धात्पूर्वम्[९] उपसर्गद्योत्यार्थान्तर्भावेण धातोः वृत्तावुपसर्गाप्रयोगे[१०] हेत्वभावात्[११]। तदर्थे वृत्तिमतः प्रयोगे[१२] एव तदर्थप्रतीतिनियमात्। अन्यथा टाबाद्यभावेऽपि[१३] खट्वादितः[१४] स्त्रीत्वादिप्रत्यय प्रसङ्गात्।

---

[१] कल्पनात् V A^2 M^1 M^2 : अकल्पनात् A^1

[२] अतिङ्यपि साधन० V M^2 : अतिङिति निषेधान्न दोषः। गतिकारकोपपदानामिति त्वेतल्लक्ष्यार्थकथनम् । न च लकारमात्रोत्पत्त्यापि साधननसं० A^1 अतिङिति निषेधान्न दोषः। गतिकारकोपपदानामितित्वेतल्लब्धार्थकथनम् । न च लकारमात्रो त्पत्त्यापि साधननसं० A^2 अतिङिति निषेधान्न दोषः। गतिकारकोपपदानामितित्वेतल्लब्धार्थकथनम् । न च लकारमात्रोपस्थित्यापि साधन० M^1

[३] जायते M^1 : जात V A^1 A^2 M^2

[४] सनर्थ० V A^1 A^2 M^2 : समर्थ० M^1

[५] सनेकार्थी० V A^1 M^2 : सनैकार्थी० A^2 M^1

[६] प्रादियोग० V A^2 M^1 M^2 : प्रागितियो० A^1

[७] समासः V A^2 M^2 : समासाः A^1 M^1

[८] ०वात्तद्वि०.....०ग्यादित्यर्थः V A^1 A^2 M^2 : ०वात्तद्वत् इत्यर्थः M^1

[९] साधनसम्बन्धात्पूर्वम् A^1 A^2 M^1 : सम्बन्धात्पूर्वम् V M^2

[१०] ०सर्गाप्रयोगे V A^2 M^1 M^2 : ०सर्गायोगे A^1

[११] हेतुत्वाभावात् M^1 : हेत्वभावात् V A^1 A^2 M^2

[१२] प्रयोगे V A^1 M^1 M^2 : प्रयोग A^2

[१३] टाबाद्यभावेऽपि V A^2 M^2 : टाबभावेऽपि A^1 M^1

[१४] खट्वादितः V A^1 M^1 A^2 : खट्चादितः M^2

किञ्च एवं सति सञ्चस्कारेत्यादौ द्वित्वादितः पूर्वं सुडनापत्तिः[१]। एवञ्च पूर्वम् उपसर्गेण योगो नाम तदर्थसम्बन्धः। ततः उपसर्गयोगात्पूर्वं[२] साधनकार्ययोगः। ततः उपसर्गयोग[३] इति मञ्जूषायां (मञ्जू०नि०नि०पृ०598) त्वयोक्तत्वेन उपसर्गार्थस्य कृञादितः एव प्रतीतावपि साधनकार्यं द्वित्वादितः पूर्वमुपसर्गयोगाभावेन सम्परिभ्यां[४] कृञः परत्वाभावात्। तत्परत्वयोग्यस्य[५] कृञः इत्यर्थत्वे[६] तु यदुपसर्गनिमित्तकं कार्यमित्यादित्वदीयप्रयासवैयर्थ्यम्। सम्परिभ्यां परस्यापि[७] कृञस्तद्योग्यत्वेन तस्य सुडापत्तिश्च। यदि सम्परिभ्याम् इति तृतीया[८] तदा व्यवहितस्यापि सुट्प्रसङ्गः[९]। एतेन नेर्विशः[१०] (1-3-17/2683) संपृचा...(3-2-142/3122) इत्यादौ[११] नव्योक्तोपपत्तिः[१२] परास्ता। अत एव गोसन्दाय इत्यादिसिद्धिः। अत एव च[१३] आतोऽनुपसर्गे कः (3-2-3/2915) इत्यत्र[१४]

---

[१] पूर्वं सुडनापत्तिः V A^2 M^1 M^2 : सुडनापत्तिः A^1

[२] उपसर्गयोगात्पूर्वं V A^1 A^2 M^2 : उपसर्गात्पूर्वं M^1

[३] उपसर्गयोगः V A^2 M^2 : उपसर्गद्योतकः A^1 M^1

[४] सम्परिभ्यां V A^2 M^1 M^2 : सम्परिभ्यामिति A^1

[५] ०रत्वयोग्यस्य V A^1 A^2 M^2 : ० रत्वयोगस्य M^1

[६] कृञ इत्यर्थत्वे V A^1 M^2 : कृञर्थत्वे A^2 स्वकृञोऽर्थत्वे M^1

[७] सम्परिभ्यां परस्यापि A^2 M^1 : सम्परिभ्यामपरस्यापि V A^1 M^2

[८] तृतीया V A^2 M^1 M^2 : तृतीयया A^1

[९] सुट्प्रसङ्गः V A^2 M^1 M^2 : संप्रसङ्गः A^1

[१०] नेर्विशः M^1 : नेः V A^1 A^2 M^2

[११] संपृचेत्यादौ V A^1 A^2 M^2 : संपृच्छेत्यादौ M^1

[१२] नव्योक्तोपपत्तिः V A^1 A^2 M^2 : न भाष्योक्तानुपपत्तिः M^1

[१३] एव च V A^2 M^1 M^2 : एव A^1

[१४] इत्यत्र V A^1 A^2 M^2 : इत्यत्रापि M^1

अनुपसर्ग इति चरितार्थम्। तदेतदभिप्रेत्य सुट्कात्पूर्वः (6-1-135 भा०प० ख० प०आ०पृ०137) गतिर्गतौ ...(8-1-70भा०ष०ख०द्वि०आ०पृ०68-69) इति सूत्रयोः भाष्यकैयटयोः पूर्वं धातुः साधनेन युज्यते इत्युपमृद्य[१] पूर्वं धातुरुपसर्गेण युज्यते इति सिद्धान्तितम्[२]। हरिणाप्युक्तम्

"क्रियाविशेषाः सङ्घातैः प्रक्रम्यन्ते[३] तथाविधाः। ¶

(वाक्य०द्वि०भागे वा०का०श्लोकः 181)

कार्याणाम् अन्तरङ्गत्वमेवं धातूपसर्गयोः ।

साधनैर्याति सम्बन्धं[४] तथा भूतैव सा क्रिया ॥"

(वाक्य०द्वि०भागे वा०का०श्लोकः 182श्लोकः) इति।

कथं तर्हि प्रत्ययः - अध्यैत[५] इत्यादिसिद्धिरिति चेत्[६]; पूर्वं धातुः साधनेन युज्यते इति[७] सिद्धान्तादरेणेत्यवेहि। अयं च[८] सिद्धान्तो न धातुलोप...(1-1-4/2656) सूत्रे उपपदमतिङ् (2-2-19 भा०द्वि०ख०प्र०आ०पृ०440) इति सूत्रे च[९] भाष्यकैयटयोः स्पष्टः। अत्र प्रत्ययः णेरध्ययने वृत्तम् (7-2-26/3066) इत्यादिनिर्देशाः गमकाः। अत्र च साधनपदं धातुप्रकृतिकप्रत्ययार्थपरं तत्प्रकृतिकप्रत्ययपरं वा । तेन अभि-

---

[१] इत्युपमृद्य V A^2 M^2 : om A^1 इत्युपगृह्य M^1

[२] पूर्वं धातुः सा०.....सिद्धान्तितम् भाष्यकैयटयोः V A^2 M^1 M^2 : पूर्वं धातुरुपसर्गेणेति सिद्धान्तितम्। पूर्वं धातुः साधनेनेत्यादि A^1

[३] प्रक्रम्यन्ते V A^1 A^2 M^2 : प्रकल्प्यन्ते M^1

[४] साधनैर्यातिसम्बन्धं V A^1 A^2 M^2 : साधनैया च सम्बन्धम् M^1

[५] प्रत्ययः -अध्यैत V A^1 A^2 M^2 : अध्ययन M^1

[६] चेत् V A^1 A^2 M^2 : चेन्न M^1

[७] साधनेन युज्यते इति V A^2 M^1 M^2 : साधनेनेति A^1

[८] च V A^1 A^2 M^2 : om M^1

[९] उपपदमतिङ् इति सूत्रे च V A^2 M^2 : उपपदमतिङ् इति सूत्रे A^1 अतना समासः M^1

षावयति इत्यादौ ण्यन्तेन अभेर्धातुना समासः।[१] नाप्युपसर्गस्य भावतिङा समासः। नन्वेवं नेर्विशः (1-3-17/2683) इत्यादौ पूर्वं धातुरुपसर्गेणेत्यस्यावश्यकतया[२] तत्र उपपदमतिङ् (2-2-19/782) इति समासो दुर्वार इति चेत्तवापि संचस्कारेत्यादौ समासो दुर्वार इति[३] तुल्यम्। यदि तु उपसञ्जनिष्यमाणनिमित्तोऽप्यपवादः[४]...(परि० 65) इति न्यायात्पूर्वं तिङाद्युत्पत्त्या न दोषः। उपपदमतिङिति सूत्रे पूर्वं धातुः साधनेन युज्यत इति न्यायेन भाष्यकृतां परिहारस्तु निविशत इत्याद्यतिरिक्तविषयः। तत्रापि[५] धातुः साधनेन युज्यते[६] इति न्यायाश्रयणमपि उपसञ्जनिष्यमाणन्यायानुग्रहायैव। न धातुलोप...(1-1-4/2656) सूत्रे भाष्ये प्रेद्ध इत्यादौ पूर्वं धातुः साधनेनेति न्यायाश्रयणमपि उक्तन्यायानुग्रहायैव। पूर्वं धातुरुपसर्गेण इत्यादेः अन्तरङ्गत्वाद्गुणे उपसञ्जनिष्यमाणन्यायाननुग्रहः[७] स्फुट एवेत्युच्यते तर्हि[८] ममाप्येतत्तुल्यमेव। ननु परावनुपात्यय[९]...(3-3-38/3210) इत्यादिविषये पूर्वं धातुरुपसर्गेणेत्यस्यावश्यकतया पूर्वं सवर्णदीर्घे पराय इत्याद्यापत्तिरिति चेन्न। विभि-

---

[१] अत्र च साध० .....०र्धातुना समासः V A^1 A^2 M^2 : अतना समासः M^1

[२] ०त्यस्यावश्यकतया V A^1 M^2 : ०त्यस्यावश्यतया A^2 ०त्यावश्यकतया M^1

[३] इति V A^1 A^2 M^2 : एवेति M^1

[४] निमित्तोऽप्यपवादः V A^2 M^1 M^2 : निमित्तोऽपवादः A^1

[५] न्यायात्पूर्वं तिङाद्युत्पत्त्या न दोषः। उपपदमतिङिति सूत्रे पूर्वं धातुः साधनेन युज्यत इति न्यायेन भाष्यकृतां परिहारस्तु निविशत इत्याद्यतिरिक्तविषयः। तत्रापि A^1 A^2 M^1 : न्यायापूर्वं V M^2

[६] साधनेन युज्यते A^1 : साधनेन V A^2 M^1 M^2

[७] ०न्यायाननुग्रहः V A^1 A^2 M^2 : ०न्यायानुग्रहः M^1

[८] तर्हि V A^1 A^2 M^2 : om M^1

[९] परावनुपात्यय A^1 M^1 : परावनुयात्यय V M^2 परावनुपात A^2

न्नकालिकयोरपि वार्णादाङ्गं बलीयः (परि०55) इति न्यायाङ्गीकारात्। व्युपयोः शेतेः पर्याये (3-3-39/3211) इति निर्देशोऽप्यत्र गमकः। अतिप्रसङ्गस्त्वनित्यत्वाद्वारणीयः। ननु प्रत्ययः इत्यादिरूपाणामप्येवं[१] सिद्धौ पूर्वं धातुः साधनेनेति किमर्थमिति चेत् अध्यगीष्टेत्यादौ अडागमस्य[२] गाङादेर्दीर्घादितः पूर्वं प्रवृत्त्यर्थमित्यवेहीत्याहुः। **यासुडन्तरङ्ग इति**[३]। अत्र पाठद्वयम्। यासुडन्तरङ्गः इत्युत्तरम्। एतेनेत्यारभ्य स्यादीनां बहिरङ्गत्वाच्चेत्येकः। क्वाप्यनु[४]ल्लेखाच्चेत्युत्तर-मतेनेत्या[५]दिरित्यपरः। तत्र द्वितीयः[६] सुगमः। आद्ये एतेनेत्यस्य विशेषापेक्षस्य यत्र सामान्यधर्मनिमित्तक त्वमपि तत्रैव तस्य[७] बहिरङ्गत्वाङ्गीकारेणेत्यर्थः ।

[८]

सिद्धान्तिनेति। अन्तरङ्गत्वात् बहुव्रीहिरिति वदन्तमपेक्ष्यैष सिद्धान्ती। परमसिद्धान्ती[८] तु नैष द्विगुः कस्तर्हि बहुव्रीहिरिति वदन्नेवेति बोध्यम्। **अन्यथेति**। सामान्यापेक्षान्तरङ्गोत्सर्गेण विशेषापेक्षबहिरङ्गापवादबाध इत्यर्थः। **सूचित**[९] **इति**।

---

[१] रूपाणामप्येवं V M^1 M^2 : रूपाणामप्येवमेव A^1 A^2

[२] अध्यगीष्टेत्यादौ अडागमस्य V M^2 : अध्यगीष्टेत्यादौ अनाङ्गस्य A^1A^2 M^1

[३] यासुडन्तरङ्ग इति V A^1 M^2 : om A^2 M^1

[४] क्वाप्यनु० A^2 M^1 : काप्यनु० V A^1 M^2

[५] मतेनेत्या० V A^1A^2 M^2 : मेतेनेत्या० M^1

[६] तत्र द्वितीयः V A^1A^2 M^2 : om M^1

[७] ०त्वमपि तत्रैव तस्य V A^2 M^2 : ०त्वमप्यत्रैव तस्य A^1 ०त्वं तस्यैव तत्प्रति M^1

[८] परमसिद्धान्ती V A^1 A^2 M^2 : परन्तु सिद्धान्ती M^1

[९] सूचित V A^1 A^2 M^2 : सूच्यत M^1

तत्र हि। अरुदितम्[१] अरुदितेत्यत्रेडपेक्षायान्तरङ्गाः[२] ... तांतंतामः (3-4-101/2199) इत्युक्तम्।

परे तु विशेषापेक्षस्य बहिरङ्गत्वं पुंयोगात् ...(4-1-48/504) इति सूत्रस्थभाष्य-प्रामाण्यात्। तत्र हि साङ्कूटिनमित्यत्र विशेषापेक्षत्वेन बहिरङ्गम् अणि नुणः (5-4-15/3219) इत्यणं बाधित्वा अन्तरङ्गत्वात् कुगति[३]...(2-2-18/761) इति समासः इत्युक्तम्। तामादीनां प्रत्ययविशेषापेक्षत्वेऽपि इटः प्रकृतिविशेषापेक्षत्वेन[४] तौल्यान्न पादःपत् (6-4-130भा०प०ख०च०आ०पृ०349) इति सूत्रस्थभाष्यविरोधः। यत्र तु विशेषापेक्षोऽपवादः तत्र तेनैव सामान्यापेक्षस्य[५] बाध इति दिगित्याहुः[६]। **पूर्वोपस्थितेति**। पूर्वोपात्तेत्यर्थः। तेन चङ् निमित्तत्वात्तिप एव पूर्वमुपस्थितिरिति निरस्तम्[७]।

[९]

वाय्वोरित्यादाविति। वस्तुतस्तु वलि लोपविषयेऽन्तरङ्गपरिभाषाया[८] अप्रवृत्त्या स्थानिवत्वेन अत्र लोपनिवारणं भाष्यकृता कृतम्[९]। न तु जातस्य बहिरङ्गस्य इत्यादिनिमित्तं तु न युक्तम्। नन्वेवं अक्षद्यूरित्युत्तरग्रन्थविरोधात्। दध्यत्रेत्यत्र

---

[१] तत्र हि। अरुदितम् V A^1 M^2 : तत्र हि A^2 अरुदितम् M^1

[२] ०पेक्षायान्तरङ्गाः V A^2 M^1 M^2 : ०पेक्षयान्तरङ्गाः A^1

[३] कुगति... A^1 : गति... V A^2 M^1 M^2

[४] ०क्षत्वेन V A^1 A^2 M^2 : ०क्षत्वे M^1

[५] ०पेक्षस्य A^1 M^1 : ०पेक्ष्यस्य V A^2 M^2

[६] बाध इति दिगित्याहुः A^1 A^2 M^1 : बाध इत्याहुः V M^2

[७] निरस्तम् V A^1 A^2 M^2 : निरस्ता M^1

[८] वलि लोपविषयेऽन्तरङ्गपरिभाषाया M^1 : वलि लोपेऽन्तरङ्गपरिभाषाया V A^1 A^2 M^2

[९] भाष्यकृता कृतम् M^1 : भाष्यकृताम् V A^1 A^2 M^2

संयोगान्तलोपस्य बहिरङ्गपरिभाषया वारणपरभाष्यासङ्गतेश्च[१]। पपुष[२] इत्यादौ बहिरङ्गपरिभाषया सम्प्रसारणस्यासिद्धत्वेन अतो लोपः (6-4-48/2308) अनापत्ति[३]प्रतिपादकासिद्धवत् ...(6-4-22भा०प०ख०द्वि०पृ०293) सूत्रस्थभाष्या-सङ्गतेश्च। लोकन्यायसिद्धमन्तरङ्गत्वमादाय ज्ञापकसिद्धपरिभाषया तदाश्रये जातबहिरङ्गासिद्धत्वबोधने बाधकाभावाच्च[४]। **नव्यमतेऽपि** दीक्षितमतेऽपि इत्यर्थः[५] ॥ ५० ॥

नाजानन्तर्ये बहिष्ट्वप्रक्लृप्तिः ॥ ५१ ॥

[१]

एकादेशे इति[६]। अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यप्[७] बाधते (परि० 54) इति तु[८] अन्तरङ्गनिमित्तविनाशकल्यप[९] एव प्राबल्यबोधकमिति भावः। नन्विणः पूर्वपदसम्बन्धित्वेऽसिचदित्यस्योत्तरपदत्वेन[१०] सात्पदाद्योः (8-3-111/3531)

---

[१] बहिरङ्गस्य इत्यादिनिमित्तं तु न युक्तम्। नन्वेवं अक्षद्यूरित्युत्तरग्रन्थविरोधात्। दध्यत्रेत्यत्र संयोगान्तलोपस्य बहिरङ्गपरिभाषया वारणपरभाष्यासङ्गतेश्च A^2 : बहिरङ्गस्य इत्यादिनिमित्तम्। तन्न युक्तम्। नन्वेवं अक्षद्यूरित्युत्तरग्रन्थविरोधात्। दध्यत्रेत्यत्र संयोगान्तलोपस्य बहिरङ्गपरिभाषया भाष्यासङ्गतेश्च A^1 बहिरङ्गस्य V M^1 M^2

[२] भाष्यासङ्गतेश्च। पपुषः V A^2 M^1 M^2 : om A^1

[३] अतोलोपानापत्ति० V A^2 M^1 M^2 : अतोनापरि० A^1

[४] बाधकाभावाच्च V A^2 M^1 M^2 : बाधकाभावात् A^1

[५] दीक्षितमतेऽपि इत्यर्थः M^1 : दीक्षितमतेऽपि V A^1 A^2 M^2

[6] एकादेशे इति V A^1 A^2 M^1 : एकादेशेति M^2

[७] ल्यप् V A^2 M^1 M^2 : लुक् A^1

[८] तु V A^2 M^1 M^2 : इति A^1

[९] ल्यप A^1 A^2 M^1 : ल्यपनाय V M^2

[१०] पदसम्बन्धित्वेन M^1 : पदत्वेन V A^1 A^2 M^2

इत्यनेनैव षत्वाभावे सिद्धे षत्वग्रहणवैयर्थ्यमत आह -- **एकादेशस्येति**[१]

[२]

तेन इति। अन्तरङ्ग इत्यस्यानुवर्तनेन इत्यर्थः। **अत एवेति।** जातस्येति निवेशादेवेत्यर्थः। **अत एवेति।** अज्निरूपितमानन्तर्यमनिवेश्याज्निष्ठानन्तर्यस्य[२] निवेशादेवेत्यर्थः।

[३]

अत एवाचः परस्मिन्निति सूत्रे इति। नाजानन्तर्य ...(परि० 51) इति परिभाषामाश्रित्य तत्र जातस्येति निवेशापेक्षयैतद्भाष्येणैतदभावक[३]ल्पनमेव लघ्विति भावः। **इत्यलमिति।**

परे तु न तावत्तुग्ग्रहणमस्यां[४] लिङ्गम्। त्वद्रीत्या एकादेशस्य पूर्वपदसम्बन्धित्वे[५] तु कोषि[६] पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वात्। षत्ववत्स[७]ः। किञ्च धातूपसर्गयोः कार्यस्य साधनयोगनिमित्त[८]कार्यातिरिक्तकार्यापेक्षया[९] अन्तरङ्गत्वस्य त्वया[१०]

---

[१] एकादेशस्येति V A^2 M^1 M^2 : एकदेशस्येति A^1

[२] ०ज्निष्ठानन्तर्यस्य V A^2 M^1 M^2 : ०ज्निष्ठान्यानन्तर्यस्य A^1

[३] तदभावक० V A^1 M^1 M^2 : तदभाव इति क० A^2

[४] ०मस्यां V A^1 A^2 M^2 : ०मस्याः M^1

[५] ०न्धित्वे M^1 : ०न्धित्वेन V A^1 A^2 M^2

[६] कोषि V M^2 : कोपि A^1 A^2 M^1

[७] षत्ववत्सः। किञ्च V M^2 : षत्ववत्। किञ्च A^1 A^2 किन्तु M^1

[८] ०योगनिमित्त० V A^2 M^1 M^2: ०योग्यनिमित्त० A^1

[९] कार्यातिरिक्तकार्यापेक्षया V A^1 A^2 M^2 : कार्यापेक्षया M^1

[१०] त्वया V A^1 A^2 M^2 : om M^1

पूर्वमुपपादितत्वेन[१] क्त्वाप्रत्ययस्य च असाधन[२]बोधकत्वेन तुगपेक्षयैका[३]देशस्यैव अन्तरङ्गत्वम्। किञ्च साधनकार्यस्य अन्तरङ्गत्वे उपसर्गयोगात् पूर्वं साधनयोगेन पूर्वोपस्थितनिमित्तकत्वं बीजम्। प्रकृते च तुकः उपसर्गयोगोत्तरोत्पत्ति-कल्यप्निमित्तकत्वेन तद्बीजाभावेन[४] बहिरङ्गतया ततोऽप्येकादेशस्यैव अन्तरङ्गत्वं सञ्चस्कार इत्यादौ दित्वादितः सुट इव। अन्यथा तत्रापि द्वित्वादितः सुटो बहिरङ्गत्वापत्तिः। प्रेद्ध इत्यादौ तु[५] पूर्वोपस्थितनिमित्तत्वेन[६] निषेधस्यान्तरङ्गत्वम्। गुणस्य तु[७] अनन्तरोपस्थितिनिमित्तकत्वेन[८] बहिरङ्गत्वम्। न तु पदद्वयसम्बन्धिवर्णद्वयनिमित्तत्वात्। पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वेन बहिरङ्गत्वं तु[९] धातूपसर्गकार्यभिन्न एव[१०]। यत्र तु धातूपसर्गान्यतरमात्रनिमित्तकमुभयनिमित्तकत्वं[११] च तत्राद्यमेवान्तरङ्गम्[१२]।

---

[१] पूर्वमुपपादितत्वेन V M^2 : पूर्वमुक्तत्वेन A^1 A^2 M^1

[२] साधन० A^1 A^2 M^1 : असाधन० V M^2

[३] तुगपेक्षयैका० V A^2 M^1 M^2 : तुगपेक्षैका० A^1

[४] पूर्वोपस्थि०.....०भावेन V M^2 : पूर्वोपस्थि०.....०भावे A^2 पूर्वोपस्थितिनिमित्तकत्व निमित्तबीजा भावेन A^1 उपसर्गयोगात्पूर्वोपस्थितिकत्वनिमित्तकत्वेन बीजाभावः M^1

[५] तु V A^1 A^2 M^2 : om M^1

[६] पूर्वोपस्थितनिमित्तत्वेन V M^2 : पूर्वोपस्थितिनिमित्तकत्वेन A^1 A^2 M^1

[७] गुणस्य तु A^2 M^1 : गुणस्य V A^1 M^2

[८] ० रोपस्थितिनिमित्तकत्वेन V A^2 M^1 M^2 : ० रोपस्थितनिमित्तकेनैव A^1

[९] न तु पदद्वय० .....०कत्वेन बहिरङ्गत्वं तु V M^2 : न तु पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वम्। पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वेन बहिरङ्गत्वं A^1 न तु पदद्वयसम्बन्धिवर्णद्वयनिमित्तकत्वात्। पदद्वयसम्बन्धिवर्णद्वयानिमित्तकत्वेन बहिरङ्गत्वं तु A^2 om M^1

[१०] कार्यभिन्न एव V A^2 M^1 M^2 : ०कार्य एव भिन्न एव A^1

[११] ०त्तकत्वं M^1 : ०त्तकं V A^1 A^2 M^2

[१२] ०मेवान्तरङ्गम् V A^2 M^2 : ०मेवान्तरङ्गत्वम् A^1 M^1

यथा प्रत्यगित्यादौ[१] संयोगान्तलोपः। प्रकृते तु न तथा। तुको ल्यब्निमित्तकस्यापि[२] सत्त्वात्। किञ्च षत्वतुकोः इत्यत्र तुग्ग्रहणस्य फलं वृक्षस्य इः वृक्षेः तस्य छत्रं वृक्षेछत्रमित्यादौ दीर्घात् पदान्ताद्वा (6-1-76/149) इति तुग-भावः। न हि तत्रान्तरङ्गत्वं तुकः। किञ्चाधीत्य इत्यादावपि अन्तरङ्गनिमित्तविनाशकेति निवेशे मानाभावेनान्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्[३] बाधत इति (परि० 54) परिभाषयैकादेशं[४] बाधित्वा ल्यपि दीर्घतुकोः प्राप्तयोर्नित्यत्वात्परत्वादन्तरङ्गत्वाच्च तुकः पूर्वं दीर्घे तुगप्राप्तौ[५] तदर्थं षत्वतुकोः....(6-1-86/3333) इत्यत्र तुग्ग्रहणम्। अत एव पराजग्ध्येति[६] सिद्धम्। अन्यथात्राप्येकादेशे[७] जग्धिं बाधित्वा ल्यपि पश्चाज्जग्ध्यादेशे एकादेशस्यापि तेनापहारापत्तिः। ममत्वेकादेशात्पूर्वं ल्यपि अन्तरङ्गमपि एकादेशं[८] बाधित्वा प्रतिपदविधित्वेन जग्ध्यादेशे तत्सिद्धिः। यद्वात्र[९] जग्ध्यादेशस्य पूर्वोपस्थितिनिमित्तकत्वेन एकादेशतोऽन्तरङ्गत्वं नित्यत्वं[१०] चेत्युक्तपरिभाषया

---

[१] प्रत्यगित्यादौ V A^1 M^1 M^2 : प्रत्यणित्यादौ A^2

[२] निमित्तकस्यापि V M^2 : निमित्तकत्वस्यापि A^1 A^2 M^1

[३] ल्यब् V A^2 M^1 M^2 : लुग् A^1

[४] ०यैकादेशं V A^2 M^1 M^2 : ०यैकदेशं A^1

[५] तुगप्राप्तौ A^2 M^1 : तुगप्राप्तेः V A^1 M^2

[६] पराजग्धेति V A^2 M^1 M^2 : पराजग्धेति A^1

[७] अन्यथात्राप्येकादेशे V A^2 M^1 : अत्रापि एकदेशे A^1 M^2

[८] एकादे० ....०कादेशं V A^2 M^2 : एकादेशानापत्तिः। ममत्वेकारात्पूर्वं ल्यपि अन्तरङ्गमपि एकादेशं A^1 तदसिद्धिः। ल्यबुत्पत्तिपर्यन्तमेकादेशप्रवृत्तौ तु पूर्वं ल्यपि तत एकादेशजग्धिभावयोः प्राप्तौ लकारादेशं M^1

[९] यद्वात्र A^1 A^2 M^1 : यत्र V M^2

[१०] एकादेशतोऽन्तरङ्गत्वं नित्यत्वं V A^1 A^2 M^2 : एकादेशस्यान्तरङ्गत्वं M^1

ल्यपि एकादेशं बाधित्वा जग्धिसिद्धिः। तुकस्तु ल्यबुत्तरमेव प्रवृत्त्या[१] अनन्तरोपस्थितनिमित्तकत्वेन[२] बहिरङ्गत्वात्ततः पूर्वमन्तरङ्गत्वान्नित्यत्वाच्चैकादेशे[३] षत्वतुकोरिति तस्यासिद्धत्वात्तुकः सिद्धिः। षत्वग्रहणं तु ज्ञापकमत्र। त्रैपादिकेऽन्तरङ्गेप्येतत्प्रवृत्तेरुपपादितत्त्वात्। इणः पूर्वपदसम्बन्धित्वेनेत्याद्ययुक्तम्। अन्तवद्भावस्य[४] कार्यार्थतयाऽन्तरङ्गपरिभाषाप्रवृत्तिविघटनात्तदप्रवृत्तेः[५]। न च अवास्तम्भत[६] इत्यत्र अवाच्चालम्बनाविदूर्ययोः (8-3-68/2273) इति षत्वे अवाटोरेका[७]देशस्यासिद्धत्वार्थं षत्वग्रहणस्यावश्यकतया कथं वैय्यर्थ्यम् ? एकादेशात् षत्वस्यैवात्र बहिरङ्गत्वात्। किञ्च परासेधदित्यादौ[८] षत्वाभावाय तत्[९]। अत्रोपसर्गाटो[१०]रेकादेशस्यासिद्धत्वेन उपसर्गस्थेणः[११] परत्वाभावात् न षत्वम्। अत एव सहेः साडः सः (8-3-56 भा०ष०ख०द्वि०आ०पृ०186) इति सूत्रे सहि ग्रहणस्य सह अडेन सहितः साडः तस्यापत्यं साडिरिति फलमुपन्यस्य षत्वतुकोः इत्यनेन खण्डितं भाष्यकृतेति[१२] वाच्यम् । ज्ञापकपरभाष्यप्रामाण्येन

---

[१] प्रवृत्त्या V A^2 M^1 M^2 : प्रवृत्त्या बहिरङ्गत्वम् A^1

[२] अनन्तरोपस्थितनिमित्तकत्वेन V A^2 M^2 : अनन्तरोपस्थितिनिमित्तत्वेन A^1 M^1

[३] पूर्वमन्तरङ्गत्वान्नित्यत्वाच्चैकादेशे V M^1 M^2 : पूर्वमन्तरङ्गत्वात्परत्वान्नित्यत्वाच्च A^1 A^2

[४] अन्तवद्भावस्य V A^1 A^2 M^2 : अन्तरङ्गवद्भावस्य M^1

[५] ०प्रवृत्तिविघटनात्तद० V M^2 : ०प्रवृत्तिविघटनाय तद० A^1 A^2 विघटनाय तद० M^1

[६] अवास्तम्भत V M^1 M^2 : अवतंस्तम्भ A^1 अवस्त A^2

[७] अवाटोरेका० V A^1 M^1 M^2 : अवाङ्गोरेका० A^2

[८] परासेधदि०V M^1 M^2 : परासेध्यदि० A^1 परासेद्धदि० A^2

[९] षत्वाभावाय तत् A^1 A^2 M^1 : षत्वाभावात् V M^2

[१०] अत्रोपसर्गाटो० V A^1 A^2 M^2 : तत्रोपसर्गयो० M^1

[११] उपसर्गस्थेणः V A^2 M^1 M^2 : उपसर्गस्येणः A^1

[१२] भाष्यकृतेति V A^2 M^2 : भाष्यकृतेति न A^1 इति M^1

एषामनभिधानात्[१]। सहेः साडः स इति सूत्रस्थं भाष्यं तु पूर्वपक्ष्युक्तित्वान्नार्थसाधकम्। सहेरिति सूत्रस्थभाष्यानुरोधेन विप्रतिषेध ...(1-4-2/175) सूत्रस्थं ज्ञापनवर्णनिर्नैवैकदेश्युक्तिः[२]। किन्तु[३] वाचनिक्येषेति वा कल्पनीयम्[४]। अत एवान्तरङ्ग[५] इत्यस्यात्र अनुवृत्तिः। अन्यथास्याः परंपरया निमित्तत्वमाश्रित्य[६] षत्वतुकोरसिद्ध इति सूत्रस्थतया तदसम्भवः। अजानन्तर्यपदेन च अज्निरूपितमेवानन्तर्य[७] न तु अजा[८] निष्ठमन्यनिरूपितम्। ह्रस्वस्य पिति...(6-1-71/2858) इति सूत्रस्थभाष्यानुरोधात् । धर्मिग्राहकमानाच्च। न लोपः सुप्... (8-2-2 भा०ष० ख०प्र०आ० पृ० 82-83) इति सूत्रे कृति तुग्ग्रहणं तु परम्परया निमित्तत्वमाश्रित्य बहिरङ्गत्वाश्रयणे तु न मानमिति त्वयैव पूर्वमुक्तत्वेन बहिरङ्गपरिभाषाया अप्राप्त्या आवश्यकम्। न लोपः सुबिति सूत्रे भाष्यकृता[९] सन्निपातपरिभाषया सिद्धिमाश्रित्य तत्खण्डनेन प्रदीपकृतोक्तभाष्यस्य[१०] परिहारोपायान्तरोपलक्षणतया बहिरङ्गपरिभाषया च तस्य[११] खण्डितत्वेन ताभ्यां

---

[१] एषामनभिधानात् V A^1 M^1 M^2 : एषाम् A^2

[२] ज्ञापकवर्णनमेवै० A^2 : ज्ञापनवर्णनिर्नैवै० V M^2 ज्ञापकवर्णनयैवै० A^1 ज्ञापनवर्णनमेवै० M^1

[३] किन्तु V A^1 A^2 M^2 : om M^1

[४] कल्पनीयम् V M^2 : कल्पनम् A^1 कल्प्यम् A^2 M^1

[५] अत एवान्तरङ्ग० V A^1 A^2 M^2 : अन्तरङ्ग० M^1

[६] अन्यथास्याः परंपरया निमित्तत्वमाश्रित्य A^2 : अन्यथास्याः V A^1 M^1 M^2

[७] अज्निरूपितमे० V A^2 M^1 M^2 : अनज्निरूपितमे० A^1

[८] अजा V M^2 : अज् A^1 A^2 M^1

[९] भाष्यकृता A^2 M^1 : भाष्ये कृता V A^1 M^2

[१०] प्रदीपकृतोक्तभाष्यस्य V M^2 : प्राग्दीव्यत् सता चोक्तभाष्यस्य A^1 कृतचोक्तभाष्यस्य A^2 प्रापकतया चोक्तभाष्यस्य M^1

[११] तस्य V A^1 A^2 M^2 : तस्याः M^1

खण्डितेन च अर्थान्तरोत्प्रेक्षायाः कर्तुमनुचितत्वाच्च। अक्षद्यूरित्यादौ ऊठोऽसिद्धत्वाद्वलिलोपापत्तिः इति तु वलिलोपे अन्तरङ्गपरिभाषायाः अप्रवृत्त्या[१] समाहितं पूर्वत्रेति[२] प्राहुः ॥ ५१ ॥

अन्तरङ्गानपि विधीन्बहिरङ्गो लुग्बाधते ॥ ५२ ॥

[१]

बहिरङ्गमिति। ननु अन्तरङ्गपरिभाषायाम् अङ्गशब्देन[३] सप्तम्यन्तपञ्चम्यन्तान्यपरोपात्तस्यैव[४] येन विधिः...(1-1-72/26) इति सूत्रस्थभाष्यप्रामाण्येन ग्रहणात् कथमेतदिति[५] चेत् सत्यम्। अत एव प्रागुक्तमयुक्तमित्यवोचाम। इको यण... (6-1-77/47) इत्यत्र तदन्तविधिपक्षे स्योन इत्यत्र गुणापादनपरभाष्यन्तु[६] कैय्यटरीत्या परत्वाभिप्रायकम्। तत्रोनश[७]ब्दमाश्रित्येत्याद्युक्तिस्तु यण उद्देश्यांशे गुणापेक्षया ऊनापेक्षत्वेन प्रतीतान्तरङ्गत्वनिवारणाय गुणस्य यणपेक्षया निमित्तांशे न्यूनापेक्षत्वेन[८] समीकरणाभिप्रायेति न येन विधिः...(1-1-72/26) इति सूत्रस्थभाष्यविरोधः।

---

[१] अप्रवृत्त्या A^1 A^2 M^1 : प्रवृत्त्या V M^2

[२] पूर्वत्रेति V A^1 M^1 M^2 : पूर्वपूर्वत्रेति A^2

[३] ०षायाम् अङ्गशब्देन V A^1 A^2 M^2 : ०षायाः अन्तरङ्गशब्देन M^1

[४] ०परोपात्तस्यैव V M^1 M^2 : ०तरोपात्तस्यैव A^1 A^2

[५] कथमेतदिति V A^1 A^2 M^2 : कथमिति M^1

[६] ०नपरभाष्यन्तु M^1 : ०नभाष्यन्तु V A^1 A^2 M^2

[७] तत्रोनशब्द० V A^1 A^2 M^2 : न च ऊनशब्द० M^1

[८] ऊनापेक्षत्वेन प्रतीतान्तरङ्गत्वनिवारणाय गुणस्य यणपेक्षया निमित्तांशे न्यूनापेक्षत्वेन V M^2 : न्यूनापेक्षत्वेन प्रतीताङ्गत्ववारणाय गुणस्य यणपेक्षया निमित्तांशे न्यूनापेक्षत्वेन A^1 om A^2 ऊनापेक्षत्वेन M^1

[२]

व्यर्था सेति॥ इतः[१] पूर्वं सिद्धे इत्युत्तरम् । तव ममादिबाधनार्था। तत्र च[२] उत्सर्गसमानदेशा इत्येव सिद्धे इति[३] शेषः। ननु ज्ञापितेऽपि[४] सम्पूर्णसूत्रमेव पुनर्व्यर्थम्[५]। त्वमावित्यत्र विभक्तिपदाननुवृत्त्या[६] तेनैव सिद्धेः इति चेन्न ; त्वं डित्थः पुत्रो यस्येति विग्रहे युष्मड्डित्थपुत्र इत्यत्र त्वादेशाभावाय तत्र[७] विभक्तावित्यस्यावश्यकत्वात्[८]। **तदाशय इति।** मपर्यन्तानुवृत्तिः ज्ञापिकेति वदतो भाष्यकृत इत्यर्थः[९]।

[३]

वाचनिक एवेति[१०]। ननु प्रत्ययोत्तरपदयोः...(7-2-98/1373) इति सूत्रे उत्तर-पदग्रहणमत्र ज्ञापकमस्त्विति चेन्न। आतो लोप इटि च (6-4-64/23 72) इत्यत्र कैय्यटरीत्या स्वविरुद्धधर्माक्रान्तस्यैव समुच्चयाङ्गीकारेण प्रत्ययपदस्य विभक्ति- भिन्नप्रत्ययपरत्वात् । अत एव प्रत्ययोत्तरपदयोरिति सूत्रे भाष्यकृता

---

[१] इतः A^1 A^2 M^1 : इति V M^2


[५] आधये इत्यादौ V $A^1$$A^2$ M^2 : आधयेत्यादौ M^1

[६] वारणायानिकारोकारप्रकृतिः V A^1 M^1 M^2 : वारणानिकारोकारप्रकृतिः A^2

[७] क्रियेत V A^2 M^2 : क्रियते A^1 M^1

[८] प्रकृतिर्वोच्येत V A^2 M^2 : प्रकृतिरितिबोध्यते A^1 प्रकृतिरितिवोच्यते M^1

[९] कर्तव्या $A^1$$A^2$ M^1 : परिभाषा क्रियेत V M^2

[१०] परिभाषायाः V A^2 M^2 : om A^1 M^1

[११] इत्युक्तम् V A^2 M^1 M^2 : सन्तीत्युक्तम् A^1

[१२] न्यायसिद्धत्वेऽविशेषा शङ्का A^1 A^2 M^1 : न्यायसिद्धत्वेऽवश्यं V M^2

[१३] न्यायसिद्धत्वे V A^2 M^1 M^2 : न्यायमूलकत्वे A^1

विशेषणविशेष्यभावेऽप्येतत् प्रवृत्त्यापत्तौ न प्रत्ययः। पूर्वपरसन्निपात-निमित्तक इति[१] भाष्यासङ्गतिः। अस्यैकदेश्युक्तित्वकल्पनं तु विरोधिभाष्या-न्तरादर्शनात् बाधकाभावाच्च अयुक्तम्[२]। न च वर्णाश्रय ¶...(1-1-39/ वा०सं०220) इति वार्त्तिकं प्रत्ययः[३] साक्षादेव निमित्तं नेति व्याख्याय न प्रत्यय इत्यादिनो-क्तव्याख्यां दूषयित्वा[४]ङ्गसंज्ञाद्वारेण प्रत्ययो न निमित्तं[५] स्यादित्यभिप्रायेण अङ्गसंज्ञा तर्हि अनिमित्तं स्यादिति ...(1-1-39भा०द्वि०ख०ष०आ०पृ०363) प्रकारा-न्तरेण[६] भाष्यकृता तद्व्याख्यातम्। तत्र शैवो गार्ग्यो वैनतेयः[७] इत्यादावपि तस्यालोपनिमित्तत्वानापत्त्या वर्णाश्रय... इत्यस्य वैय्यर्थ्यं बाधकमिति वाच्यम्। तद्वैय्यर्थ्येनाग्रिमस्य अङ्गसंज्ञेत्यादेः[९] तथात्वेऽपि न प्रत्ययः इत्यस्यैकदेश्युक्तित्वे बीजाभावात्।

वस्तुतः अङ्गसंज्ञेत्यपि नैकदेश्युक्तिः। अङ्गसंज्ञाविधौ यस्मादित्युपात्तम्। तच्च प्रत्ययविधौ तदन्तविधिर्येन[१०] रूपेण उपात्तः तेन रूपेण परामर्शकम्[११]।

---

[१] पूर्वपरसन्निपातनिमित्तक इति V M^2 : सन्निपातलक्षण इति A^1 A^2 M^1

[२] अयुक्तम् V M^1 M^2 : न युक्तम् A^1 इत्युक्तम् A^2

[३] प्रत्ययः V A^2 M^1 M^2 : प्रत्ययः इति A^1

[४] दूषयित्वा० V A^2 A^1 M^2 : दूषित्वा० M^1

[५] न निमित्तं V A^2 M^1 M^2 : निमित्तं A^1

[६] प्रकारान्तरेण V A^1 A^2 M^2 : प्रकारान्तरे M^1

[७] तत्र शैवो गार्ग्यो वैनतेयः V M^2 : तत्र शैवो गार्ग्यः A^1 A^2 तत्र च शैवो गार्ग्यः M^1

[८] तद्वैय्यर्थ्येन V A^2 M^1 M^2 : तद्वैय्यर्थ्यस्य A^1

[९] अङ्गसंज्ञेत्यादेः A^1 A^2 M^1 M^2 : अङ्गसंज्ञेत्वादेः V

[१०] तदन्तविधिर्येन V A^2 M^2 : तदवधिर्येन A^1 M^1

[११] परामर्शकम् V A^2 M^2 : तस्य परामर्शकम् A^1 M^1

अत एव भुनक्ति इत्यादौ न दीर्घः।[१] तथा च दाक्षिरित्यादौ अदन्तप्रकृतेः प्रत्ययस्य च आनन्तर्यम् अङ्गसंज्ञानिमत्तं[२] तच्च[३] लोपे नश्यति। विशिष्टप्रकृतेः आनन्तर्यनाशात्। शैव इत्यादौ[४] विशिष्टप्रकृतेः आनन्तर्यं नाङ्गसंज्ञानिमित्तम्। न च[५] शैव इत्यत्रापि[६] प्रातिपदिकप्रत्यययोरानन्तर्यमङ्गसंज्ञानिमित्तम्। तच्च लोपे नश्यत्येव[७]। प्रातिपदिकत्वस्य तेन नाशादिति[८] वाच्यम्। लौकिकैकदेशविकृतन्यायस्य अशास्त्रीयेऽपि प्रवृत्त्या तेन प्रातिपदिकत्वस्य सुलभत्वात्। यदागमन्यायस्तु[९] शास्त्रीये कार्ये एवेति तुक्पुकोः[१०] एतत्परिभाषासञ्चारो भाष्यकृदुक्तो[११] न विरुद्धः। यद्वा यदागम...(परि०11) न्यायो[१२] न एतत्परिभाषाविघटकः । कृन्मेजन्तः (1-1-39/449) सूत्रस्थभाष्यात्। न चैवं दाक्षिरित्यत्र वृद्धेः लोपस्य बलवत्वात्पूर्व

---

[१] अत एव भुनक्ति इत्यादौ न दीर्घः V A^1 M^1 M^2 : om A^2

[२] अङ्गसंज्ञानिमत्तम् V A^2 M^1 M^2 : नाङ्गसंज्ञानिमत्तम् A^1

[३] तच्च लोपे नश्यति .....नाङ्गसंज्ञानिमत्तं V A^2 M^1 M^2 : jmp A^1

[४] इत्यादौ V M^2 : इत्यादौ तु A^2 M^1 A^1*

[५] न च V A^1 A^2 M^2 : ननु M^1

[६] इत्यत्रापि V A^2 M^1 M^2 : इत्यादौ A^1

[७] नश्यत्येव V $A^1$$A^2$ M^2 : नश्यत्येवेति M^1

[८] प्रातिपदिकत्वस्य तेन नाशा० M^1 : प्रातिपदिकत्वनाशा० V M^2 अप्रातिपदिकेत्वस्य तेन नाशा० A^1 प्रातिपदिकत्व हस्यतेननोशा०A^2

[९] यदागमन्यायस्तु V A^2 M^1 M^2 : यदागमन्यायस्य A^1

[१०] तुक्पुकोः M^1 : तुक्युकोः V A^2 M^2 तुक्यकोः A^1

[११] एतत्परिभाषासञ्चारो भाष्यकृदुक्तः V A^2 M^1 M^2 : एतत्भाष्यसञ्चारो भाष्यकृतः A^1

[१२] न्यायो V A^2 M^1 M^2 : न्यायेन A^1

लोपेऽदन्तत्वाभावेनाङ्गत्वाभावात्[१] वृद्ध्यनापत्तिरिति वाच्यम्। षट्त्वस्येवाङ्गसंज्ञायाः[२] अल्वृत्तित्वाभावेन[३] स्थानिवत्वेन तत्सौलभ्यात्। इड्विधौ[४] वल्पदस्येव[५] अङ्गसंज्ञायां यच्छब्दस्याल् मात्रोपस्थापकत्वाभावाच्च। ग्रामणि कुलमित्यादौ[६] अर्थाश्रयत्वेन ह्रस्वस्य बहिरङ्गत्वेन असिद्धत्वान्न तुक्। तिसृणामित्यादौ तु[७] त्रयादेशस्यापि विभक्तिविशेषापेक्षत्वेन बहिरङ्गत्व-साम्यात्[८] तिस्त्रादेशेन विप्रतिषेधोपपत्तिः। विशेषापेक्षस्य बहिरङ्गत्वं तु पुंयोगात् …(4-1-48 भा०च०ख०द्वि०आ०पृ०69) इति सूत्रे साङ्कूटिनम्[९] इत्युदाहरणे[१०] भाष्यकैयटयोः स्पष्टम्। षत्वतुकोः इत्यत्र यथा[११] न तुग्ग्रहणवैयर्थ्यं[१२] तथोक्तं प्राक्। कृति तुग्ग्रहणं तु भाष्यकृता प्रत्याख्यातमेव। तुग्विधौ परिभाषायाः अप्रवृ[१३]त्तिज्ञापने फलाभावाच्च। किञ्च विशेषणविशेष्य-

---

[१] लोपेऽदन्तत्वाभावेनाङ्गत्वाभावात् V A^2 M^2 : लोपेऽदन्तत्वाभावेनाङ्गत्वाभावेन A^1 लोपेऽदन्तत्वा भात् न अन्तरङ्गत्वाभावात् M^1

[२] षट्त्वस्येवाङ्गसंज्ञायाः V A^2 M^2 : ष स्येवाङ्गसंज्ञायाः A^1 षट्त्वस्यैवाङ्गसंज्ञायां M^1

[३] अल्वृत्तित्वाभावेन V A^2 M^1 M^2 : अल्विधित्वाभावेन A^1

[४] इड्विधौ M^1 : इट्विधौ V A^1 A^2 M^2

[५] वल्पदस्येव V A^1 M^2 : वल्पदस्यैव A^2 अल्पदस्यैव M^1

[६] ०त्यादौ V M^2 : ०त्यादौ तु A^1 A^2 M^1

[७] तिसृणामित्यादौ तु V M^2 : तिसृणामित्यादौ A^1 A^2 तिसृणामित्यत्र M^1

[८] बहिरङ्गत्वसाम्यात् V A^2 M^1 M^2 : बहिरङ्गत्वस्य साम्यात् A^1

[९] साङ्कूटिनम् V A^1 M^1 M^2 : साङ्कौटिनम् A^2

[१०] इत्युदाहरणे V A^2 M^1 M^2 : इत्युदाहरणेन A^1

[११] यथा V A^1 A^2 M^2 : यथा यथा M^1

[१२] तुग्ग्रहणवैयर्थ्यं A^1 A^2 M^1 : तुक्वैयर्थ्यं V M^2

[१३] ०षायाः अप्रवृ० V A^1 M^1 M^2 : ०षायाप्रवृ० A^2

भाव[१]सन्निपातस्यापि ग्रहणे ग्रामणिछत्रम् इत्यत्रापि तुक् न स्यात्। ह्रस्वतुकोः तु अत्र साम्यम्। तुकः पदद्वयसम्बन्धिवर्णद्वय निमित्तकत्वात्[२]। ततश्च नात्र[३] अन्तरङ्गपरिभाषोपतिष्ठते।

वस्तुतो यदागम...(परि०11) न्यायेनापि सन्निपातविघाताभावसम्पादनम्। ज्ञापकं चात्र न तिसृचतसृ (6-4-4/300) इति निषेधः। अन्यथा परत्वात्ति-स्त्रादेशे सन्निपात ...(परि०86) परिभाषया नुटोऽप्राप्तौ तद्वैयर्थ्यम्। तदेतदभि-प्रेत्य[४] कृन्मेजन्तः (1-1-39 भा०प्र०ख०ष० आ०पृ०366 प्रदी०) इति सूत्रे[५] प्रतिविधे-यं[६] दोषेष्विति सिद्धान्तभाष्यव्याख्यावसरे क्रापयतीत्याकारान्तभक्तः[७] पुक् न व्यवधायकः इत्युक्तं कैयटेन। न लोपः सुप् ...(8-2-2भा०ष०ख०प्र०आ०पृ०82-83) इति सूत्रस्थं वृत्रहभ्याम् इत्यादौ सन्निपातपरिभाषाया तुग्वारणापरं[८] भाष्यं तु एकदेश्युक्तिः। नपुंसके वृत्रहेत्यत्र[९] अनया तुग्वारणासम्भवेन[१०] कृति तुग्ग्रहणस्यावश्यकत्वात्। एतेन कृति तुग्ग्रहणात् तुग्विधौ बहिरङ्गपरिभाषा

---

[१] विशेष्यभाव० M^1 : विशेष्य० V A^1 A^2 M^2

[२] ०त्तकत्वात् M^1: ०त्तत्वात् V A^1 A^2 M^2

[३] नात्र अ० V A^1 M^1 M^2 : नावा० A^2

[४] तदेतदभिप्रेत्य V A^2 M^1 M^2 : एतदभिप्रेत्य A^1

[५] इति सूत्रे M^1 : सूत्रे V A^1 A^2 M^2

[६] प्रतिविधेयं V A^2 M^1 M^2 : विप्रषेधेयं A^1

[७] ०त्याकारान्तभक्तः V A^1 M^1 M^2 : ०त्याकरान्तभक्तः A^2

[८] ०षाया तुग्वारणा परं V M^2 : ०षया तुग्वारणपर० A^1 ०षया तुग्वारणपरं A^2 M^1

[९] वृत्रहेत्यत्र V M^2 : बहुवृत्रहेत्यत्र A^1 A^2 M^1

[१०] तुग्वारणासम्भवेन V A^2 M^1 M^2 : तुग्वारणसम्भवेन A^1

नेत्यपि परास्तम्। वृत्रहपुत्र इत्याद्यर्थं तदावश्यकत्वात्[१]। तेन प्रियतिसृणि तानि कानि इत्यादौ नुम् तेषाम् इत्यत्र[२] सुट्, पचमान इत्यत्र[३] मुक् च[४] सिद्धः। मुक् तु अधिजिगांसमान[५] इत्यत्र शपं बाधित्वा चरितार्थः। एवं च ग्रामणीत्यत्र सन्निपातपरिभाषायाः अप्रवृत्तौ अन्तरङ्गपरिभाषैव तवापि शरणमित्याहुः[६]।

स्वातिरिक्तस्येति। शतानीत्यादौ स्वस्य स्वनिमित्तसन्निपातवि[७]घातकत्वेऽपि सामर्थ्यात्प्रवृत्तिः[८] इति भावः। ननु शतानीत्यत्र स्वनिमित्तभूतः सन्निपातोऽजन्तस्य सर्वनामस्थानेन आनन्तर्यम्। स च[९] स्वेनैवापहृतः[१०]। नान्तसर्वनामस्थानयोः सन्निपातः लुका[११] विनाश्यः। स च न[१२] नुमो निमित्तमिति कथं सन्निपात ...(परि०86) परिभाषया लुको वारणम्। एवं

---

[१] एतेन कृति तुग्ग्रह०.....०कत्वात् V M^2 : एतेन कृति तुग्ग्रहणात् तुग्विधौ बहिरङ्गपरिभाषया नेत्यपास्तम्। वृत्रहपुत्र इत्याद्यर्थं तस्याऽऽवश्यकत्वात् A^1 एतेन कृति तुग्ग्रहणात् तुग्विधौ बहिरङ्गपरि-भाषया नेत्यपास्तम् वृत्रहपुत्र इत्याद्यर्थं तदावश्यकत्वात् A^2 om M^1

[२] तेषाम् इत्यत्र V A^2 M^2 : तेषाम् इत्यादौ A^1 om M^1

[३] पचमान इत्यत्र V A^1 M^1 M^2 : पचमानमित्यत्र A^2

[४] च V A^1 A^2 M^2 : om M^1

[५] अधिजिगांसमान V M^1 M^2 : अधिजिघांसमान A^1 अधिजिगांसमानम् A^2

[६] शरणमित्याहुः V A^2 M^2 : शरणमिति प्राहुः A^1 M^1

[७] स्वनिमित्तसन्निपातवि० A^1 A^2 M^1 : स्वनिमित्तवि० V M^2

[८] सामर्थ्यात्प्रवृत्तिः V A^2 M^2 : सामर्थ्यात्प्रवृत्तेः A^1 M^1

[९] स च A^1 A^2 M^1 : स व V M^2

[१०] स्वेनैवापहृतः V A^1 M^1 M^2 : स्वेनैवपरिहृतः A^2

[११] लुका V A^2 M^1 M^2 : तुका A^1

[१२] स च न V A^2 M^1 M^2 : स च A^1

श्रीपायेत्यत्रानया कथमालोपवारणम्। एवं नदीत्यादौ अनया सम्बुद्धि[१]लोपाभावापादनं कृन्मेजन्तसूत्रे भाष्यकृता[२] कृतम्। नद्यन्ताङ्गसम्बुध्योः[३] आनन्तर्यस्य स्वयमनित्यमित्यर्थे तु ह्रस्वेनैव[४] विनाशितत्वात्। ह्रस्वान्ताङ्गसम्बुध्योः आनन्तर्यस्य लुका विनाशेऽपि स्वानिमित्तत्वात्। स्वसम्पाद्यनिमित्तविघातकस्य[५] स्वयमनिमित्तमित्यर्थे तु भवतीत्यादौ अवादेशस्य गुणः[६]। काभ्यामित्यादौ[७] दीर्घत्वैत्वैसादीनां[८] त्यदाद्यत्व[९]कादेशादयो निमित्तानि[१०] न स्युः इति महोपप्लवः। दोषाः खल्वपि साकल्येन परिगणिताः इति कृन्मेजन्तः (1-1-39भा०प्र०ख०ष०आ० पृ०366) सूत्रस्थभाष्यस्य दत्ततिलाञ्जलिता च[११] । एवम् आधये[१२] कुम्भकारेभ्य इत्यादौ

---

[१] सम्बुद्धि A^1 A^2 M^1 : सम्बुद्धिः V M^2

[२] कृन्मेजन्तसूत्रे भाष्यकृता V M^2 : कृन्मेजन्तसूत्रे भाष्यकृता कथम् A^2 कृन्मेजन्त इति सूत्रे कथं भाष्यकृता A^1 M^1

[३] नद्यन्ताङ्गसम्बुध्योः V M^2 : om A^2 नद्यन्ताङ्गसम्बुद्धयोः A^1 M^1

[४] स्वयमनित्यमित्यर्थे तु ह्रस्वेनैव V : सत्त्वेनैव A^1 M^2 om A^2 ह्रस्वान्ताङ्गसम्बुध्योः आनन्तर्यस्य ह्रस्वेनैव M^1

[५] निमित्तविघातकस्य V A^2 M^2 : निमित्तविघातस्य A^1 निमित्तभूतविघातकस्य M^1

[६] अवादेशस्य गुणः V A^1 M^2 : अवा A^2 M^1

[७] काभ्यामित्यादौ ego : ताभ्यामित्यादौ V A^1 A^2 M^1 M^2

[८] दीर्घत्वैत्वैसादीनां V M^2 : दीर्घत्वम् । एवं भ्यसादीनां A^1 दीर्घत्वैत्वाभ्यसादीनां A^2 दीर्घत्वेत्वैसावादीनि M^1

[९] त्यदाद्यत्व A^1 A^2 M^1 : त्यदाद्यत्वं V M^2

[१०] कादेशादयो निमित्तानि V A^1 A^2 M^2 : कादेशादिषु M^1

[११] दत्ततिलाञ्जलिता च M^1 : दत्तजलाञ्जलिता च V A^2 M^2 दत्तजलाञ्जलिता A^1

[१२] आधये V A^2 M^2 : आधयो A^1 आधेय M^1

गुणत्वैत्वयोः[१] निमित्तभूतः सन्निपातः घ्यन्ताद्यन्तविभक्त्योः स च[२] स्वेनैवापहृत[३] इति कथमियम् उपतिष्ठताम् इति चेन्न। श्रीपायेत्यत्र बहवः प्रकाराः प्रभायामस्माभिः दर्शिताः। शतानि नदीत्यादौ तु अजाद्यन्त-विभक्त्योः[४] सन्निपातस्य स्वेन नाशेऽपि[५] स्वनिमित्तभूताङ्गविभक्त्योः सन्निपातो अवशिष्यत[६] एव। नन्विदमङ्गमन्यदेवेति[७] वाच्यम्। शास्त्रीयाशास्त्रीय-धर्मसाधारणाभ्यां यदागमैकदेशविकृत[८] ... (परि०11,37) न्यायाभ्यां[९] तत्त्वप्रत्य-भिज्ञानात्[१०]। न चैवं भवति[११] ताभ्यामित्यादौ गुणदीर्घत्वादीन्यपि[१२] न स्युरिति वाच्यम्। गुणादिषु कृतेषु[१३] शास्त्रीयाशास्त्रीयकार्यसाधारणाभ्यां ताभ्यां स्वनिमित्तभूतसन्निपातसत्त्वविज्ञानेन तद्विघाताभावात्। नदी शतानीत्यादौ लुग्लोपयोस्तद्विघातोऽस्त्येव। प्रत्ययलक्षणस्य शास्त्रीये एव प्रवृत्तेः ।

---

[१] गुणत्वैत्वयोः V M^2 : गुणैत्वयोः A^1 A^2 M^1

[२] घ्यन्ताद्यन्तविभक्त्योः स च V A^2 M^2 : घ्यन्तादान्त्यविभक्त्योः A^1 घ्यन्तादन्तविभक्त्योरानन्तर्यम् M^1

[३] स्वेनैवापहृतः V A^2 M^1 M^2 : स्वेस्वेनैवापहृतः A^1

[४] अजाद्यन्तविभक्त्योः V A^2 M^2 : आद्यन्तविभक्त्योः A^1 अजन्तनद्यन्तविभक्त्योः M^1

[५] नाशेऽपि V A^2 M^1 M^2 : विनाशेऽपि A^1

[६] अवशिष्यत V M^1 M^2 : विशिष्यते A^1 विशेष्यते A^2

[७] नन्विदमङ्गमन्यदेवेति V A^2 M^2 : नत्विदमङ्गमन्यदेवेति A^1 नचैमङ्गमन्यदेवेति M^1

[८] ०मकदेशविकृत V A^2 M^2 : ०मन्यायैकदेशविकृत A^1 M^1

[९] न्यायाभ्याम् A^1 A^2 M^1 : न्यायेन च V M^2

[१०] तत्त्वप्रत्यभिज्ञानात् V A^2 M^1 M^2 : तत्त्वप्रतिज्ञानात् A^1

[११] भवति V A^1 M^1 M^2 : om A^2

[१२] गुणदीर्घत्वादीन्यपि V A^1 M^2 : गुणदीर्घत्वादीनपि A^2 अवादेशदीर्घत्वादीन्यपि M^1

[१३] गुणादिषु कृतेषु V A^2 M^2 : गुणादिषु कृतेष्वपि A^1 अवादिषु कृतेष्वपि M^1

एकदेशविकृतन्यायेन विकृतावयवबुद्धेरभावात्।[१] ननु तिसृ[२] इत्यत्र प्रकृतेः रामाय इत्यत्र प्रत्ययस्य साकल्येन अपहारात् न लौकिकैकदेशविकृतन्यायावतार इति कथमत्र परिभाषोपतिष्ठतामिति चेदत्रायं[३] निष्कर्षः। अत्र सन्निपातशब्देनानन्तर्यमेव उक्तयुक्तेः। स च स्वनिमित्तभूतः स्वसम्पाद्यश्च[४]। यद्वा स्वनिमित्तभूतयोः[५] तत्त्वेन प्रत्यभिज्ञायमानयोश्च[६] सन्निपातोऽत्र ग्राह्यः[७]। प्रत्यभिज्ञा च तत्स्थानिकतया वा लौकिकैकदेशविकृतन्यायेन वा यदागमन्यायेन... (परि०11,37) वा। तत्राद्यस्योदाहरणं तिस्रः रामायेति। स्वनिमित्तप्रकृतिप्रत्ययस्थानिकत्वात्। द्वितीयस्य नदीकुम्भकारेभ्य इति[८]। तृतीयस्य शतानीति। तद्विघातकत्वं च अनेकधा। क्वचिदानन्तर्य्यमात्रस्य। यथा[९] या सा शकटौ पद्धतौ इयेषेत्यादौ[१०] क्वचिदनुयोगिनः यथा नदी[११]

---

[१] नदी शतानीत्यादौ .....०वयवबुद्धेरभावात्। V A^2 M^2 : न हि शतानीत्यादौ .....०वयवबुद्धेर-भावात्। A^1 jmp M^1

[२] ननु तिसृ V A^2 M^1 M^2 : तथा च सन्निपातलक्षणविधौ निमित्तभूतस्यानन्तर्यस्य विघातेन तत्प्रति-योग्यनुयोगिनोरन्यतरस्य तद्विशेषणीयो वा विघातविधेः सोऽनिमित्त इत्यर्थः इति दिक्। ननु तिसृ A^1

[३] चेदत्रायं V A^1A^2 M^2 : चेदयं M^1

[४] स्वसम्पाद्यश्च A^1 A^2 M^1 : स्वसपाद्यश्च V M^2

[५] स्वनिमित्तभूतयोः V M^2 : स्वनिमित्तयोः A^1 A^2 M^1

[६] तत्त्वेन प्रत्यभिज्ञायमानयोश्च V A^2 M^2 : तत्त्वेन प्रत्यक्षज्ञायमानयोश्च A^1 तत्त्वप्रत्यभिज्ञायमानश्च M^1

[७] सन्निपातोऽत्र ग्राह्यः V A^2 M^1 M^2 : सन्निपातो न ग्राह्यः A^1

[८] इति V A^1 M^1 M^2 : इत्यादि A^2

[९] यथा V A^1 A^2 M^2 : om M^1

[१०] इयेषेत्यादौ V A^2 M^1 M^2 : इयायेत्यादौ A^1

[११] नदी V A^1 M^1 M^2 : अत्र सर्वत्र नदि इति पाठः A^2

शतानीति। प्रतियोग्यनुयोगिनोः अल्समुदायविघातसमुदायलोपात्मकम्[१] एव। नैकदेशलोपः न विकारः[२] । नेदमदसोरकोः... (7-1-11/349) इति ज्ञापकात्। अन्यथा एभिः इत्यत्र भिस् निमित्तस्य त्यदाद्यत्वस्य तद्विघातकैस्निमित्तत्वाभावेनैसोऽप्रवृत्तिसिद्धेः तद्वैय्यर्थ्यम्। तेन[३] भवति तैः इत्यादौ गुणैसादेशप्रवृत्तिः[४]। ननु यूयमित्यत्र जसः शी (7-1-17/214) कस्मान्न[५] सकृद्गति ... (परि०40) न्यायादिति भाष्यविरोधात्। तस्मादनयैव परिभाषया स वारणीयः। स[६] चोक्तरीत्या न सम्भवतीति चेन्न। शेषे लोपः (7-2-90/385) टिलोप इति पक्षाश्रयणात्। पक्षद्वयस्यापि भाष्ये स्थितत्वात्[७]। शेषे लोपः (भा०ष०ख०द्वि०आ०पृ०156) इति सूत्रस्थं[८] शेषग्रहणं शक्यमकर्त्तुमिति भाष्यं तु निमित्तसमर्पकशेषग्रहणाभिप्रायकम्। अत एव त्यदादीनामः (7-2-102/265) इति सूत्रे टिलोपः टाबभावार्थः¶... (भा०ष०ख०द्वि०आ०पृ०171) इति वार्त्तिकं सङ्गच्छते। अन्यथा ते इत्यत्रापि शीभावानापत्तिः[९]।

---

[१] अल्समुदायविघातसमुदायलोपात्मकं V M^2 : अल्समुदायो विघातश्चसमुदायलोपात्मकं A^2 अल्पसमुदाययोः विघातश्च सर्व अल् *** A^1 अल्पसमुदाययोः विघातश्च सर्वलोपात्मक M^1

[२] नैकदेशलोपः न विकारः V M^2 : रविकारे नैकदेशलोपः A^2 न विकारो नैकदेशलोपः A^1 M^1

[३] तेन V A^1 A^2 M^2 : ननु M^1

[४] गुणैसादेशप्रवृत्तिः A^1 : गुणैसादेः प्रवृत्तिः V A^2 M^1 M^2

[५] कस्मान्न V M^2 : कस्मान्न भवति। मकारप्रश्लेषादिति चेन्न। पुनः प्रसङ्गविज्ञानात्***दयः कस्मान्न A^1 कस्मान्न। मकारप्रश्लेषादिति चेन्न। पुनः प्रसङ्गविज्ञानाच्छि शिलुक् विधयः कस्मान्न A^2 कस्मान्न भवति। मकारप्रश्लेषादिति चेन्न। पुनः प्रसङ्गविज्ञानाच्च च्छि शीलुक् विधयः कस्मान्न M^1

[६] स V A^1 A^2 M^2 : न M^1

[७] पक्षाश्रयणात्। पक्षद्वयस्यापि भाष्ये स्थितत्वात् A^1 M^1 : पक्षाश्रयणात्। V A^2 M^2

[८] सूत्रस्थं V A^2 M^2 : सूत्रे A^1 M^1

[९] शीभावानापत्तिः V A^1 A^2 M^2 : शीभावापत्तेः M^1

एवमेव तुभ्यमस्मदित्यादौ[१] स्मायादयः[२] परिहर्तव्याः। प्रतियोग्यनुयोगिनोः अलूरूपयोः तयोः[३] ये विशेषणे[४] अलूरूपे तयोश्च तन्मात्रविकारान्य[५] एव विघातः। स च सविशेषणयोः तयोः प्रतियोग्यनुयोगिनोः[६] सर्वविकारः। अलूमात्रलोपश्च। आद्यम् अति जरेण अतिजरमित्यादि। द्वितीयं गव्यितेत्यादि। अत्र यस्य हलः (6-4-49/2631) इति लोपाभावः। अत्र बहुवचने …(7-3-103/205) इति सूत्रे झलीति। तद्धि रामाणामित्यत्रैत्वाभावाय। मारणतोषणेति[७]। जानातेरु[८]पधाह्रस्वार्थं मित्वं[९] च। तदेतदभिप्रेत्य कृन्मेजन्तः (1-1-39 भा०प्र०ख०ष०आ०पृ०366) इति सूत्रे भाष्ये दोषेषु[१०] युक् ह्रस्वत्वस्य अदीदयत्।[११] मतुप् विभक्त्युदात्तत्वं पूर्वनिघातस्य। अग्निमान्। परमवाचायादेशः

---

[१] तुभ्यमस्मदित्यादौ V A^2 M^2 : तुभ्यं पदित्यादौ A^1 तुभ्यं त्वदित्यादौ M^1

[२] स्मायादयः A^1 A^2 M^2 : स्मायाव्यः V स्यादयः M^1

[३] तयोः V A^1 A^2 M^2 : om M^1

[४] ये विशेषणे V A^2 M^1 M^2 : अलूविशेषणे A^1

[५] तन्मात्रविकारान्यः V A^2 M^1 M^2 : तन्मात्रान्यविकारान्यः A^1

[६] तयोः प्रतियोग्यनुयोगिनोः A^1 A^2 M^1 : प्रतियोग्यनुयोगिनोः V M^2

[७] द्वितीयं ..... मारणतोषणेति V M^2 : द्वितीयं भवितेत्यादि। अत्र यस्येति लोपाभावः। अत्र यस्येति लोपाभावः। अत्र बहुवचने … इति सूत्रे झलीति । तद्धि रामाणामित्यत्रैत्वाभावाय मारणतोषणेति A^1 गति A^2 द्वितीयं गात्यते। अत्र यस्य हलः (6-4-49/2631) इति लोपाभावः। अत्र गमकं बहुवचने … इति सूत्रे झलीति। तद्धि रामाणामित्यत्रैत्ववारणाय मारणतोषणेति M^1

[८] जानातेरु० V A^1 A^2 M^2 : ज्ञापनात्तेरु० M^1

[९] मित्वं V A^2 M^1 M^2 : मित्वार्थं A^1

[१०] भाष्ये दोषेषु V M^2 : भाष्ये एतत्परिभाषादोषेषु A^1 A^2 एतत्परिभाषादोषेषु M^1

[११] युक् ह्रस्वत्वस्य अदीदयत् V A^1 A^2 M^2 : पुक् ह्रस्वस्य अदीदपत् M^1

सुपि ...(7-3-102/202) दीर्घत्वस्येत्युक्त्या[१] प्रतिविधेयं दोषेष्वित्युक्तम्। अमुना[२] इत्यत्र दीर्घस्तु न। नाशब्दे[३] यत्कार्यं तत्र मुभावासिद्धत्वाभावस्य[४] नमुने (8-2-3 भा० ष०ख०प्र०आ०पृ०83) इत्यत्र भाष्यकृतोक्तेः। एतत्परिभाषाफलत्वेन अस्योपन्यसनपरं कृन्मेजन्तः (1-1-39/449) इति सूत्रस्थं भाष्यन्तु पूर्वपक्षिणः। अत एव आने मुक् (7-2-82भा०ष०ख० द्वि०आ०पृ०152) इति सूत्रे भाष्ये मुकि[५] दीर्घः आपादितः। दोददघोः (7-4-46 भा०ष०ख०प्र०आ०पृ०249) इति सूत्रे भाष्ये दान्तधान्तयोः[६] नत्वधत्वे आपाद्य थान्तः[७] इति सिद्धान्तितम्। तेन नैषादकर्षुकः[८] इत्यत्र ह्रस्वः जग्धमित्यत्र[९] धत्वम्, अष्टानामित्यत्र हलि विधीयमानमात्वम्, एधेत इत्यत्र गुणः, कुमार्यै इत्यत्र यण्, श्रियै इत्यत्र[१०] इयङ्, संख्यावित्यत्र यण्, ते इत्यत्र गुणः, सर्वेषाम् इत्यत्र एत्वम्, प्राणाम् इत्यत्रात्वम्, सञ्छम्भुः इत्यत्र छत्वम्, गवाग्रमित्यत्र दीर्घः, अनड्वान् इत्यत्र यण्, रामैः इत्यत्र वृद्धिश्च

---

[१] दीर्घत्वस्येत्युक्त्या V A^1 A^2 M^2 : दीर्घस्येत्युक्त्या M^1

[२] अमुना V A^2 M^1 M^2 : अमुने A^1

[३] नाशब्दे V A^1 A^2 M^2 : नादेशे M^1

[४] तत्र मुभावासिद्धत्वाभावस्य A^1 A^2 M^1 : तत्र मुभावस्य V M^2

[५] मुकि V A^2 M^2 : मुटि A^1 M^1

[६] भाष्ये दान्तधान्तयोः V A^1 A^2 M^2 : भाष्ये च दान्तघान्तयोः M^1

[७] थान्तः V A^2 M^2 : धान्तः A^1 घान्तः M^1

[८] नैषादकर्षुकः V A^2 M^2 : नैषादकर्षुकम् A^1 नैषादकर्षूकः M^1

[९] जग्धमित्यत्र V A^1 M^1 M^2 : सञ्च्छम्भुः जग्धमित्यत्र A^2

[१०] झलि..... इत्यत्र V M^2 : हलिविधीयमानमात्वम्। एधते इत्यत्र गुणः। कुमार्योः इत्यत्र यण्। श्रियोः इत्यत्र A^1 om A^2 हलिविधीयमानमात्वम्। एधते इत्यत्र गुणः। कुमार्यै इत्यत्र यण्। श्रियै इत्यत्र M^1

सिद्ध्यति।[१] सन्निपात... (परि०86) परिभाषाया अनित्यत्वेन[२] समाधानं तु विशिष्यतद्दोषगणन भाष्येन विशिष्य[३]तत्तद्दोषपरिहारोपायप्रदर्शनपरकैयटेन च विरुद्धम्। आर्द्धधातुक ...(6-4-46 भा० प०ख०द्वि०आ०पृ०309) इति सूत्रस्थम् आतो लोपे[४] वृक्षस्येति प्रयोजनपर[५]भाष्यं तु नित्यत्वात् स्यादेशात्पूर्वम् अताः लोपापत्तिः। स्यादेशस्तु तस्येत्यत्र चरितार्थः। अत्र प्रत्ययोपदेशे[६] अकारान्ताभावे तलोपाप्राप्तेः[७] इत्यभिप्रायकमिति न तेनाप्यनित्यत्वं प्रत्याशा[८]। एवं तर्हि मा भूदिति पूर्वभाष्यन्तु[९] असिद्धवत् ...(6-4-22/2183) सूत्रेण आगहि इत्यादि[१०]सिद्धौ तत्रानुवर्तनीयम्[११] इत्यभिप्रायेण। विधिश्चापूर्व एव। तेन पपिवान् इत्यत्र आलोपः सिद्धः[१२]। तस्य नियमत्वेन विधित्वाभावात्। कुत इति

---

[१] त इत्यत्र ..... वृद्धिश्च सिद्ध्यति। V A^1 A^2 M^2 : ते , सर्वे, प्ररीणाम्, सञ्छम्भुः, गवाग्रम् अनड्वान् , रामैः, इत्यत्र क्रमेण एत्वात्वछत्वदीर्घत्ववृद्ध्यादीनि सिद्ध्यन्ति M^1

[२] परिभाषाया अनित्यत्वेन V M^1 M^2 : परिभाषया अनित्यत्वेन A^1 परिभाषाया अनित्यत्वे A^2

[३] विशिष्यतद्दोषगणन भाष्येन विशिष्य० V A^1 M^1 M^2 : विशेष्य० A^2

[४] आतो लोपे V A^1 A^2 M^2 : अतो लोपे M^1

[५] प्रयोजनपर V : प्रयोजनपरं A^1 A^2 M^2 तत्प्रयोजनपरं M^1

[६] प्रत्ययोपदेशे V A^1 M^2 : प्रत्ययादेशे A^2 प्रत्ययोपपदेशे M^1

[७] अकारान्ताभावे तलोपाप्राप्तेः V M^2 : अकारान्तत्वाभावे नलोपाप्राप्तेः A^1 A^2 अकारान्ताभावेन अतोलोपा प्राप्तेः M^1

[८] प्रत्याशा V A^2 M^1 M^2 : प्रत्याशय A^1

[९] पूर्वभाष्यन्तु A^2 M^1 : भाष्यन्तु V पूर्वं भाष्यन्तु A^1 M^2

[१०] आगहि इत्यादि ego : अगहित्यादि V M^2 अगर्हि इत्यादि A^2 अग्रहीदित्यादि A^1 M^1

[११] तत्रानुवर्तनीयम् V M^2 : तत्रानुवृत्तम् A^1 तन्नानुवर्त्यम् A^2 M^1

[१२] आलोपः सिद्धः V A^2 M^2 : लोपसिद्धिः A^1 आतोलोपः सिद्धः M^1

चेत्[१] धर्मिग्राहकमानादित्यवेहि[२]। अस्यां च[३] परिभाषायां न तिसृ... (6-4-4/300) इति निषेधो ज्ञापकः। तत्र च[४] तिस्रादेशो विधिरेव। तस्माद्यान्येतस्याः परिभाषायाः प्रयोजनानि[५] तदर्थमेषा कर्तव्येत्युपसंहारभाष्ये[६] कर्तव्येत्युक्तिस्तु उक्त[७]निषेधेन आनन्तर्यविघातांशे[८] परिभाषासिद्धावपि तत्प्रतियोग्यनुयोगि-तद्विघातकांशेऽपूर्वाभिप्राया[९] धर्मिग्राहकमानादेव च आनन्तर्यरूप एव चात्र सन्निपातः[१०]। अत एव दाक्षिरित्यादौ लोपसिद्धिः[११]। प्रत्ययस्यातथात्त्वात्। अङ्गसंज्ञायां तु[१२] यस्मादित्यनेन अवधिमात्र परामर्शो न तु प्रत्ययविधौ येन रूपेणोपादानं तेन रूपेणेति प्रतिविधेयमिति सिद्धान्तभाष्याभिप्रायः। धर्मिग्राहकमानादेव च[१३] त्रिपादीस्थस्य सन्निपातविघातकस्य नैषा अप्रवृत्तिका[१४]। तेन पञ्चानामित्यत्र नलोपः सिद्धः। एतेन त्रिपाद्यामपि एषा

---

[१] कुत इति चेत् V M^2 : कुत इदमिति चेत् A^1 A^2 इति चेत् M^1

[२] धर्मिग्राहकमानादित्यवेहि V A^1 A^2 M^2 : धर्मिग्राहकमानादेवेत्यवेहि M^1

[३] अस्यां च A^1 A^2 M^1 : अस्यां V M^2

[४] तत्र च V A^2 M^1 M^2 : तत्र A^1

[५] परिभाषायाः प्रयोजनानि A^1 : प्रयोजनानि V A^2 M^1 M^2

[६] कर्तव्येत्युपसंहारभाष्ये V A^2 M^2 : परिभाषा कर्तव्येत्युपसंहारभाष्ये A^1 om M^1

[७] कर्तव्येत्युक्तिस्तु उक्त० A^1 : कर्तव्येत्युक्त० V M^1 A^2 M^2

[८] आनन्तर्यविघातांशे V M^2 : आनन्तर्यविघातकांशे A^1 A^2 M^1

[९] ०पूर्वाभिप्राया V M^2 : ०पूर्वत्वाभिप्राया A^1 ०पूर्वत्वाभिप्राया A^2 ०पूर्वत्वाभिप्रायात् M^1

[१०] चात्र सन्निपातः V M^2 : सन्निपातः A^1 अत्र सन्निपातः A^2 M^1

[११] लोपसिद्धिः A^1 A^2 M^1 : लोपः सिद्धः V M^2

[१२] अङ्गसंज्ञायां तु V A^1 A^2 M^2 : अङ्गसंज्ञायां M^1

[१३] धर्मिग्राहकमानादेव च V A^2 M^1 M^2 : धर्मिग्राहकमानादेव A^1

[१४] अप्रवृत्तिका V A^2 M^2 : अप्रवर्त्तिका A^1 प्रतिबन्धिनी M^1

प्रवर्तते[१] अनित्या चैषा[२]। अनित्यत्वं च[३] परिगणितेष्वेवेति नव्योक्तमपास्तम्। जग्धम्। सञ्छम्भुः। पञ्चानाम् इत्यत्र नलोपः सिद्धः[४] । गवाग्रमित्यादिषु परिगणितातिरिक्तेषु उक्तरीत्या दोषापत्तेः। वृत्रघ्न इत्यादौ[५] अनयैव परिभाषया णत्ववारणे कुव्यवाय...¶(8-4-2 भा०ष०ख०प्र०आ०पृ०213) इति वार्त्तिकवैय्यर्थ्यापत्तेश्च[६]। दोषाः खल्वपि[७] साकल्येन परिगणिता इति पूर्वोक्त-भाष्ये परिहारस्य[८] अनुक्तसाधारण्यात् तेऽपि गणितप्रायाःइत्यभिप्रायकः[९] सपरिहारोपायश्च अस्माभिः प्रदर्शितः। केचित्तु वामि (1-4-5/304) इति धर्मिग्राहकमानादङ्गाधिकारे एवैषेति। तन्न[१०]। कुम्भकारेभ्यः इत्यत्र अकजापत्तेः बुधौ[११] इत्यत्र[१२] टाबापत्तेश्च[१३]। तस्य ज्ञापकताया दूषितत्वाच्च। अनिमित्तमित्यत्र निमित्तत्वं[१४]

---

[१] प्रवर्तते V A^1 A^2 M^2 : वर्तते M^1

[२] अनित्या चैषा V A^2 M^1 M^2 : अनित्यैवैषा A^1

[३] च V M^2 : अपि A^1 A^2 M^1

[४] पञ्चानाम् इत्यत्र नलोपः सिद्धः M^1 : पञ्चानाम् V A^1 A^2 M^2

[५] इत्यादौ A^1 A^2 M^1 : इत्यत्र V M^2

[६] वार्त्तिकवैय्यर्थ्यापत्तेश्च V $A^1$$A^2$ M^2 : वार्त्तिकवैय्यर्थ्यापत्तेः M^1

[७] दोषाः खल्वपि V M^2 : दोषाः A^1 A^2 M^1

[८] पूर्वोक्तभाष्ये परिहारस्य V M^2 : पूर्वोक्तेषु दोषपरिहारोपायस्य A^1 A^2 M^1

[९] ०ण्यात् तेऽपि गणितप्राया इत्यभिप्रायकः V M^2 : ०ण्यापत्तेऽपि परिगणितप्राया इत्यभिप्रायकांश A^1 ०ण्यात् तेऽपि गणितप्राया इत्यभिप्रायम् A^2 ०ण्यापत्तेरपि परिगणिता इत्यभिप्रायः M^1

[१०] तन्न V $A^1$$A^2$ M^2 : तत्र M^1

[११] बुधौ V A^2 M^2 : बुद्धौ A^1 M^1

[१२] इत्यत्र V A^2 M^2 : इत्यादौ A^1 M^1

[१३] टाबापत्तेश्च V $A^1$$A^2$ M^2 : टाबापत्तेः M^1

[१४] निमित्तत्वं V A^2 M^2 : निमित्तत्वं च A^1 अनिमित्तत्वं च M^1

साक्षात्परंपरया च यथाकथञ्चित्। अत एव उदुपधत्वमकित्त्वस्य¶...(1-1-39/ वा०सं० 216) इति वार्त्तिकं सङ्गच्छते[१]। तत्रोदुपधत्वशब्देन[२] तत्प्रयोजको नलोपो लक्ष्यते[३]। ऊदुपधत्वस्य[४] विधित्वाभावात्। स च ऊदुपध[५]त्वसम्पादनद्वारा अकित्त्वस्य निमित्तं नेत्यर्थः। नन्वेवं यासे इत्यत्रात्वमपि[६] सुलोपनिमित्तं न स्यादिति चेन्न। संज्ञातिरिक्तशास्त्रविहितकार्यातिरिक्तधर्मद्वारैव निमित्तं[७] नेत्यर्थाददोषः। आत्वं[८] कित्त्वस्योपादास्त (1-1-39/वा०सं०218) इति वार्त्तिकोपपत्तये संज्ञातिरिक्तेति दिक्।

[४]

नाग्रह[९] इति। इदम् अङ्गसंज्ञा तर्हि इत्येकदेश्युक्तिरिति पूर्वग्रन्थविरुद्धं[१०] निष्फलञ्च। **लुङ्माभूदिति[११]**। नन्विदं कार्यकालपक्षे वा[१२] यथोद्देशपक्षे[१३] वा।

---

[१] सङ्गच्छते VA^2 M^1 M^2 : गच्छते A^1

[२] तत्रोदुपधत्वशब्देन V A^1 M^2 : तत्रोपधत्वशब्देन A^2 M^1

[३] ०योजको नलोपो लक्ष्यते V A^2 M^2 : ०योजको नलोपो न लभ्यते A^1 ०योजकेन लोपो लक्ष्यते M^1

[४] ऊदुपधत्वस्य V M^2 : उदुपधत्वस्य A^1 A^2 M^1

[५] स च ऊदुपध .....त्तं न स्यादिति V A^1 A^2 M^2 : इति M^1

[६] इत्यत्रात्वमपि V A^2 M^2 : इत्यत्र अत्वमपि A^1 M^{1*}

[७] निमित्तं V A^1 A^2 M^2 : निमित्तत्वम् M^1

[८] आत्वं A^2 : अत्वं V A^1 M^1 M^2

[९] नाग्रह V A^1 A^2 M^2 : नाग्राह M^1

[१०] पूर्वग्रन्थविरुद्धं V A^1 M^1 M^2 : पूर्वं ग्रन्थविरुद्धं A^2

[११] लुङ्माभूदिति V A^2 M^1 M^2 : लङ्माभूदिति A^1

[१२] वा V A^1 M^2 : om A^2 M^1

[१३] यथोद्देशपक्षे V A^1 M^1 M^2 : यथोद्देशे A^2

नाद्यः। एतदुदा[1]हरणेत्यादिसमाधानासङ्गतेः। अकज्निमित्ताव्ययसंज्ञा[2] परम्परयापि निमित्ताविघातकत्वात्। नान्त्यः। लुकं प्रति गुणादेः अनिमित्तकत्त्वादिति चेन्न। निमित्तत्वस्य परम्परया विवक्षितत्वेन लुकं प्रति गुणस्य निमित्तत्वात्[3]

[५]

इतो अन्यत्रेति। इदं गवाग्रमित्यत्र सन्निपात ...(परि०86) परिभाषाया अनित्यत्वात् दीर्घ इति अष्टानां पञ्चानाम् इत्यत्रास्यानित्यत्वादिति च शब्देन्दुशेखरेण विरुद्धम् ।

सन्नियोगशिष्टानामन्यतरापाय उभयोरप्यपायः ॥ ८६ ॥

[१]

कृतकुगागमेति। अकारोऽविवक्षित इति भावः। एतेन बिल्व एव बिल्वकः। तत्र भवो बैल्वकः। तस्मात्प्राक्रीताच्छे(5-1-1/1661)अणो लुगभावाय छग्रहणमित्यपास्तम्। बिल्व[4] एव बिल्वकः। तस्मात्प्राक्रीताच्छे शैषिकेऽणि छस्य लुगभावाय मूलोक्तार्थस्य छग्रहणेऽप्यावश्यकत्वात्। **एककालिकत्वेति।** कालशब्दाद्ढञि[5] गमकत्वादेकशब्दस्य कालशब्देन[6] समासे समकालिक-

---

[1] एतदुदा० V A^2 M^1 M^2 : तदुदा० A^1

[2] अकज्निमित्ताव्ययसंज्ञा V A^2 M^2 : अकज्निमित्ताव्ययत्वस्य A^1 M^1

[3] परम्परयापि निमित्ताविघातकत्वात्। नान्त्यः। लुकं प्रति गुणादेः अनिमित्तकत्त्वादिति चेन्न। निमित्तत्वस्य परम्परया विक्षितत्वेन लुकं प्रति गुणस्य निमित्तत्वात् A^1: परम्परया विवक्षितत्वात्। नान्त्यः। लुकं प्रतिगुणस्यानिमित्तत्वात् V A^2 M^1 M^2

[4] बिल्वः V A^1 M^1 M^2 : विकल्पः A^2

[5] कालशब्दाद्ढञि V : कालशब्दात् ठकि A^2 कालशब्दात् ठञि A^1 M^1 कालशब्दाड्ढञि M^2

[6] कालशब्देन A^1 A^2 M^1 M^2 : कालं शब्देन V

वत्साधुरिति[१] भावः। **न्यायसिद्धापीयमिति** । सन्नियोगशिष्टानां सहैव प्रवृत्तिनिवृत्ती (परि०87) इतीयमित्यर्थः[२]। अत एवागस्तीय इति सिद्धम्[३]। लुकि निवृत्ते अगस्त्यादेश[४]स्यापि निवर्त्तनात्। सन्नियोशिष्टत्वं चैकभवति क्रियान्वयित्वम्। तत्र अनूद्यमान[५]स्यापि इति[६] बहुयज्वेत्यादौ ङीपि निषिद्धे रो न[७]। यत्र चशब्दो न तत्र सोऽध्याहर्तव्यः[८]। अन्यतरापाये इति तु तन्न्यायालभ्यम्[९]। समुच्चये सह प्रवृत्तेर्लोके[१०] दर्शनेऽपि तस्यादर्शनात्। इडबिडोऽपत्यं[११] स्त्री जनपदशब्दात् ...(4-1-168/1186) इत्यञ्[१२]। तस्य अतश्च (4-1-177/1196) इति लुकि[१३] इष्ठनि दृष्टस्यैवातिदेशाद्गुणवचनत्त्वाभावेन[१४] अस्मादिष्ठनोऽदर्शनात् न[१५] पुंवद्भावः इति

---

[१] ०कालिकवत्साधुरिति V A^1 M^2 : ०कालिवत्साधुरिति A^2 ०कालिकत्त्वत्साधुरिति M^1

[२] इतीयमित्यर्थः M^1 : इयमित्यर्थः V A^1 A^2 M^2

[३] सिद्धम् V A^1A^2 M^2 : सिद्धिः M^1

[४] अगस्त्यादेश० A^2 M^1 : आगस्त्यादेश० V A^1 M^2

[५] तत्र अनूद्यमा० A^2 : तच्च अनुवाद्यमा० V M^2 तच्च अनूद्यमा० A^1 M^1

[६] इति V A^1 M^1 M^2 : om A^2

[७] निषिद्धे रो न । यत्र च शब्दो न V M^1 M^2 : निषेधेऽपि न । यत्र च शब्दो न A^1 निषिद्धे A^2

[८] सोऽध्याहर्तव्यः V A^1 M^1 M^2 : अध्याहार्यः A^2

[९] इति तु तन्न्यायालभ्यम् V M^2 : उभयोरप्यपाय इति तु न्यायलभ्यम्। A^1 इति तु तन्न्यायलभ्यम् A^2 उभयोरप्यपाय इति तु न न्यायलभ्यम्। M^1

[१०] सह प्रवृत्तेर्लोके V A^1A^2 M^2 : सह प्रवृत्तेर्लोकेऽपि M^1

[११] इडबिडोऽपत्यम् V A^1 M^1 M^2 : इडबिडमिति । इडबिडोऽपत्यम् A^2

[१२] इत्यञ् V A^1 A^2 M^2 : इत्यञि M^1

[१३] लुकि M^1 : लुक् V A^1A^2 M^2

[१४] ०वचनत्त्वाभावेन VA^2 M^1 M^2 : ०वचनाभावेन A^1

[१५] न V A^2 M^2 : नात्र A^1 M^1

कैयटाशयः। अपत्यमेकः गुणः धनमेको गुण[१] इति भाष्यं तु एकदेश्युक्तिरिति तत्पुरुषप्रकरणे शेखरे[२] एवोक्तमित्यन्ये।

[२]

सिद्धमिति[३]। तत्र विधिशब्दो[४] भावसाधनोऽप्याश्रीयत इति भावः।

परे तु धर्मिग्राहकमानाल्लुग्विषय एवैषा परिभाषा। तेन ऐनेय इति सिद्धम्[५]। अत एव तार्त्तीयीक इत्यत्र सम्प्रसारणस्य निवृत्तावपि न तीयस्य निवृत्तिः[६]। एवं हि[७] फौल्लिरपि सिद्ध्यति। एवं खेय इत्यत्रे[८]त्वस्य[९] निवृत्तावपि न क्यपो निवृत्तिः[१०]। धिनोतीत्यत्र च[११] अतो निवृत्तावपि नो प्रत्ययनिवृत्तिः। न हि अत्र भावसाधनविधिशब्दाश्रयणेन निर्वाहः। पूर्वस्य स्थितेरभावात्। किञ्च भावे क्वापि[१२] विधिशब्दः उत्पादनार्थो[१३] न स्थितिपरः। एतत्फलत्वेन भाष्योदाहृते[१४]

---

[१] धनमेको गुणः V A^1 A^2 M^2 : om M^1

[२] तत्पुरुषप्रकरणे शेखरे A^1A^2 M^1 : तत्पुरुषशेखरे V M^2

[३] सिद्धमिति A^1A^2 M^1 : सिद्ध इति V M^2

[४] विधिशब्दो V A^2 M^1 M^2 : विषयिशब्दो A^1

[५] तेन ऐनेय इति सिद्धम् V A^2 M^1 M^2 : तेनैनैयमिति A^1

[६] न तीयस्य निवृत्तिः V A^1 A^2 M^2 : तीयस्यानिवृत्तिः M^1

[७] एवं हि V A^2 M^2 : एवं A^1 एवं च M^1

[८] एवं खेय इत्यत्रे०.....०कारात्सिद्धम्। जातनिवृत्तिस्तु V A^1 M^1 M^2 : om A^2

[९] खेय इत्यत्रेत्वस्य V M^2 : खेयमित्यत्र इत्वस्य A^1 खेयमित्यत्र ईत्वस्य M^1 A^2*

[१०] न क्यपो निवृत्तिः V M^2 : न युतो निवृत्तिः A^1 क्यपोऽनिवृत्तिः M^1 A^2*

[११] धिनोतीत्यत्र च V M^1 M^2 : धिनोतीत्यत्र A^1 A^2*

[१२] किञ्च भावे क्वापि A^1 : किञ्च भावे कावपि V M^2 किञ्चाभावेऽपि M^1 A^2*

[१३] उत्पादनार्थो V M^2 : उत्पादनपरः A^1 M^1 A^2*

[१४] भाष्योदाहृते V A^1 M^2 : भाष्यादावुदाहृते M^1 A^2*

धिन्वन्तीत्यत्र[१] इट उत्पाद्यत्वात्[२]। आगस्तीयः[३] वहयतीत्यादि[४] तु उक्तरीत्या सहैव प्रवृत्तिनिवृत्त्योः अङ्गीकारात्सिद्धम्। जातनिवृत्तिस्तु ज्ञापकसाध्यैव[५]। अनया[६] जातनिवृत्तिबोधनद्वारा[७] प्रकृतिस्थितिरेव[८] बोध्यते। तेन पञ्चेन्द्रः इत्यत्राकारस्य[९] त्रिकमित्यत्र च रिशब्दस्य श्रवणं[१०] सिध्यतीत्याहुः[११] ॥ ८६ ॥

ताच्छीलिके णेऽण्कृतानि भवन्ति ॥ ८७ ॥
धातोः कार्यमुच्यमानं तत्प्रत्यये भवति ॥ ८८ ॥
तन्मध्यपतितस्तद्ग्रहणेन गृह्यते ॥ ८९ ॥

लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ॥ ९० ॥

[१]

अत एवेति। ज्ञापकसिद्धत्वाभावादेवेत्यर्थः[१२]। तत्सिद्धत्वे च लुग्विकरणस्यैवेति ज्ञापनेऽपि सूतिसूयत्योः[१३] पृथक्निर्देशस्य सार्थक्यसम्भवात्[१४] तथापि ज्ञाप्यते इति

---

[१] धिन्वन्तीत्यत्र A^1 M^1 : धिन्वतीत्यत्र V M^2 A^2*

[२] इट उत्पाद्यत्वात् V A^1 M^2 : इडुत्पाद्यत्वात् M^1 A^2*

[३] आगस्तीयः V M^1 M^2 : अगस्तीयः A^1 A^2*

[४] वहयतीत्यादि V A^1 M^1 M^2 : वहतीत्यादि M^2 A^2*

[५] ज्ञापकसाध्यैव V M^2 : ज्ञापकसिद्ध्यैव A^1 वस्तुतस्तु ज्ञापकसाध्यैव A^2 ज्ञापकसाध्या M^1

[६] अनया V A^2 M^2 : अनया च A^1 M^1

[७] ०निवृत्तिबोधनद्वारा V M^2 : ०निवृत्तिबोधनया A^1 ०निवृत्तिबोधद्वारा A^2 ०निवृत्तिद्वारा M^1

[८] प्रकृतिस्थितिरेव V A^1 A^2 M^2 : प्रतिस्थितिरेव M^1

[९] इत्यत्राकारस्य V A^2 M^2 : इत्यत्राकरस्य A^1 इत्यादौ अकारस्य M^1

[१०] च रिशब्दस्य श्रवणम् V A^2 M^2 : शब्दस्य च श्रयणम् A^1 रिशब्दस्य श्रवणम् M^1

[११] सिध्यतीत्याहुः V A^1 A^2 M^2 : सिध्यतीत्याहुः इति सन्निपातपरिभाषाविचारः समाप्तः M^1

[१२] ०भावादेवेत्यर्थः V A^2 M^2 : ०भावादित्यर्थः A^1

[१३] सूतिसूयत्योः V A^1 A^2 M^2 : सूतिसूयत्यै M^1

[१४] सार्थक्यसम्भवात् V A^2 M^1 M^2 : सार्थक्यासम्भवात् A^1

भावः।

परे तु अलुग्विकरणत्वेनेव[१] श्यन् विकरणत्वेनापि[२] साहचर्याश्रयण-सम्भवात्[३] कैयटोक्तं ज्ञापकं[४](भा०ष०ख०द्वि०आ०पृ०134प्रदी०7-2-44) सुस्थमेव[५]। गापो[६]...(3-2-8/2922) इति सूत्रे पिबतेः ¶ ...(वा०सं०2013) इति वार्त्तिकन्तु अस्तेर्भूभावे सिचो लुगर्थम्। घुसाहचर्येण परिच्छेदकन्यायाप्रवृत्त्यभिप्रायकम्[७]। पाग्रहणे च पिबतेः सर्वत्रैव[८] पाग्रहणेऽलुग्विकरणस्य ग्रहणमिति तत्प्रत्याख्यान-भाष्यस्य त्वयं भावः। घुमास्थ...(6-4-66/2462) इत्यत्रापि[९] पूर्वोत्तरसाहचर्येण लुग्विकरणस्यैव[१०] ग्रहणापत्तिवारणाय लुग्विकरण...(परि०91) परिभाषायाः साहचर्यपरिभाषाबाधकत्वौचित्यात्[११]। घुसाहचर्येऽपि लुग्विकरणपरिभाषा प्रवर्तते एव। अस्ते भूभावे तु नैषा। धर्मिग्राहकमानेनादेशत्वानाक्रान्ते एवैतत्परि-भाषाप्रवृत्तिरिति[१२]। अत एव उपान्वध्याङ्वसः (1-4-48/544) इति सूत्रेऽनया

---

[१] अलुग्विकरणत्वेनेव V M^2 : लुग्विकरणत्वेने A^1 अलुग्विकरणत्वेनैवा A^2 लुग्विकरणत्वेन M^1

[२] श्यन् विकरणत्वेनापि V A^2 M^2 : अस्यं विकरत्वेनापि A^1 श्यन वाशब्दकरणत्वेनापि M^1

[३] साहचर्याश्रयणसम्भवात् V A^1 A^2 M^2 : साहचर्याश्रयणेन असम्भवात् M^1

[४] ज्ञापकं V A^1 A^2 M^2 : ज्ञापकमपि M^1

[५] सुस्थमेव V A^1 M^1 M^2 : सुस्थैव A^2

[६] गापो... (3-2-8/2922)ego : गातिस्थ ... (2-4-77/2223) V A^1 $A^2$$M^1$ M^2

[७] ०प्रायकम् V A^1 M^1 M^2 : ०प्रायम् A^2

[८] पाग्रहणे च पिबतेः सर्वत्रैव VA^2 M^2 : पाग्रहणे च चापि सर्वत्रैव वात्र A^1 पाग्रहणेऽपि सर्वत्रैवम् M^1

[९] इत्यत्रापि V A^2 M^2 : इत्यत्र A^1 M^1

[१०] लुग्विकरणस्यैव V M^1 M^2 : लुप्तविकरणस्यैव A^1 A^2

[११] ०रिभाषाबाधकत्वौचित्यात् V M^2 : ०रिभाषां बाधकत्वावश्यकत्वात् A^2 ०रिभाषाबाधकत्वा वश्यकत्वात् A^1 M^1

[१२] ०न्ते एवैतत्परिभाषाप्रवृत्तिरिति V M^1 M^2 : ०न्त एवैतत्परिभाषाप्रवृत्तेरिति A^1 ०न्ते एवैतवप्रवृत्तिरिति A^2

परिभाषया[१] वसतेरेव ग्रहणम्। घटादौ च परिभाषाद्वयबलात् द्वयोः ग्रहणमित्याहुः ॥ ९० ॥

प्रकृतिग्रहणे ण्यधिकस्यापि ग्रहणम् ॥ ९१ ॥

[१]

प्रजिघापयिषतीति[२]। जिहननीयिषतीत्यत्र कुत्ववारणायाभ्यासाङ्गनिमित्त-प्रत्य ययोः[३] कुत्वविधौ एकत्वविज्ञानादिति भावः ॥ ९१ ॥

अङ्गवृत्ते पुनर्वृत्तावविधिः ॥ ९२ ॥

सञ्ज्ञापूर्वकविधेरनित्यत्वम् ॥९३.१॥

संज्ञापूर्वकेति[४]। स्वं रूपं…(1-1-68/25), तपरः…[५](1-1-70/15),

अणुदित्[६]…(1-1-69/14) इति संज्ञातिरिक्तसंज्ञेत्यर्थः

आगमशास्त्रमनित्यम् ॥ ९३ .२ ॥
गणकार्यमनित्यम् ॥९३.३॥
अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम् ॥९३.४॥
नञ्घटितमनित्यम् ॥९३.५॥
आतिदेशिकमनित्यम् ॥ ९३.६ ॥

---

[१] परिभाषया V A^2 M^1 M^2 : परिभाषया न A^1

[२] प्रजिघापयिषतीति V M^2 : प्रजिघाय इषतीति A^1 प्रतिजिघापयिषतीति A^2 प्रजिघाययिषतीति M^1

[३] ०निमित्तप्रत्यययोः V A^1 A^2 M^2 : ०प्रत्यययोः M^1

[४] संज्ञापूर्वकेति V A^2 M^2 : द्वयोरिति। द्वयोरेकस्य डतरच्। संज्ञापूर्वकेति A^1 M^1

[५] तपरः V M^1 M^2 : तपरम् A^1 A^2

[६] अणुदित् V A^2 M^2 : अणुत् A^1 M^1

सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ॥ ९३. ७. ८.॥

[१]

असाध्वेवेति। बहुशिष्टप्रयोगान्महाकविप्रयोगाच्च पृषोदरादित्वात् साधुत्वं बोध्यमिति तत्त्वम्।

प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ॥ ९३.९ ॥

[१]

समुदायस्यैवेति[१]**।** इदन्तु न युक्तम्। निर्दिश्यमान...(परि०12) परिभाषया समुदायस्यादेशाप्राप्तेः। बिभेदेत्यादौ[२] न धातु...(1-1-4/2656) इति निषेधस्तु न। हलादिः शेषः ...(7-4-60/2179) इत्यत्र प्रत्ययाक्षेपे[३] मानाभावात्। विस्तरेण एतत्पूर्वं निरूपितम् ।

विधौ परिभाषोपतिष्ठते नानुवादे ॥ ९३.१० ॥

[१]

तर्कमूलेयमिति। तस्मिन्नित्यादिविषये तु अनूद्यमानविशेषणे व्यवस्थापकत्वेन चरितार्थायाः तद्विशेषणे न व्यवस्थापकत्वमिति[४] तर्को बोध्यः[५]।

---

[१] समुदायस्यैवेति V A^2 M^1 M^2 : समुदायस्येति A^1

[२] बिभेदेत्यादौ A^1 M^1 : विभेदेत्यादौ V A^2 M^2

[३] प्रत्ययाक्षेपे V A^1 A^2 M^2 : प्रत्ययत्वे M^1

[४] व्यवस्थापकत्वमिति V A^1 M^1 M^2 : व्यवस्थापकमिति A^2

[५] बोध्यः A^1 A^2 M^2 : बोधः V M^1

[२]

भाष्योक्तरीत्येति। तत्र हि स्य (6-1-13भा०प०ख०द्वि०आ०पृ०34) इत्याक्षिप्त[१]यजा-दिभि[२]रनो विशेषणान्न अनस्तक्ष्णा[३] इत्यत्र दोष इत्युक्त्या अङ्गस्य विशेषण -मित्युक्तमिति[४] भावः।

उपपदविभक्तेः कारकविभक्तिर्बलीयसी ॥ ९४ ॥

[१]

क्रियाजनकार्थेति । तद्विशेषकर्त्राद्य[५]र्थकेत्यर्थः। तत्त्वं च कर्तृत्वादि विशिष्टस्य[६] तत्राभेदे[७]नान्वयिनो वा अर्थकस्य[८] वाचकत्वम्। ननु नमस्यति देवान् इत्यत्र द्वितीया-चतुर्थ्योः भिन्नार्थत्वे[९] सम्प्रधारणायोगे[१०] नैकार्थत्वात् चतुर्थ्यपि कारक-विभक्तिः स्यात्। तद्वक्ष्यति क्रियाकारकभावेनेति चेन्न[११] ; यस्मिन् शब्दे यस्याः कारकार्थत्वं तस्मिन्नेव स्वातन्त्र्येण प्रयुज्यमाने[१२] तस्याः तदर्थकत्वे एव कारक-विभक्तित्वाङ्गीकारात्[१३]। प्रथमाया अव्ययेषु कर्त्राद्यर्थकत्वाभावेऽपि वृक्ष इत्यादौ

---

[१] इत्याक्षिप्त A^2 M^1 M^2 : इत्याक्षिप्य V इत्याक्षिप्तस्य A^1

[२] यजादिभि० V A^1 A^2 M^2 : यज्यादिभि० M^1

[३] अनस्तक्ष्णा V A^2 M^1 M^2 : अनस्तक्ष A^1

[४] इत्युक्त्याङ्गस्य विशेषणमित्युक्तमिति V A^2 M^2 : इत्युक्तं स्यङ्गस्य विशेषणमिति A^1 इत्युक्तमिति M^1

[५] तद्विशेषकर्त्राद्य० V A^1 M^2 : तद्विशेषे कर्त्राद्य० A^2 तद्विशेषणकर्त्राद्य० M^1

[६] विशिष्टस्य V A^1 A^2 M^1 : विशिष्ठस्य M^2

[७] तत्राभेदे० A^1 A^2 M^1 : तन्त्राभेदे० V M^2

[८] अर्थकस्य V M^2 : अर्थस्य A^1 A^2 M^1

[९] भिन्नार्थत्वे V A^1 A^2 M^2 : भिन्नार्थकत्वे M^1

[१०] सम्प्रधारणायोगे V A^1 A^2 M^2 : सम्प्रसारणायोगे M^1

[११] चेन्न V A^1 A^2 M^2 : वोच्यम् M^1

[१२] प्रयुज्यमाने V A^1 A^2 M^2 : प्रयुज्यमानेन M^1

[१३] ०भक्तित्वाङ्गीकारात् V A^1 A^2 M^2 : ०भक्ति अङ्गीकारात् M^1

तिष्ठतीत्यादियोगे[१] तदर्थकत्वमेव। चतुर्थ्यास्तु हरये नमः इत्यत्र तस्मिन्नेव नमः शब्देन[२] कर्त्राद्यर्थकत्वमिति न कारकविभक्तित्वम्। **ध्वनितमिति**। ननु लक्ष्य - लक्षणभावे यस्य च[३]...(2-3-37/634) इति सप्तमी अधिकारयोगे[४] चास्मिन्नेव नमः शब्देन कर्त्राद्यर्थकत्वमिति न कारकविभक्तित्वं चार्थभेदाद्युगपत्। न सम्प्रसारणे ...(6-1-37/ 363) इति[५] कथमेतदिति चेन्न। कथमपि कारकविभक्तित्वसम्भवे[६] उपपदविभक्तिः न कर्तव्येत्यर्थेन अदोषात्[७]। अत एव उद्देश्यत्वमात्र विवक्षायां[८] देवाय नमस्करोतीति न प्रयोगः।

[२]

यत्किञ्चित्क्रियेति। यथा "राज्ञः पुरुष" इत्यत्र पुरुषस्य राज्ञा स्वस्वामिभावे[९] राजकर्मकसेवायां कर्तृक्रियाभावमूलकः। अस्तिक्रियायाः[१०] कर्तृक्रियाभावस्तु न तथेति प्रथमैवेति भावः[११] ॥ ९४ ॥

---

[१] तिष्ठतीत्यादियोगे A^1 : तिष्ठत्यादियोगे V A^2 M^2 M^{1*}

[२] कर्त्राद्यर्थकत्वा० .....०न्नेव नमः शब्देन V A^1 A^2 M^2 : jmp M^1

[३] यस्य च V A^2 M^1 M^2 : यस्येति च A^1

[४] अधिकारयोगे V A^1 M^2 : अधिकरणे A^2 M^1

[५] चास्मिन्नेव नमश्शब्देन कर्त्राद्यर्थकत्वमिति न कारकविभक्तित्वं चार्थभेदाद्युगपत् न सम्प्रसारणे M^1: चापरेत्यर्थभेदाद्युगपत्। न सम्प्रधारण इति V M^2 चापरे इत्यर्थभेदाद्युगपन्न सम्प्रधारणमिति A^1 चापरेत्यर्थभेद्युगपत्। न सम्प्रधारण इति A^2

[६] कारकविभक्तित्वसम्भवे V A^1 A^2 M^2 : कारकविभक्तिसम्भवे M^1

[७] कर्तव्येत्यर्थेन अदोषात् V A^2 M^1 M^2 : कर्तव्येत्यदोषात् A^1

[८] विवक्षायां V M^2 : विवक्षया A^1 A^2 M^1

[९] स्वस्वामिभावे V A^1 A^2 M^2 : स्वस्वामिभावो M^1

[१०] अस्तिक्रियायाः V A^1 A^2 M^2 : अस्तिक्रियया M^1

[११] प्रथमैवेति भावः M^1 : प्रथमैवेति V A^1 A^2 M^2

अनन्त्यविकारेऽन्त्यसदेशस्य ॥ ९५॥

[१]

तदर्थ इति। अत एव र्वोरुपधा... (8-2-76/433) इत्यत्र उपधाग्रहणं[१] चरितार्थम्।

[२]

इतराव्यधानेन इति[२]। तेन चलीक्लृप्यत[३] इत्यत्र द्वयोः लत्वसिद्धिः। **अङ्गावयवेति।** अङ्गावयवश्चासौ यजादिपरश्चेति कर्मधारयः[४]। **उदात्तनिर्देशादिति।** तत्र[५] हि नेता[६] सोता। माषवापेणेत्यादावेव नत्वसत्वणत्वादीनि[७] स्युः न तु नमति[८] सिञ्चति माषवापाणाम् इत्यादावित्याशङ्क्य यत्रैषापरिभाषा उच्यते[९] तत्र उदात्तनिर्देशः कर्तव्यः। अनन्त्यविकारे अन्त्यसदेशस्येति[१०] कार्यं भवति। उदात्तनिर्देशाः इति च परिभाषा[११] पाठ्या इत्युक्तम् (6-1-14भा० प०ख० द्वि०आ० पृ०35-36)।

---

[१] इत्यत्र उपधाग्रहणं A^1 A^2 : इत्युपधाग्रहणं V M^2 इति तत्रोपधाग्रहणं M^1

[२] इतराव्यधानेन इति ego : इतराव्यधान इति V A^2 M^1 M^2 इतरव्यधान इति A^1

[३] चलीक्लृप्यत V A^1 M^2 : चलीह्लप्यत A^2 चलीक्लृप्यते M^1

[४] अङ्गाव०.....०र्मधारयः V M^2 : om A^1A^2 M^1

[५] तत्र V A^1 A^2 M^2 : अत्र M^1

[६] नेता V A^1 M^1 M^2 : नाता A^2

[७] नत्वसत्वणत्वादीनि V A^2 M^2 : नत्वषत्वणत्वादीनि A^1 नत्वसत्वणत्वानि M^1

[८] स्युः न तु। नमति V A^2 M^1 M^2 : न स्युः । ननु नमः A^1

[९] उच्यते V A^2 M^2 : इष्यते A^1 M^1

[१०] अन्त्यसदेशस्येति A^1 : अन्त्यसदेशस्य V A^2 M^1 M^2

[११] उदात्तनिर्देशाः इति च परि०V M^2 : उदात्तनिर्देश इति परि० A^2 उदात्तनिर्देशः इति च परि० A^1 M^1

इदमुपलक्षणम्। एतदुत्तरमिदमपि प्रत्याख्याय[१] यत्रैवान्त्य[२]सदेशश्चानन्त्य-सदेशश्चैकप्रयोगे युगपत् समवस्थितौ तत्रैषेत्युक्तेः[३]।

[३]

अन्यत्र विस्तरः इति। परे तु ष्यङः सम्प्रसारणम्... (6-1-13/1003) इति सूत्रे वार्त्तिककृदुक्तानि प्रयोजनानि[४] क्लिष्टोपायैरेव[५] अन्यथा संसाधितानि भाष्यकृता। प्रतिविधेयं दोषेषु ... (6-1-13भा०प०ख०द्वि०आ० पृ०36) इति भाष्यं तु अतिप्रसङ्गानां वार्त्तिककृदुक्तानां[६] सुपरिहरत्वात् न तावन्मात्रेणास्याः अकर्तव्यता सिद्ध्यति[७]। किन्तु प्रयोजनाभावेनैव[८] इत्यभिप्रायकम्। अत एव न सम्प्रसारण ...(6-1-37/363) इति सूत्रे न एतस्याः प्रयोजनानि इति फलाभावेन अस्याः अकर्तव्यता भाष्यकृतोक्ता[९]। तत्र न तावन्मिमार्जिषतीति[१०] प्रयोजने[११] उरदत्वम्

---

[१] एतदुत्तरमिदमपि प्रत्याख्याय V A^2 M^2 : एतदुत्तरमिदमपि प्रत्याख्यानाय A^1 एतदुत्तरमिदमिदमिति प्रत्याख्याय M^1

[२] यत्रैवान्त्य V A^1 A^2 M^2 : तत्रैवान्त्य M^1

[३] तत्रैषेत्युक्तेः V M^2 : तत्रैवेत्युक्तेः। **अङ्गावयवेति।** अङ्गावयवश्चासौ यजादि परश्चेति कर्मधारयः A^1 तत्रैषेत्युक्तेः। **अङ्गावयवेति।** अङ्गावयवश्चासौ यजादि परश्चेति कर्मधारयः A^2 तत्रैषेत्युक्तम् । **अङ्गावयवेति।** अङ्गावयवश्चासौ यजादि परश्चेति कर्मधारयः M^1

[४] वार्त्तिककृदुक्तानि प्रयोजनानि V A^2 M^1 M^2 : वार्त्तिककृदुक्तप्रयोजनानि A^1

[५] अक्लिष्टोपायैरेव V A^1 A^2 M^2 : अनिष्टोपायैरेव M^1

[६] तु अतिप्रसङ्गानां वार्त्तिककृदुक्तानां V A^2 M^1 M^2 : कृति प्रसङ्गानां A^1

[७] सिद्ध्यति V A^1 A^2 M^2 : सिद्धिः M^1

[८] भावेनैव V A^1 A^2 M^2 : भावेन M^1

[९] भाष्यकृतोक्ता V A^1 A^2 M^2 : भाष्योक्ता M^1

[१०] तावन्मिमार्जिषतीति V A^1 M^2 : तावमिमर्जिषतीति A^2 तावन्मार्जिषतीति M^1

[११] प्रयोजने V M^2 : प्रयोजनं A^1 A^2 M^1

इत्वं वा नित्यत्त्वात् बाधित्वा वृद्धौ ह्रस्वे च[१] रूपसिद्धेः[२]। अत्वोत्तरमित्वे वृद्धिप्राप्तेः तस्याः नित्यत्वम्। न च वृद्धिं बाधित्वा ह्रस्वः। अत्वस्य[३] ह्रस्वापवादत्वेन तद्विषये तत्प्रवृत्तिपर्यन्तं[४] ह्रस्वाप्रवृत्तेः। अभ्यासविकारे बाध्यबाधकभावो न[५] (परि० 66) इति तु सर्वसमावेशतात्पर्यकम् । न न्यायप्रवृत्तिविघटकम्[६] इत्युक्तं प्राक् । यद्वा - प्रतिपदोक्तत्वाद् वृद्धिः। तदेतद-भिप्रेत्य अस्तु वृद्धिः। अभ्यासह्रस्वेन सिद्ध्यतीत्युक्तं[७] भाष्ये। त्वन्मते[८] अभ्यासस्य मृजित्वाभावश्च[९]। नाप्यदमुयङ् इति प्रयोजनम्। तस्य साधुत्वासम्प्रतिपत्तेः। इति भवितव्यमित्युक्त्या तत्र अयुक्तत्वं[१०] सूचितमिति शेखरे त्वयाप्यसाधुत्वोक्तेश्च[११]। अत एव ष्यङः...(6-1-13/1003) इति सूत्रे एतत् परि[१२]भाषाप्रयोजनेषु न एतद्गणितं[१३] वार्त्तिककृता। अत एव[१४] अदसोऽसेः ... (8-2-80/419) इति सूत्रे

---

[१] ह्रस्वे च M^1 : ह्रस्वे V $A^1 A^2$ M^2

[२] रूपसिद्धेः V A^2 M^1 M^2 : रूपसिद्धिः A^1

[३] ह्रस्वः। अत्वस्य V M^2 : परत्वात् गुणः। अस्य A^1 परत्वात् ह्रस्वः । अत्वस्य A^2 M^1

[४] तत्प्रवृत्तिपर्यन्तम् V A^2 M^1 M^2 : एतत्प्रवृत्तिपर्यन्तम् A^1

[५] बाध्यबाधकभावो न A^1 A^2 : बाध्यबाधकभावौ न V M^1 M^2

[६] न्यायप्रवृत्तिविघटकम् V A^1 A^2 M^2 : न्यायप्रवृत्तिनिवृत्तिविघटकम् M^1

[७] अभ्यासह्रस्वेन सिद्ध्यतीत्युक्तं V A^1 A^2 M^2 : अभ्यासह्रस्वो न सिद्ध्येदित्युक्तं M^1

[८] त्वन्मते V A^2 M^1 : तन्मते A^1 M^2

[९] मृजित्वाभावश्च V A^2 M^2 : मृजित्वाभावाच्च A^1 M^1

[१०] अयुक्तत्वं A^1 : अप्रयुक्तत्वं V A^2 M^1 M^2

[११] त्वयाप्यसाधुत्वोक्तेश्च V A^1 M^1 M^2 : त्वयाप्यस्यासाधुत्वापत्तेश्च A^2

[१२] एतत्परि० V A^2 M^1 M^2 : तत्परि० A^1

[१३] एतद्गणितं V A^2 M^1 M^2 : एतद्गदितं A^1

[१४] एव V A^1 M^2 : एव च A^2 M^1

अदोऽत्रेत्यत्र[१] मुत्ववारणाय असेः सकारस्य स्थाने इति[२] व्याख्याय यद्येवममुमुयङीति न सिद्ध्यति। अदद्यङिति प्राप्नोतीत्युक्तं भाष्ये[३]। यत्तु तदग्रे भाष्यम्[४]। अनन्त्यविकारे[५] अन्त्यसदेशस्येत्य[६]दमुयङिति भवितव्यमिति तत्तु एकदेशिनः। एवमदसोद्रेः ¶...(8-2-20भा०ष०ख० द्वि०आ०पृ०135) इति श्लोकवार्त्तिके पूर्वार्धमेव[७] सिद्धान्त्युक्तिः। एतदुत्तरं भाष्यवार्त्तिककाराभ्यां[८] सिद्धन्तु[९] सकारप्रतिषेधात् (8-2-80 भा०ष०ख०द्वि०आ०पृ०135) इत्यादिना असेः ...(8-2-80/419) इति प्रतिषेधः एवोक्तः[१०]। तस्माच्चलीक्लृप्यत इतिवत् अमुमुयङित्येव साधु। न च पूर्वार्धमेवैकदेश्युक्तिरिति[११] वाच्यम्। नैतस्याः[१२] प्रयोजनानीत्युक्त-भाष्यानुरोधात्[१३] वार्त्तिककृता प्रयोजनेष्वपरिगणनाच्च[१४] इत्यवेहि। नापि अनः

---

[१] अदोऽत्रेत्यत्र V A^1 M^1 M^2 : अदोन्नेत्यत्र A^2

[२] सकारस्य स्थाने इति M^1 : सकारस्येति V A^1 A^2 M^2

[३] भाष्ये V A^2 M^1 M^2 : भाष्यकृदुत्तरं भाष्यवार्त्तिककाराभ्यामेव A^1

[४] भाष्यम् V A^2 M^1 M^2 : भाष्ये A^1

[५] अनन्त्यविकारे V A^1 M^1 M^2 : अनत्ये विकारे A^2

[६] अन्त्यसदेशस्येत्यद० V A^1 M^1 M^2 : अन्त्यसदेशस्येत्येद० A^2

[७] श्लोकवार्त्तिके पूर्वार्धमेव A^1 A^2 : श्लोकवार्त्तिकपूर्वार्धमेव V M^1 M^2

[८] भाष्यवार्त्तिककाराभ्यां V M^1 M^2 : भाष्यवार्त्तिकाभ्यां A^1 भाष्यकारवार्त्तिककाराभ्यां A^2

[९] सिद्धन्तु V A^1 M^1 M^2 : सिद्धन्तु स तु A^2

[१०] एवोक्तः V M^2 : एवोक्तेः A^2 : इत्येवोक्तेः A^1 M^1

[११] ०देश्युक्तिरिति V A^2 M^2 : ०देश्युक्तिः किं नेति वाच्यम् A^1 M^1

[१२] नैतस्याः V A^1 M^1 M^2 : नैतस्याम् A^2

[१३] भाष्यानुरोधात् V A^2 M^1 M^2 : भाष्यविरोधात् A^1

[१४] अपरिगणनाच्च V A^2 M^1 M^2 : परिगणनाच्च A^1

तक्ष्णेत्यादि[१] सिद्धिः फलम्। यजादिपरतया अन्कारं[२] विशेषयिष्यामः (6-1-13 भा०प०ख० द्वि०आ०पृ०34) इति भाष्ये एव परिहृतत्वात् । अथाङ्गांशे प्रत्ययस्योत्थिताकाङ्क्षतया सोर्थो नोचित इति चेन्न। भाष्याशयानवबोधात्। प्रष्ठवाट् विश्वौहः[३] पश्य दीर्घपात् सुपदः पश्य श्वयुनः[४] पश्येत्यादौ ऊठ्पद्भा[५]वसम्प्रसारणानां पूर्वपदेऽप्रवृत्तये[६] परिभाषाश्रयणेऽपि[७] अयमर्थः भाधिकारे आवश्यकः इति भगवतोऽभिप्रायः। नहि इदमुक्तपरिभाषया निर्वोढुं शक्यम्। चलीक्लृप्यत इत्यनुरोधेनान्त्यवर्णतद्वर्णयोरितराव्यवधाने एव एतत्प्रवृत्तेः कल्पितत्वात्[८]। वस्तुतो नोपधाया इत्यादावुपधाग्रहणात्[९]। अङ्गाधिकारे प्रत्ययः अङ्गस्यैव विशेषणम्। उक्तभाष्यन्तु परिहारान्तरोपलक्षणम्। तथाहि स च असावेव चेति[१०] विग्रहे तदेष इत्यत्र तदस्तकारस्य सत्वम् अनन्त्यविकरः इति परि[११]भाषया न शक्यं वारयितुम्। अनन्त्ययोः इत्युक्त्या परत्वेनापवादत्वेन च त्यदाद्यत्वात्पूर्वं सत्त्वं वाच्यम्। तत्र[१२] चान्त्यवर्ण-

---

[१] तक्ष्णेत्यादि A^1 A^2 M^1 : स्तक्ष्णेत्यादि V M^2

[२] अन्कारम् ego : न V A^1 A^2 नकारम् M^1 नं M^2

[३] विश्वौहः V A^2 M^1 M^2 : प्रष्ठौहः A^1

[४] श्वयुनः V M^2 : युवशुनः A^1 A^2 युपशुनः M^1

[५] ऊठ्पद्भाव० A^1 M^1 : उट्पद्भाव० V M^2 ऊट्पद्भाव० A^2

[६] अप्रवृत्तये V A^2 M^1 M^2 : प्रवृत्तये A^1

[७] परिभाषाश्रयणेऽपि V A^2 M^1 M^2 : परिभाषाश्रयणे A^1

[८] कल्पितत्वात् A^1 : कल्प्यत्वात् V A^2 M^1 M^2

[९] ०धाग्रहणात् V A^2 M^1 M^2 : ०धाग्रहणाग्रहणा A^1

[१०] स च असावेव चेति V A^1 M^1 M^2 : सिच्चासावस् चेति A^2

[११] अनन्त्यविकार इति परि० M^1 : अनन्त्यपरि० V M^2 अनन्त्यविकारपरि० A^1 A^2

[१२] तत्र .....०ति निर्वाहः V A^2 M^1 M^2 : om A^1

तद्वर्णयोर्व्यवधाने[१] न एतस्याः प्रवृत्तेः[२]। नापि अल्लोपो नः (6-4-134/234) इत्यादाविव साविति तदोर्विशेषणमिति[३] निर्वाहः। तथा सति येन नाव्यवधानन्यायेन[४] द्वाभ्यामेव व्यवधाने[५] प्रवृत्त्यापत्तौ स्य इत्यादौ[६] त्रिभिः व्यवधाने तदनापत्तेः[७]। न च त्यदाद्यत्वोत्तरं पररूपे द्वाभ्यामेव व्यवधानमि[८]ति वाच्यम्। एवमपि अचः परस्मिन् (1-1-57/50) इति पररूपस्य स्थानिवत्त्वेन त्रिभिः व्यवधानतादवस्थ्यात्। तस्मात् त्यदाद्यन्तस्य[९] अङ्गस्य तदोरित्यर्थे तदोरेव[१०] निर्दिश्यमानत्वेन[११] निर्दिश्यमान (परि०12) परिभाषयावा[१२] अन्त्यत्यदादि तदोरेव सत्त्वमिति न दोष इत्यवश्यं[१३] सर्वैर्वाच्यम्। तथा च एवमेवान्नन्तस्याङ्गस्य इत्यर्थेऽनस्तक्ष्णेत्यादौ न दोषः। किञ्च[१४] एतत्परि-भाषादरणे नोपधायाः (6-4-7/370) इत्यत्रोपधाग्रहणवैय्यर्थ्यम्। पञ्चानामित्यादौ

---

[१] चान्त्यवर्णतद्वर्णयोर्व्यवधाने V M^2: चान्त्यतद्वर्णतद्वर्णयोर्व्यवधाने A^2 अन्त्यवर्णतद्वर्णयोर्व्यवधाने M^1 A^{1*}

[२] प्रवृत्तेः V A^2 M^2 : अप्रवृत्तेः M^1 A^{1*}

[३] तदोर्विशेषणमिति V A^2 M^2 : तदोर्विशेषणेनेव M^1 A^{1*}

[४] ०नाव्यवधानन्यायेन V A^1 A^2 M^2 : ०नाव्यवधानमिति न्यायेन M^1

[५] द्वाभ्यामेव व्यवधाने V A^2 M^1 M^2 : द्वाभ्यामव्यवधाने A^1

[६] स्य इत्यादौ V M^2 : स इत्यन्त A^1 स्य इत्यत्र A^2 M^1

[७] तदनापत्तेः V A^1 A^2 M^2 : तदनापत्तेश्च M^1

[८] व्यवधा० V A^1 A^2 M^2 : अत्र व्यवधा० M^1

[९] तस्मात् त्यदाद्यन्तस्य A^1 M^1 : तस्मा त्यदाद्यन्तस्य V M^2 तस्मातदाद्यन्तस्य A^2

[१०] तदोरेव V A^1 M^2 : तदादेरेव A^2 : त्यदादेरेव M^1

[११] निर्दिश्यमानत्वेन V A^1 M^1 M^2 : निर्दिश्यमानत्वे A^2

[१२] वा V M^2 : वा प्रत्यासत्या वा A^1 A^2 : वा प्रत्यासत्या M^1

[१३] इत्यवश्यं V A^1 A^2 M^2 : om M^1

[१४] किञ्च V A^2 M^1 M^2 : om A^1

पकाराकारस्य दीर्घवारणायोपधाग्रहणमिति शेखरविरोधश्च (लघु०ह०पु०प्र० पृ०441)। किञ्च इतराव्यवधानमिति[१] इति निवेशोऽप्ययुक्तः। हंसशिरांसि तदेषः श्वयुव[२]... (6-4-133/362) इत्याद्यसङ्ग्रहापत्तेः। अत एव वार्त्तिककृता विद्धः इत्येतत्परिभाषाप्रयोजनेषु परिगणितम्[३]। तदनिवेशे च[४] चलीक्लृप्यत इत्यत्राभ्यासे लत्वानापत्तिरिति[५] सेयमुभयतः पाशा रज्जुः। न च एतदनाश्रयणे अवादीदित्यत्राटोऽपि वृद्ध्यापत्तिः। एतत्प्रकरणे वृद्धिभाज एव प्रत्ययेन विशेष्यते[६] इति त्वयैवान्यत्रोक्तत्वात्। न च एतदनाश्रयणे ह्रसिष्ठ[७] इत्यादौ पूर्वरेफस्यापि[८] स्थूलदूर...(6-4-156/2015) इत्यादिना निवृत्त्यापत्तिः। स्थूलदूरेति[९] साहचर्येणान्त्याच् समभिव्याहृतयणादेरेव तेन लोपविधानात्। यणादेः परमिति विग्रहेण यस्माद्यणादेः गुणसम्भावनात्[१०] तस्मादेव लोपविधानाद्वेति प्राहुः॥ ९५॥

---

[१] ०राव्यवधानमिति M^1: ०राव्यवधाने V A^1 A^2 M^2

[२] हंसशिरांसि तदेषः श्वयुवः V M^2 : हंसशिरोंसि तदेषः युव शुनः A^1 हंसशिरांसि तदेषः व श्रुन A^2 हंसशिरांसि तदेषः युवपशुनः M^1

[३] परिगणितम् V A^2 M^2 : गणितम् A^1 M^1

[४] तदनिवेशे च V A^1 A^2 M^2 : तदनिवेशे M^1

[५] लत्वानापत्तिरिति V A^2 M^1 M^2 : लत्वाप्राप्तिरिति A^1

[६] विशेष्यते V A^1 A^2 M^2 : विशेष्यन्ते M^1

[७] ह्रसिष्ठ V A^1 M^1 M^2 : ह्रसीष्ट A^2

[८] पूर्वरेफस्यापि V A^2 M^1 M^2 : पूर्वयणपि A^1

[९] स्थूलदूरेति V A^2 M^2 : स्थूलादि A^1 M^1

[१०] यस्माद्यणादेः गुणसम्भावनात् V M^2 : यस्माद्यणादेः पूर्वस्य गुणसम्भवत A^1 यस्माद्यणादेः पूर्वस्य गुणसम्भावः A^2 यस्माद्यणः आदेः पूर्वस्य गुणस्सम्भवति M^1

नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे ॥ ९६ ॥

प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः ॥९७ ॥

[१]

प्रधानस्त्रीत्वेति। स्त्रीत्वादेः प्राधान्यं च अनवयवत्वा[१]प्रधानविशेषणं बोध्यम्। कुमारीवाचरन् ब्राह्मणः कुमारीत्यादौ नदीत्वार्थम्। अवय[२]वस्त्रीविषयत्वा-त्सिद्धम् (1-4-3/वा०सं०1044) इति वार्त्तिकं तु यथोद्देशपक्षाभिप्रायेण प्रवृत्तमिति न तद्विरोधः। यत्तु यूस्त्र्याख्यौ...(1-4-3/266) इत्यत्र शेखरे उक्तम् (द्र०लघु०ह० स्त्री०पृ०344-346)। प्राधान्येन स्त्रीत्वबोधकत्त्वनिवेशे न[३] मानम् इत्येतद्वार्त्तिकं कार्यकालपक्षेऽपि सुयोज्यमिति[४]। तदेतत्परिभाषाविरोधादयुक्तम्[५]। अन्यथा 'कुमारीव[६] वातप्रमी' शब्देऽपि नदीत्वापत्तिः। नन्वेवं ' प्रियतिस्र[७] ' इत्यत्र कथं तिस्रादेशः ? स्त्रीत्वस्याप्राधान्यात् इति चेन्न। यं शब्दं प्रति स्त्रीत्वं विशेषणं तद्विशेष्यगतमेव[८] तस्य प्राधान्यं तच्चात्रास्त्येव[९]। पुमान् स्त्रिया (1-2-67/933)

---

[१] च अनवयवत्वा० V A^1 M^2 : च अनयत्या० A^2 चानायत्या० M^1

[२] ०त्वार्थम्। अवयव० V A^1 M^1 M^2 : ०त्वार्थावयव० A^2

[३] निवेशे न M^1 : निवेशेन V A^2 M^2 निवेशने A^1

[४] सुयोज्यमिति M^1 : सुयोजमिति V A^1 A^2 M^2

[५] ०धादयुक्तम् V A^1 A^2 M^2 : ०धादुक्तम् M^1

[६] कुमारीव M^1 : कुमारी V A^1 A^2 M^2

[७] प्रियतिस्र V A^2 M^2 : प्रियतिसृ A^1 M^1

[८] तद्विशेष्यगतमेव V A^2 M^2 : तद्विशेष्यगतत्वमेव A^1 M^1

[९] तच्चात्रास्त्येव V A^1 A^2 M^2 : तच्चान्यत्रास्त्येव M^1

इत्यत्र स्त्रियेत्यनेन[१] उपादीयमाने ब्राह्मणीवत्साशब्दे[२] विशेष्यभूतेऽर्थे ब्राह्मणी इत्यत्र[३] ङीन्द्योत्यं[४] स्त्रीत्वं न प्रवर्तत[५] इति न कश्चिद्दोषः। **हेतुमति चेत्यत्रेति**[६]। तत्र हि पाचयत्योदनं देवदत्तेनेत्यत्र[७] गतिबुद्धि...(1-4-52/540) इत्यस्य नियामकतया न कर्मत्वमित्युक्तम्[८]। एतत्परिभाषाप्रयोजनं तु[९] मूलकेनोपदंशं भुङ्क्ते इत्यत्र कर्तृकरणे इति[१०] तृतीयासिद्धिः। अत्र[११] हि मूलकस्य दंशने भोजने च शाब्द एवान्वयः[१२]।

ननु ग्रामं ग्रामाय वा गन्तुमिच्छति इत्यत्र गमेः ग्रामः कर्म इषेस्तूभे[१३] कर्मणी इति भाष्येण इच्छां प्रत्यपि[१४] ग्रामस्य कर्मत्वात्। प्रधानानु[१५]रोधिकार्यस्य बलवत्त्वाच्च[१६] चतुर्थी बाधित्वा[१७] द्वितीयैव स्यादिति चेन्न। अपवादविषये

---

[१] स्त्रियेत्यनेन V M^1 M^2 : इत्यत्र A^1 स्त्रियेत्यत्र A^2

[२] ब्राह्मणीवत्साशब्दे V A^1 A^2 M^2 : ब्राह्मणीपत्यादिति M^1

[३] ब्राह्मणीत्यत्र V A^2 M^2 : ब्राह्मणीति A^1 M^1

[४] ङीन्द्योत्यं V M^1 M^2 : ङीप् बोध्यम् A^1 ङीप्द्योत्यं A^2

[५] प्रवर्तत V A^1 A^2 M^2 : वर्तत M^1

[६] हेतुमति चेत्यत्रेति V A^1 M^2 : हेतुमति A^2 हेतुमतिश्चेत्यत्रेति M^1

[७] पाचयत्योदनं देवदत्तेनेत्यत्र V A^1 A^2 M^2 : पान्वयस्य उदन्वदयैवते M^1

[८] कर्मत्वमित्युक्तम् V A^1 A^2 M^2 : कर्मकत्वमित्युक्तम् M^1

[९] एतत्परिभाषा प्रयोजनं तु V A^1 A^2 M^2 : एतत्प्रयोजनं M^1

[१०] कर्तृकरणे इति A^1 M^1 : करणे V A^2 M^2

[११] अत्र A^1 A^2 M^1 : तत्र V M^2

[१२] शाब्द एवान्वयः V A^1 M^2 : शब्द एवान्वयः A^2 स्यादन्वयः M^1

[१३] इषेस्तूभे V A^1 A^2 M^2 : इषेस्तूभय M^1

[१४] इच्छां प्रत्यपि V A^2 M^2 : om A^1 संप्रति M^1

[१५] ०र्मत्वात्। प्रधानानु० V A^1 M^1 M^2 : ०र्मत्वाप्रधानानु० A^2

[१६] बलवत्त्वाच्च V M^2 : *** A^1 *** A^2 बलवत्त्वात् M^1

[१७] चतुर्थी बाधित्वा V A^1 A^2 M^2 : om M^1

एतन्न्या[१]याप्रवृत्तेरदोषात् ॥ ९७ ॥

अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी ॥ ९८ ॥

[१]

तदनालिङ्गितेति। इदं पङ्कजशब्दे योगार्थबोधनिर्वाहाय[२]। ननु स्वस्त्रादिषु[३] मातृ-शब्दोऽनुकरणं न यौगिको नापि रूढ इति चेन्न। अर्थवत्परिभाषोक्तरीत्या गण-पठितेभ्योऽपि[४] अर्थविशिष्ट[५]शाब्दबोधाङ्गीकारेण तत्र रूढिजोपथितेः[६] प्रतिबन्ध-कतया योगार्थस्य विशेषणतया मानाभावेनादोषात्। **रथकाराधिकरणेति।** तत्र हि रथकारशब्दो[७] न यौगिकः, किन्तु रूढया जातिविशेष परः[८] इत्युक्तम् ॥९८ ॥

व्यवस्थितविभाषयापि कार्याणि क्रियन्ते ॥ ९९ ॥
विधिनियमसम्भवे विधिरेव ज्यायान्॥ १००॥
सामान्यातिदेशे विशेषानतिदेशः ॥ १०१॥
प्रत्ययाप्रत्यययोः प्रत्ययस्य ग्रहणम् ॥ १०२ ॥

---

[१] एतन्न्याया० V A^1A^2 M^2 : तन्न्याया० M^1

[२] पङ्कजशब्दे योगार्थबोधनिर्वाहाय V A^2 M^2 : पङ्कजशब्दयोगार्थबोधनिर्वाहाय A^1 पङ्कजशब्दे गौणार्थबोधनाय M^1

[३] स्वस्त्रादिषु V A^1 A^2 M^2 : स्वादिषु M^1

[४] गणपठितेभ्योऽपि V A^1A^2 M^2 : गणपठितेभ्यः M^1

[५] अर्थविशिष्ट० V A^1A^2 M^2 : पृथक् विशिष्ट० M^1

[६] रूढिजोपथितेः V A^2 M^2 : च रूढिज्ञानोपस्थितिः A^1 च रूढ्युपस्थितिः M^1

[७] रथकारशब्दो V A^2 M^1 M^2 : रथशब्दो A^1

[८] परः V A^1 A^2 M^2 : परवाचकः M^1

सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्॥ १०३ ॥

[१]

विशब्देति[१]। ननु[२] द्विवचनान्तो[३] विशब्दो जेरव्यवहितः पक्षिवाची सम्भवतीति कथं तत्साहचर्यान्निर्णय[४] इति चेन्न। उपात्ताविकृत[५] विशब्दसाहचर्यस्यैव भाष्यकृदभिमतत्वात्[६]। बहुविजयते वनमित्यस्य तु[७] अनभिधाने[८] वा प्राधान्येन स्वार्थबोधकस्यैव पराश[९]ब्दसाहचर्याद्भाष्यप्रामाण्याद्वा ग्रहणम्।

[२]

तेनेति। नन्वेवमपि दीधीत्यत्र[१०] द्वयोर्ग्रहणापत्तिरिति चेन्न । क्वचिदसहचरित-मात्रग्रहणस्य[११] अनित्यशब्देन[१२] विवक्षितत्वात्॥ १०३॥

---

[१] विशब्देति A^1 A^2 M^1 : विशब्देनेति V M^2

[२] ननु V A^1 A^2 M^2 : om M^1

[३] द्विवचनान्तो V M^1 M^2 : द्विवचनाद्यन्तो A^1 A^2

[४] तत्साहचर्यान्निर्णयः V A^2 M^2 : तत्साहचर्ये निर्णयः A^1 तत्साहचर्यनिर्णयः M^1

[५] उपात्ताविकृत० V A^1 A^2 M^2 : उपात्तविकृत० M^1

[६] भाष्यकृदभिमतत्वात् V A^2 M^2 : भाष्यकृदभिप्रेतत्वात् A^1 M^1

[७] वनमित्यस्य तु V A^2 M^2 : वनमित्यस्य A^1 M^1

[८] अनभिधाने V M^2 : अनभिधानमेवाभिधाने A^2 अनभिधानम् A^1 M^1

[९] पराश० V A^2 M^1 M^2 : परश० A^1

[१०] दीधीत्यत्र V A^1 A^2 M^2 : दधीत्यत्र M^1

[११] ०तमात्रग्रहणस्य V A^2 M^2 : ०तप्राप्तस्य A^1 ०तमात्रस्य M^1

[१२] अनित्यशब्देन V A^2 M^2 : नित्यत्वशब्देन A^1 निचशब्देन M^1

श्रुतानुमितयोः श्रुतसम्बन्धो बलवान् ॥ १०४ ॥

[१]

नपुंसकत्वाभावादिति। नपुंसकग्रहणानुवृत्तिफलं तु अनपुंसकसंज्ञा[१] शब्दव्युदासः। अभिव्यक्त...¶ (परि०शे०पृ०12) इति न्यायानुसरणे गौरवप्रसङ्गात् नपुंसकशब्दानुवृत्तिराश्रिता। उत्तरार्थञ्च[२] । ईच्च[३] द्विवचने (7-1-77/3576) इत्यत्र नपुंसकस्य...(7-1-72/314) इति पुंवत् ...(6-3-42/746) इति च अनुवर्तते। तेन छन्दसि नपुंसकस्य पुंवद्भावात् मधोर्ग्रहण्याति[४] इत्यादौ नुमभावसिद्धिः। इदमुपलक्षणम्। त्रिचतुरोः...(7-2-99/ 298) इत्यस्य।

[२]

स्पष्टं चेदमिति। इयङ्वानित्या अनुपसर्जनादित्यधिकारात्[५]। तेन वनो र च (4-1-7/456) इत्यादीनाम् अतिधीवरीत्यादौ प्रवृत्तिसिद्धिः ।

[३]

बाध्यत इति। श्रुतेन निमित्तत्वेनैव लक्ष्ये रेफः सम्बध्नातीति[६] परिभाषाक्षरसमन्वय इति भावः। **विस्तर इति।** कार्यित्वनिमित्तत्वबोधकयोः षष्ठीपञ्चम्योः श्रुतौ च अविशेषान्नानया अत्र[७] निर्वाहः। प्रातिपदिकांशे सामान्यविशेषभावस्य उत्सर्गापवादभावोपपादकत्वेऽपि प्रकृतानुपयोगात्॥ १०४ ॥

---

[१] अनपुंसकसंज्ञा V A^1A^2 M^2 : अनपुंसकाः M^1

[२] उत्तरार्थञ्च V A^1 M^1 M^2 : उत्तरार्थत्वं च A^2

[३] ईच्च V M^1 M^2 : इह च A^1 ई च A^2

[४] नपुंसकस्य पुंवद्भावात् मधोर्ग्रहण्याति V M^2 : नपुंसकस्य पुंवद्भावात् मधोर्गृह्णाति A^1 A^2 नपुंसकवद्भावात् मधोद्युधमध्नाति M^1

[५] अनुपसर्जनादित्यधिकारात् V M^2 : अनुपसर्जनाधिकारात् A^1 A^2 M^1

[६] सम्बध्नातीति V A^2 M^1 M^2 : सम्भवतीति A^1

[७] श्रुतौ च अविशेषान्नानया V A^2 M^2 : श्रुतत्वाविशेषान्नानया अत्र A^1 श्रुतित्वाविशेषादनया अत्र M^1

लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम् ॥ १०५ ॥

[१]

लक्षणप्रतिपदोक्तेति ॥ लक्षणेनानुमानेनोक्त इत्यर्थः ॥[१]

प्रतिपदोक्तेत्यस्य[२] विशिष्योक्तेत्यर्थः[३] **इदमेवेति**[४]। विलम्बितोपस्थितिकत्वं शीघ्रोपस्थितिकत्वं चेत्यर्थः। **अनित्याचेति**। तेन भो भगो ...(8-3-17/167) इत्यत्र वार्त्तिकनिष्पन्नानामपि ग्रहणम् ॥ १०५ ॥

गामादाग्रहणेष्वविशेषः ॥ १०६ ॥

[१]

पित्त्वमिति। दोदद्घोः[५] (7-4-46/3077) इत्यत्र धेटो निवृत्त्यर्थं क्रियमाणं दाग्रहणं च[६] धाग्रहणेऽविशेषज्ञापकम्। नेदं दधाति निवृत्त्यर्थम्। दधातेः हयादेशविधानात्[७]। **बाधिकेति**। नत्वर्थवद्ग्रहणपरिभाषायाः।

---

[१] निर्वाहः।प्रातिपदिकांशे सामान्यविशेषभावस्य उत्सर्गापवादभावोपपादकत्वेऽपि प्रकृतानुपयोगात्॥ १०३॥ **लक्षणप्रतिपदोक्तेति** ॥ लक्षणेनानुमानेनोक्त इत्यर्थः ॥ A^1 A^2 : निर्वाहः V M^2 निर्वाहः। प्रातिपदिकांशे सामान्यविशेषाभावस्य उत्सर्गापवादभावो पपादकत्वेऽपि प्रकृतानुपयोगात्॥ **लक्षणप्रतिपदोक्तेति** ॥ लक्षणेनानुमानेनोक्तेत्यर्थः ॥ M^1

[२] प्रतिपदोक्तेत्यस्य V A^1 A^2 M^2 : प्रतिपदोक्तान्यस्य M^1

[३] विशिष्योक्तेरित्यर्थः A^1 : विशेष्योक्तेत्यर्थः V M^2 विशेषोक्तेत्यर्थः A^2 विशित्यर्थाः M^1

[४] इदमेवेति V A^2 M^1 M^2 : इदवेति A^1

[५] दोदद्घोः V A^1 M^1 M^2 : दोदत्घोः A^2

[६] दाग्रहणं च V A^2 M^1 M^2 : दाञ्ग्रहणं A^1

[७] दधातेः हयादेशविधानात् V A^1 M^2 : ददातेः त्घादेशेविधानात् A^2 दधातेः ह्यादेशविधानात् M^1

तेन प्रनिदारयतीत्यत्र न णत्वम्[१] ॥ १०६ ॥

प्रत्येकं वाक्यपरिसमाप्तिः ॥ १०७ ॥
क्वचित्समुदायेऽपि ॥ १०८ ॥

अभेदकाः गुणाः ॥ १०९ ॥

[१]

भाष्यन्त्विति। भेदकत्वाभिप्रायकत्त्वं[२] तु न वक्तुं शक्यम्। वृद्धिसूत्रे...(1-1-1/ भा०प्र०ख०तृ०आ०पृ०171) भाष्ये अभेदका गुणाः (परि०117) इत्येव न्याय्यमित्युक्तेः। ईदूदेः ...(1-1-11/भा०प्र०ख०प०आ०पृ०256) इति[३] सूत्रस्थं स्वरान्तरसङ्ग्रहाय[४]। तपरकरणमित्यादि-भाष्यं तु एकदेशि[५] इति भावः।

[२]

अन्यत्रेति। पदादीनां सहस्य[६] च उदा[७]त्तानुदात्तोभयगुणकतया तदनुरूपे स्वरिते उच्चारणीये उदात्तोच्चारणं[८] विवक्षार्थम्।

---

[१] न णत्वम्। V A^2 M^1 M^2 : न णत्वम्। **एतदर्थमेवेति**। वधादेशे आद्युदात्तनिपातनमित्यादि भाष्यं तु एकश्रुत्या पाठमाश्रित्येति भावः। वस्तुतोऽष्टन आ विभक्तौ इत्यत्र निरनुनासिकोच्चारणस्य रायोत्युत्तरार्धतया सामर्थ्याभावात्। सानुनासिकवारणाय भाव्यमानेत्यस्याणनण्साधारणस्य गुणाभेदकत्वप्राप्त-साधारण्यस्य चावश्यकतया तत एवात्र न दोषः। A^1

[२] भेदकत्वाभिप्रायकत्त्वम् V : भेदकत्वाभिप्रायकम् A^1 M^2 भेदकत्वपक्षाभिप्रायकत्त्वम् A^2 भेदपक्षाभिप्रायकत्वम् M^1

[३] ईदूदेः इति V M^2 : ईदूदेदित्यादि A^1 ईदूदेः इत्यादि A^2 M^1

[४] स्वरान्तरसङ्ग्रहाय V A^1 A^2 M^2 : स्वरादिसङ्ग्रहार्थम् M^1

[५] एकदेशि V M^2 : एकदेश्युक्तिः A^1 A^2 M^1

[६] पदादीनां सहस्य V A^1 A^2 M^2 : पदादीना सह M^1

[७] च उदा० V A^1 A^2 M^2 : वोदा० M^1

[८] उदात्तोच्चारणं V A^2 M^1 M^2 : उच्चारणं A^1

न च शास्त्रा[१]प्राप्तोदात्तोच्चारणं[२] प्रयत्नः प्रकृते तु उदात्तस्य शास्त्रप्राप्तत्वेऽपि स्थान्यननुगुणतया[३] उच्चारणं यत्न एव इत्याशयात्। ननु स्वरितस्य स्थान्यनुगुणत्वेऽपि[४] फिष ...(फि०सू०1) इति शास्त्रविरोधेन तदुच्चारणं यत्नः एव स्यात्। अन्यथा समासस्य...(6-1-223/3734) इति शास्त्रविरोधेऽपि च तस्याद्युदात्तोच्चारणस्य[५] स्थान्यनुगुणतया न यत्नः[६] स्यादिति चेन्न। तस्यान्तोदात्तस्यापि[७] स्थान्यनुगुणतया, तद्धानेन[८] शास्त्राप्राप्ताद्युदात्तोच्चारणं[९] यत्नः। प्रकृते तु उदात्तस्य शास्त्रप्राप्तत्वेऽपि स्थान्यनुगुणतया तदुच्चारणं यत्न एवेत्याशयात्। वधादेशे[१०] स्थान्यनुरूपेऽन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थम्। ननु हन्तेरेकाच्त्वेन[११] आद्युदात्तवदुच्चारण[१२] तदनुरूपमेवेति[१३] चेन्न। विधेरपि[१४] स्थानिवत्त्वेन धातुतया धातोः (6-1-162/3671) इत्यन्तोदात्तस्यैव

---

[१] न च शास्त्रा०.....इत्याशयात् V M^2 : om A^1 A^2 न शास्त्रा०.....तदुच्चारणं यत्न एव इत्याशयात् M^1

[२] ०च्चारणं V M^1 M^2 : ०च्चारण M^2 A^{1*} A^{2*}

[३] स्थान्यननुगुणतया V M^1 M^2 : स्थान्यनगुणतया M^2 A^{1*} A^{2*}

[४] ननु स्वरितस्य स्थान्यनुगुणत्वेऽपि .....इत्यन्तोदात्ते उच्चारयितव्ये V A^2 M^1 M^2 : miss A^1

[५] च तस्याद्युदात्तोच्चारणस्य M^1 : चतसर्याद्युदात्तोच्चारणस्य V A^2 M^2 A^{1*}

[६] यत्नः V M^2 : यत्नत्वम् M^1 A^2 A^{1*}

[७] तस्यान्तोदात्तस्यापि ego: चतसर्यन्तोदात्तस्यापि V A^2 M^2 : तत्र चतसर्यन्तोदात्तस्यापि M^1 A^{1*}

[८] तद्धानेन V A^2 M^2 : सिद्धान्ते वधादेशेऽपि स्थान्यनुरूपेण उदात्ते उच्चारणीये आद्युदात्तोच्चार-णमुदात्तर्थम् M^1 A^{1*}

[९] ०प्राप्ताद्युदात्तोच्चारणम् V M^2 : ०प्राप्त्याद्युदात्तोच्चारणम् A^2 om M^1 A^{1*}

[१०] वधादेशे V M^1 M^2 : वधादेशेऽपि A^2 A^{1*}

[११] ननु हन्तेरेकाच्त्वेन V A^2 M^2 : न तु हन्तेरेकाचो न M^1 A^{1*}

[१२] ०दाद्युदात्तवदुच्चारणम् M^1 : ०दाद्युदात्तवध्ध्युच्चारणम् V A^2 M^2 A^{1*}

[१३] तदनुरूपमेवेति V A^2 M^2 : तदनुपपन्नमिति M^1 A^{1*}

[१४] विधेरपि V M^2 : वधेरपि A^2 M^1 A^{1*}

उचिततयाद्युदात्तोच्चारणस्य तदनुरूपत्वाभावात्। यद्वा फिष ...¶ (फि० सू० 1) इत्यन्तोदात्ते[१] उच्चारयितव्ये आद्युदात्तोच्चारणं विवक्षार्थम्।[२]

यद्वा – आर्धधातुकविवक्षायामेव वधिप्रवृत्त्या सतिशिष्टप्रत्ययस्वरेण वधेरपि अनुदात्तत्वस्य उचिततया अनुदात्त उच्चारयितव्ये तदुच्चारणं विवक्षार्थमिति भावः[३]। ननु[४] आद्येऽपि[५] फिष इत्यन्तोदात्ते उच्चारणीये आद्युदात्तोच्चारणं विवक्षार्थं स्यादिति चेन्न। उपदेशोत्तरमेव इत्संज्ञालोपाभ्यामपहारेण ज्ञापकवर्णनपरभाष्यप्रामाण्येन[६] च अनङि[७] फिष इत्यस्याप्रवृत्तेः। ननु एकश्रुत्यैवाष्टाध्यायीपाठेन तत्र तत्राद्युदात्तनिपातनं भाष्योक्तमसङ्गतमेवेत्याशयेनाह **सम्पूर्णेति**[८]। **पदस्येति**। ननु गुणानामभेदकतया त्रैस्वर्येण पाठेऽपि दोषाभावादेकश्रुत्या पाठाश्रयणं भाष्यकृत्कृतं व्यर्थमेवेति चेन्न। एतदनाश्रित्य परिहारान्तरपरत्वेनादोषात्[९]। इदं चिन्त्यम्। परिनिष्ठिते द्वन्द्वप्रयुक्ते

---

[१] इत्यन्तोदात्ते V A^2 M^2 : इत्यन्तोदात्तत्वे M^1 A^{1*}

[२] आद्युदात्तोच्चारणं विवक्षार्थम् V A^2 M^2 : तदुच्चारणं विवक्षार्थम् M^1 A^{1*}

[३] यद्वा – आर्धधातुकविवक्षायामेव .....विवक्षार्थमिति भावः V M^2 : यद्वा – आर्धधातुकविवक्षायामेव ..... वधेरनुदात्तत्वस्यैव .....विवक्षार्थमिति भावः A^2 A^1 miss M^1 A^{1*}

[४] ननु आद्येऽपि फिष …….. विवक्षार्थम् V A^2 M^1 M^2 : miss A^1

[५] आद्येऽपि V M^1 M^2 : अनद्यपि A^2 A^{1*}

[६] ज्ञापकवर्णनपरभाष्यप्रामाण्येन V A^2 M^2 : ज्ञापकपरभाष्यप्रामाण्येन A^1 M^1

[७] च अनङि V M^2 : चानुबन्धे A^1 च अनुवधे A^2 M^1

[८] ननु एकश्रुत्यैवाष्टाध्यायीपाठेन तत्र तत्राद्युदात्तनिपातनं भाष्योक्तमसङ्गतमेवेत्याशयेनाह **सम्पूर्णेति**। M^1: **सम्पूर्णेति**। V M^2 नन्वेकश्रुत्यैव ***तत्र तत्राद्युदात्तनिपातनं भाष्योक्तमसङ्गतमेवेत्याशयेनाह **सम्पूर्णेति** A^1 न चैकश्रुत्यैवाष्टाध्यायीपाठेन तत्र तत्राद्युदात्तनिपातनं भाष्योक्तमसङ्गतमेवेत्याशङ्क्य आह **सम्पूर्णेति** A^2

[९] परिहारान्तरपरत्वेनादोषात् V A^2 M^2 : परिहारादरेणादोषात् A^1 परिहारान्तरेणादोषात् M^1

अन्तोदात्तत्वे[१] शेषनिघाते नैक्ष्वाकस्यानुदात्ततया प्रक्रियायां किंस्वरकस्य[२] द्वन्द्वघटकतयेति[३] चिन्ताया एतद्भाष्याभिप्रेतत्वेन[४] त्रैस्वर्येण वेदवाकस्य[५] पाठात्। [३]

ननु जातिपक्षे यू[६] इत्यनेन ह्रस्वयोरपि नदीसंज्ञा स्यात्। इत्वादि[७]जातेस्तत्रापि सत्त्वादित्यत आह- **यू इति।**

परे तु[८] गुणाभेदकत्वप्राप्तस्यापि अप्रत्ययः...(1-1-69/14) इत्यनेन निषेधे त्यदादीनामः (7-2-102/265) इत्यादावुच्चारितस्वरस्यैव विवक्षापत्त्या[९] द्विशब्दे[१०] उदात्तस्यैतच्छब्दे च स्रंसनधर्मणो[११] हलः स्थानेऽनुदात्तस्याकारस्यानापत्तिः। न चात्रैकश्रुत्या पाठः। एवं विधेषु सर्वत्रैकश्रुत्या पाठस्य शपथैकनिर्णेयत्वात्। एतत्प्राप्तस्य चाप्रत्यय इत्यनेन निषेधे इदमित्यानुनासिकापत्तिः।

---

[१] प्रयुक्ते अन्तोदात्तत्वे V A^2 M^2 : प्रयुक्तान्तोदात्तत्वे A^1 M^1

[२] किंस्वरकस्य V A^2 M^1 M^2 : कंस्वरकस्य A^1

[३] द्वन्द्वघटकतयेति V M^1 M^2 : द्वन्द्वघटकतेति A^1 A^2

[४] एतद्भाष्याभिप्रेतत्वेन V A^2 M^1 M^2 : एतद्भाष्याभिहितत्वेन A^1

[५] त्रैस्वर्येण वेदवाकस्य V M^2 : त्रैस्वर्येण ऐक्ष्वाकस्य A^1 M^1 त्रैस्वर्येणैवैक्ष्वाकस्य A^2:

[६] यू V A^1 A^2 M^2 : om M^1

[७] इत्वादि A^2 M^1 : दृत्वादि V M^2 इत्यादि A^1

[८] परे तु V A^1 A^2 M^2 : परन्तु M^1

[९] विवक्षापत्त्या V A^1 A^2 M^1 M^2 : विवक्षास्वरपत्त्या M^2

[१०] द्विशब्दे V A^2 M^1 M^2 : द्वि A^1

[११] स्रंसनधर्मणो V A^2 M^2 : स्रंसनधर्मिणो A^1 M^1

पररूपेण[१] वृद्ध्याच शुद्धो भविष्यतीति चेन्न। आभ्यामित्यादौ पररूपेण सानुनासिकापत्तेः। किञ्च अडुदात्तः...(6-4-71/2206) इत्यादौ[२] उदात्तग्रहणं व्यर्थम्। अनुबन्धविनि- र्मुक्तपदार्थोपस्थित्या अण्त्वेनाऽप्रत्यय इति गुणाभेदका इत्यस्य निषेधे उदात्तोच्चारणेनैव निर्वाहात्। किञ्चैवं संयन्ते इत्यादौ सानुनासिकद्वित्त्वार्थम् अणुदित् ...(1-1-69/14) सूत्रेऽण्ग्रहणमिति 'हयवरट्'[३] (मा० सू० 5) 'लण्' (मा० सू० 6) सूत्रस्थभाष्यविरोधः। गुणाभेदकत्वेनैव तस्य द्वित्वसिद्धेः। न च गुणानां यण्विषये भेदकत्वमेवेति[४] ज्ञापनाय[५] अण्ग्रहणमिति शब्दरत्नोक्तं युक्तम्। फलाभावात्। गुणाभेदकत्वाप्राप्तस्यापि[६] अप्रत्यय इत्यनेनैव[७] निषेधेन[८] घटवानित्यादौ सानुनासिकवकाराप्राप्तेः। किञ्च अष्टन आकारस्योत्तरार्थं निरनुनासिकत्वस्यावश्यकतया सामर्थ्याभावेन अनया परिभाषया सानुनासिका-

---

[१] न चात्रैकश्रुत्या पाठः। एवं विधेषु सर्वत्रैकश्रुत्या पाठस्य शपथैकनिर्णेयत्वात्। एतत्प्राप्तस्य चाप्रत्यय इत्यनेन निषेधे इदमित्यानुनासिकापत्तिः। पररूपेण A^2 : पररूपेणV M^2 न चात्रैकश्रुत्या पाठ एवं विधेषु सर्वत्रैकश्रुत्या पाठस्य शपथैकनिक्रयत्वात्। एतत्प्राप्तस्य चाप्रत्यय इत्यनेन निषेधे इदमित्यादाविवानुनासिकापत्तिः। पररूपेणA^1 न चात्रैकश्रुत्या पाठः। एवं विधेषु सर्वत्रैकश्रुत्या पाठस्य शपथैकनिर्णेयत्वात्। एतत्प्राप्तस्य चाप्रत्यय इत्यनेन अनिषेधे इदमित्यादाविवानुनासिकापत्तिः। पररूपेण M^1

[२] अडुदात्तः...इत्यादौ V M^1 M^2 : उदात्तः इत्यत्र A^1 अडुदात्तः इत्यत्र A^2

[३] ल्हयवरट्' V A^2 M^2 : om A^1 M^1

[४] न च गुणानां यण्विषये भेदकत्वमेवेति A^1 : न च यण्विषये गुणानामभेदकत्वमेवेति V A^2 M^2 न च यण्विषये गुणाभेदकत्त्वं तु M^1 om A^1

[५] ज्ञापनाय V A^1 A^2 M^2 : ज्ञापनात् M^1

[६] गुणाभेदकत्त्वाप्राप्तस्यापि अप्रत्यय V M^2 : गुणाभेदकत्त्वप्राप्तस्यापि अप्रत्यय A^1 A^2 गुणा भेदकत्त्वस्य अप्रत्यय M^1

[७] इत्यनेनैव V A^2 M^1 M^2 : इत्यनेन A^1

[८] निषेधेन V M^1 M^2 : निषेधे A^1

पत्तिः[१]। न च पथिमथि ...(7-1-85/ द्र० लघु० ह०पु०प्र०पृ० 438 - 439) इत्यत्र शेखरोक्तरीत्या अप्रत्ययार्थं निरनुनासिकत्वस्यावश्यकतया सामर्थ्याभावेनानया परिभाषया सानुनासिकाय[२] ...अप्रत्यय० (1-1-69/14) इति निषेधोऽनण्यपीति युक्तम्। तथा सति गोत...(7-1-90/284) इत्यादौ तपर...(1-1-70/15) सूत्रस्येवाऽनङि[३] गुणाभेदका इत्यस्य अप्रत्यय इत्यनेन निषेधेन विवक्षा सिद्धा। उदात्तग्रहणवैय्यर्थ्यापत्तेः। गोत... (7-1-90/284) इत्यादाविव समुदाये सावर्ण्यसम्भवात्[४]। तस्माद्गुणाः भेदकाः[५] इति स्वरमात्र विषयकम्। धर्मिग्राहकमानात्। गुणभेदकत्वं[६] तु अनुनासिकमात्रविषयम्[७]। अण् ग्रहणाद्धर्मिग्राहकमानादेव[८]। यद्यपि वृद्धि...(1-1-1/16) सूत्रे अस्ति प्रयोजनमेतत्। किं तर्हि[९] भेदकत्वाद्गुणस्येत्यादि पूर्वपक्षभाष्यं भेदकत्वाभेदकत्वयोरपि[१०]

---

[१] सानुनासिकवकाराप्राप्त्तेः। किञ्च अष्टन आकारस्योत्तरार्थं निरनुनासिकत्वस्यावश्यकतया सामर्थ्याभावेन अनया परिभाषया सानुनासिकापत्तिः A^2 : सानुनासिकवकाराप्राप्तेः। किञ्च अष्टन आकारस्योत्तरार्थं निरनुनासिकस्यावश्यकतया सामर्थ्याभावेन अनया परिभाषया सानुनासिकापत्तिः A^1 सानुनासिकवकाराप्राप्त्तेः। किञ्च अष्टन आकारस्योदात्तार्थं निरनुनासिकः त्वावश्यकतया सामर्थ्याभावेन अनया परिभाषया सानुनासिकापत्तिः M^1 सानुनासिकापत्तिः V M^2

[२] अप्रत्य०..... सानुनासिकाय V M^2 : om A^1A^2 M^1

[३] तपर... सूत्रस्येवाऽनङि V A^2 M^2 : तपरस्येवाऽनङि A^1 परस्यैव अङि M^1

[४] समुदाये सावर्ण्यसम्भवात् A^1 : समुदायसावर्ण्यसम्भवात् V M^2 समुदाये समुदायसावर्ण्यसम्भवात् A^2 समुदाये सावर्ण्याभावात् M^1

[५] भेदकाः V A^1 M^1 M^2 : अभेदाः A^2

[६] गुणभेदकत्वं V A^1 A^2 M^2 : गुणाभेदकत्वं M^1

[७] अनुनासिकमात्र० V M^1A^2 M^2 : आनुनासिक्यमात्र०A^1

[८] ०मानादेव V A^2 M^2 : ०मानात् M^1 A^1

[९] किं तर्हि V A^2 M^1 M^2 : किं तर्हि तेन A^1

[१०] भेदकत्वाभेदकत्वयोरपि V A^1 M^1 M^2 : भेदकत्वाभेदकत्वयोःद्वयोरपि A^2

स्वरानुनासिकोभयविषयकस्वरसतः[१] प्रतीयते। तथापि उभयमिदं गुणेषूक्तं भेदकाः अभेदका[२] इति किं पुनरत्र न्याय्यम्। अभेदका गुणाः (परि०117) इत्येव न्याय्यम्।[३] कुत एतत् ? यदयम् अस्थि...(7-1-75/भा०प्र०ख०तृ०आ०पृ०171) इत्यत्रोदात्तग्रहणं करोतीति सिद्धान्तभाष्यमुक्ताभिप्रायकमेव। अन्यथा लण्[४] (मा०सू०6) सूत्रस्थोक्तभाष्यविरोधात्। यद्वा भेदका गुणा इत्यत्र गुणपदं स्वरा[५]नुनासिक्योभयपरम्। वृद्धि... (1-1-1/16) सूत्रस्थभाष्यस्वरसात्[६]। अभेदकाः गुणाः (परि०117) इत्यत्र गुणपदं स्वरमात्रपरम्। अयं पूर्वस्यापवादः। ननु वृद्धिसूत्रे सानुनासिकसङ्ग्रहार्थं[७] तपरत्वावश्यकतया तद्ग्रहणेना[८] सन्देहार्थः[९] तर्हि तकार इति तत्सूत्रस्थ[१०] भाष्यासङ्गतिरिति चेन्न। तस्य वृद्धिसंज्ञायां[११] फलाभाव इति भाष्याभिप्रायात्[१२]। आनुनासिक्यं नाम गुणः तद्भिन्नस्यापि[१३] यथा स्यादिति। पूर्वभाष्यन्तु[१४]

---

[१] स्वरानुनासिकोभयविषयकस्वरसतः V M^2 : स्वरानुनासिकयोरुभयोर्विषयकः स्वरसतः A^1
स्वरानुनासिकोभय विषयकं स्वरसतः A^2 स्वरानुनासिकयोः भेदविषयकः सर्वतः M^1

[२] गुणेषूक्तं भेदका अभेदका.....अभेदका गुणाः V A^1 A^2 M^2 : jmp M^1

[३] अभेदका गुणाः इत्येव न्याय्यम् V A^2 M^2 : om A^1 M^{1*}

[४] लण् (मा० सू० 6) V A^2 M^2 : हयवरट् (मा० सू० 5) A^1 M^{1*}

[५] गुणपदं स्वरा० A^1 A^2 : अदेङ्गुणा० V M^2 M^{1*}

[६] ०भाष्यस्वरसात् V A^2 M^2 : ०भाष्यविरोधात् A^1 M^{1*}

[७] सानुनासिकसङ्ग्रहार्थं V A^1 A^2 M^2 : सानुनासिकग्रहणार्थं M^1

[८] तद्ग्रहणेनास०८ A^2 M^1 M^2 : तद्दूषणेन स० A^1

[९] सन्देहार्थः V A^2 M^1 M^2 : सन्देहार्थम् A^1

[१०] तत्सूत्रस्थ० V A^2 M^1 M^2 : सूत्रस्थ० A^1

[११] वृद्धिसंज्ञायां V A^1 A^2 M^2 : वृद्धिसंज्ञायाः M^1

[१२] भाष्याभिप्रायात् V A^2 M^2 : तद्भाष्यात् A^1 तद्भाष्याशयात् M^1

[१३] नाम गुणस्तद्भिन्नस्यापि V A^1 A^2 M^2 : अधिको गुणः तदधिकस्यापि M^1

[१४] पूर्वभाष्यन्तु V A^2 M^2 : भाष्यन्तु A^1 M^1

फलाभावेऽपि गुणत्वमात्रेण तदुत्कीर्त्तनयुक्तमित्याशयेन[१] सानुनासिकस्याङ् ऋच्छगतौ[२] छन्दसि न प्रयोगः। अप्रत्यय इति च न गुणाभेदकत्वप्राप्तस्य[३] निषेधो न वा अनणण् साधारण इति न कश्चिद्दोषः। ज्यादात्... (6-4-160/2012) इति धर्मिग्राहकमानमप्यण्[४] विषयकत्वस्य[५] एवानुकूलम्[६]। अतः एव अष्टन आ... (7-2-84/ भा०ष०व०द्वि०आ०पृ०154) इति सूत्रे[७] भाष्ये सानुनासिकमाशङ्क्यानणत्वेन परिहारः उक्तः। न तु गुणाभेदकत्वेन[८] तदाशङ्क्य[९] प्रत्यय इत्यनेन तत्परिहारश्च उक्तः। पथिमथि ...(7-1-85/365) इत्यस्यापि तपरत्वेनैव सानुनासिकत्वमाशङ्कितम्।[१०] न तु गुणाभेदकत्वेनेति प्राहुः[११] ॥ १०९॥

---

[१] गुणत्वमात्रेण तदुत्कीर्त्तनयुक्तमित्याशयेन A^2 : गुणतदुत्कीर्त्तनयुक्तमित्याशयेन V M^2 गुणत्वमात्रेण तत्कीर्त्तनं युक्तमित्याशयेन A^1 M^1

[२] सानुनासिकस्याङ् ऋच्छगतौ V A^2 M^2 : सानुनासिक्यं स्यात् ऋच्छतौ A^1 सानुनासिक्ये अस्ये ऋच्छगतौ M^1

[३] च न गुणाभेदकत्वप्राप्तस्य V A^2 M^1 M^2 : चागुणा भेदका इति प्राप्तस्य A^1

[४] धर्मिग्राहकमानमप्यण् V A^2 M^2 : दीर्घग्राहकमानमिति यण् A^1 दीर्घग्राहकमानमप्यण् M^1

[५] विषयकत्वस्य A^1 : विषयकत्व V A^2 M^1 M^2

[६] एवानुकूलम् V A^2 M^1 M^2 : वानुकूलम् A^1

[७] अष्टन आ... इति सूत्रे V A^2 M^2 : अष्टन्... सूत्रे A^1 : षट् सूत्रे M^1

[८] गुणाभेदकत्वेन V A^2 M^2 : गुणाभेदकत्वे A^1 M^1

[९] तदाशङ्क्य V A^1 A^2 M^2 : तदाशङ्का M^1

[१०] तपरत्वेनैव सानुनासिकत्वमाशङ्कितम्। V A^1 A^2 M^2 : तपरत्वेनानुनासिकत्वमाशङ्कितम् M^1

[११] न तु गुणाभेदकत्वेनेति प्राहुः V A^1 M^1 M^2 : न तु गुणाभेदकत्वे आशङ्कितम् । न तु गुणाभेदकत्वेनेति प्राहुः A^2

बाधकान्येव निपातनानि ॥ ११० ॥

[१]

पृषोदरादीति। एवं श्रावणी[१] शब्दोऽपि अत्र बोध्यः[२]।

पर्जन्यवल्लक्षणप्रवृत्तिः ॥ १११ ॥

[१]

लोपेनेति। ननु वार्त्तिकात् पूर्वमेव सूत्रस्य प्रवृत्त्या[३] कथं वार्त्तिकेन सूत्रस्य वैय्य-र्थ्यमिति चेन्न। वार्त्तिकस्य सूत्रैकवाक्यतया[४] लक्ष्यसाधुतानियामकत्वे[५] सम्भवति तद्वचनेन[६] तद्वैय्यर्थ्यकल्पनमनुचितमित्याशयात्[७]। समासप्रकरणे भावि-वार्त्तिकाद्यर्थस्यापि[८] सूत्रकृदभिमतत्वोक्तेश्च[९]। **आगमेति**[१०]। तेन सर्वेषाम् इत्यत्र सुटि कृते न पुनः सुट्[११]। भूयादित्यादौ तु[१२] स्थानि भेदात् पुनः पुनः लोपः।

---

[१] श्रावणी० V A^2 M^1 M^2 : श्रावण० A^1

[२] अत्र बोध्यः V A^2 M^2 : अत्रैव बोध्यः A^1 M^1

[३] प्रवृत्त्या V A^2 M^1 M^2 : उत्पत्त्या A^1

[४] वार्त्तिकस्य सूत्रैकवाक्यतया V A^1 M^2 : वार्त्तिकस्य सूत्रवाक्यतया A^2 वार्त्तिकसूत्रैकवाक्यतया M^1

[५] लक्ष्यसाधुतानियामकत्वे V A^2 M^1 M^2 : लक्ष्यसाधुत्वनियामकत्वे A^1

[६] तद्वचनेन V A^1 A^2 M^2 : om M^1

[७] ०र्थ्यकल्पनमनुचितमित्याशयात् V M^2 : ०र्थ्यकल्पनयानुचितत्वमित्याशयात् A^1 ० र्थ्य-कल्पनमुचितमित्याशयात् A^2 ०र्थ्यकल्पनया अनुचितमित्याशयात् M^1

[८] वार्त्तिकाद्यर्थस्यापि V A^2 M^1 M^2 : वार्त्तिकार्थस्यापि A^1

[९] सूत्रकृदभिमतत्वोक्तेश्च V M^2 : सूत्रकृदभिप्रेतत्वाच्च A^1 सूत्रकृदभिप्रेतत्वोक्तेश्च A^2 M^1

[१०] आगमेति V A^1 A^2 M^2 : आगमेवेति M^1

[११] सुट् V A^1 M^1 M^2 : सुटा A^2

[१२] तु V A^1 A^2 M^2 : om M^1

एवञ्चात्र लक्ष्यपदेन साक्षात्कार्यभागेव[१] गृह्यते इति तत्त्वम्।

निषेधाश्च बलीयांसः ॥ ११२ ॥

[१]

द्वन्द्वे च इति[२] ॥ अनेन सिद्ध इति शेषः ॥ ११२ ॥

अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे ॥११३॥
योगविभागादिष्ट सिद्धिः ॥ ११४ ॥
पर्यायशब्दानां लाघवगौरवचर्चा नाद्रियते ॥ ११५ ॥

ज्ञापकसिद्धं न सर्वत्र ॥ ११६ ॥

[१]

ज्ञापकसिद्धमिति[३]। तेन[४] करस्य करभो बहिरिति सिद्धम्। अपपरि... (2-1-12/ 666) इति ज्ञापकासिद्धपञ्चम्या असार्वत्रिकत्वात्।

[२]

ज्ञापकेति।

अदो जग्धिः...(2-4-36/3080) इति सूत्रे ल्यब्ग्रहणज्ञापकेत्यर्थः ॥ ११६ ॥

पूर्वत्रासिद्धीयमद्वित्वे ॥११७ ॥

---

[१] भागेव V A^1 M^1 M^2 : भागो च A^2

[२] द्वन्द्वे च इति V A^2 M^1 M^2 : द्वन्द्वेति A^1

[३] ज्ञापकसिद्धमिति V A^2 M^1 M^2 : ननु ज्ञापकसिद्धमिति A^1

[४] तेन V A^1 A^2 M^1 : ते M^2

[१]

एकस्या आकृतेश्चरितः प्रयोगे द्वितीयस्यास्तृतीयस्याश्च न भविष्यति ॥ ११८ ॥

एकस्या आकृतेरिति। वेदलोकप्रसिद्धोऽयं न्यायः। तथाहि खादिरे[१] बध्नाति पालाशे बध्नाति इत्यादौ विकल्पितेषु साधनेषु येनैव साधनेनोपक्रान्ता क्रिया तेनैव[२] निर्वाह्यते। तत्र यदि कदाचित्खदिरस्य[३] भ्रेषो भवति। तद्वत्सदृशः[४] बुर्बुरः[५] सादृश्यात् खदिरबुध्या[६] प्रतिनिधीयते[७] न तु पलाशः परिगृह्यते[८]। साधन भेदेन क्रियान्यत्वात्। उपक्रान्तक्रियानिर्वाहाप्रसङ्गात्[९]। लोकेऽपि यदा स्वस्वामि-भावप्रतिपादनाय गवां स्वामीति षष्ठ्युपक्रम्येत[१०]। तदाश्वानां च इत्यत्रापि तत्प्रतिपादनाय सैव निर्वाह्यते। अन्यथा अश्वेषु च इत्युक्ते अधिकरण-प्रतिपत्तिरपि[११] स्यात्। अश्वेषु च तिष्ठतीति[१२]। तस्माद्योर्थो यया शब्दाकृत्या प्रतिपादयितुमुपक्रान्ता तथैवासौ[१३] निर्वाह्यो न तु अन्यथा शब्दाकृत्येत्यर्थः। एवं

---

[१] खादिरे V A^2 M^1 M^2 : तथा खादिरे A^1

[२] क्रिया तेनैव A^1 M^1 : तेनैव V A^2 M^2

[३] कदाचित्खदिरस्य V A^2 M^2 : कदाचित्खादिरस्य A^1 खदिरस्य कदाचित् M^1

[४] तद्वत्सदृशः M^1 : तदा तद्वत्सदृशः A^1 तदा सदृशः V A^2 M^2

[५] बुर्बुरः ego : कर्बुरः V A^1 A^2 M^1 M^2

[६] खदिरबुध्या V A^2 M^1 M^2 : खदिरे बुध्या A^1

[७] प्रतिनिधीयते V A^2 M^1 M^2 : प्रतिनिर्धार्यते A^1

[८] परिगृह्यते V A^2 M^1 M^2 : प्रतिगृह्यते A^1

[९] ०न्तक्रियानिर्वाहाप्रसङ्गात् V A^1 M^2 : ०न्ताक्रियानिर्वाहाप्रसङ्गात् A^2 ०न्तनिर्वाहाप्रसङ्गात् M^1

[१०] षष्ठ्युपक्रम्येत ego : षष्ठ्युपक्रमेत V A^2 M^2 षष्ठ्युपक्रम्यते A^1 M^1

[११] ०णप्रतिपत्तिरपि V A^2 M^1 M^2 : ०णप्रतीतिरपि A^1

[१२] तिष्ठतीति V A^2 M^1 M^2 : तिष्ठति A^1

[१३] ०क्रान्ता तथैवासौ V A^1 A^2 M^2 : ०क्रान्तः तयैवासौ M^1

हि प्रतिपत्तिलाघवं भवति(3-1-40भा०तृ०ख०तृ०आ०पृ०49प्रदी०)। निर्दिष्टं विशिष्टं द्वित्त्वमित्यादि द्वित्वमेकाच् ग्रहणेन निर्दिष्टम्। यङुत्पत्त्यर्थं[१] पूर्व प्रवृत्तधातुत्वेनैव[२] इष्टसिद्धेः धातुत्वांशेन अनित्यत्वोपयोगः[३]। गुणो यङ्लुकोः (7-4-82/2630) इति द्वित्वाप्रवृत्तौ अभ्यासाभावादेतद्वैय्यर्थ्यं बोध्यम्[४] ॥ ११८ ॥

सम्प्रसारणं तदाश्रयं च कार्यं बलवत् ॥ ११९॥
क्वचिद्विकृतिः प्रकृतिं गृह्णाति ॥ १२०.१ ॥
औपदेशिकप्रायोगिकयोरौपदेशिकस्यैव ग्रहणम् ॥ १२०.२ ॥

शितपा शपानुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥ १२०.३ ॥

[१]

अत एवेति। अनित्यत्वेनैकाज्ग्रहणनिर्दिष्टद्वित्वादेः कतिपयस्य[५] यङ्लुकि प्रवृत्तिरेवेत्यर्थः[६]। पूर्वपक्षी यङ्लुकि इट इष्टत्वेन दोषान्युपन्यसनभाष्यं साधकत्वेन साधकत्वेनोपन्यस्य परोपन्यस्तं[७] प्रमाणं दूषयति।

---

[१] यङुत्पत्त्यर्थम् V A^2 M^1 M^2 : यङ् च प्रकृत्यर्थम् A^1

[२] पूर्व प्रवृत्तधातुत्वेनैव V A^2 M^2 : पूर्वं प्रवृत्तधातुत्वेनैव A^1 पूर्वम् अप्रवृत्तधातुत्वेनैव M^1

[३] अनित्यत्वोपयोगः V A^1 A^2 M^2 : नानेनोपयोगः M^1

[४] एतद्वैय्यर्थ्यं बोध्यम् V A^2 M^2 : एतद्वैय्यर्थ्यमिति बोध्यम् A^1 एव। तद्वैय्यर्थ्यमिति बोध्यम् M^1

[५] कतिपयस्य V A^2 M^1 M^2 : प्रतिपयस्य A^1

[६] प्रवृत्तिरेवेत्यर्थः M^1 : प्रवृत्तेरेवेत्यर्थः V A^1 A^2 M^2

[७] **इष्टत्वेन**.....परोपन्यस्तम् V A^2 M^2 : इष्टत्वेन उपन्यस्य परोपन्यस्तम् A^1 M^1

[२]

यङ्लोपेत्यादीति[१]। तथा च नेदम् अत्र प्रमाणिमिति भावः[२]।

[३]

अन्यथेति। एतत्परिभाषाङ्गीकारे[३]। **प्रकृतभाष्येति**। श्रूयमाणादेकाच इत्यर्थेन[४] यङ्लुकि दोषवारणपरेत्यर्थः[५]।

[४]

इत्यादिस्थेति। यङ्लुक्व्यावृत्त्यर्थं तु न तत्[६]। तत्राम्प्रवृत्त्या[७] लिटोऽभावात्। केचित्तु[८] बेभिदीति इत्यादौ चाकर्तीत्यादौ च श्नम् शपोः अभावायैषावश्यमाश्रयणीया। अदादिपाठेन बोभोति[९] चाकशीति इत्यादौ[१०] शपो लुक्यपि स्वस्वगणपाठस्याव्याहततया[११] श्नमादेर्दुर्वारत्वात्। अजघाः बेभिदीति निर्वीकरणभाष्यप्रयोगेण[१२] ध्वनितैषा।

---

[१] यङ्लोपेत्यादीति A^1 : **यङ्लोपे इत्यादीति** V A^2 M^1 M^2

[२] अत्र प्रमाणिमिति भावः V A^1 A^2 M^2 : अप्रमाणिमित्यर्थः M^1

[३] एतत्परिभाषाङ्गीकारे V A^2 M^2 : एतत्परिभाषानङ्गीकारे A^1 M^1

[४] इत्यर्थेन V A^1A^2 M^2 : यङ्लोप इत्यर्थेन M^1

[५] यङ्लुकि दोषवारणपरेत्यर्थः V A^2 M^1 M^2 : यङ्लोपे दोषवारणायेत्यर्थः A^1

[६] तु न तत् V A^2 M^2 : तेन तत् A^1 एतत् M^1

[७] तत्राम्प्रवृत्त्या V A^1A^2 M^2 : तत्राप्रवृत्त्या M^1

[८] केचित्तु V : केचित् A^1 om M^1 किञ्चित्त् M^2

[9] बोभोति ego : बोऽभूत् V A^1A^2 M^1 M^2

[१०] चाकर्तीत्यादौ च श्नम्.....इत्यादौ V M^2 : चाकर्तीत्यादौ च श्नम्..... अदादि पाठे नाको भूत् चाकर्तीत्यादौ A^1 om A^2 चाकर्तीत्यादौ श्नम्..... बोऽभूत चाचकत इत्यादौ M^1

[११] ०पाठस्याव्याहततया V A^2 M^2 : ०पाठव्याहततया A^1 ०पाठस्याव्याप्तिहततया M^1

[१२] निर्वीकरणभाष्य०V M^1 M^2 : निर्विकरणभाष्य० A^1 विकरणभाष्य० A^2

अत्रानुबन्धेन निर्देशः स्वरूपेण[१] विवक्षितः न ङितः इत्यादिरूपेण[२]। तेन नर्नृत्तीति इत्यत्र[३] नाभ्यस्तस्य[४]...(7-3-87/2503) इति निषेधः। दाधर्ति ...(7-4-65/ भा०ष०ख०च०आ०पृ०257-258) इति सूत्रे[५] त इति क्ते[६] इति नियमार्थमत्रैवानुदात्तेत्वादिलक्षणमात्मनेपदं नान्यत्र यङ्लुकि इति भाष्यं[७] च न असङ्गतम्। अनुदात्तङित...(1-3-12/2157) इति सूत्रे स्वरूपेणानुबन्धस्या-निर्देशेन यङ्लुकि प्रवृत्तेः। ज्ञापकं च अत्र वा द्रुहादीनाम् इति वक्तव्ये पृथक्तेषामुपादानमित्याहुः।

पदगौरवाद्योगविभागो गरीयान् ॥ १२१ ॥

अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ॥ १२२ ॥

[१]

त्रीण्येवेति। अपृक्तस्य...(1-2-41/251) इति अत्यखण्डमिति[८] भावः। अल्ग्रहणे मात्रागौरवं[९] स्पष्टमेव । एकपदघटिते मात्रालाघवविचारोऽस्त्येव। यथा वामि

---

[१] ०बन्धेन निर्देशः स्वरूपेण V A^1A^2 M^2 : ०बन्धनिर्देशः स्वरूपेणैव M^1

[२] इत्यादिरूपेण V A^2 M^2 : इत्यादौ स्वरूपेण A^1 M^1

[३] नर्नृत्तीति इत्यत्र V A^2 M^2 : नर्नृत्यतीत्यत्र A^1 न नृत्यतीत्यत्र M^1

[४] नाभ्यस्तस्य V A^2 M^1 M^2 : नानभ्यासस्य A^1

[५] दाधर्ति... इति सूत्रे V M^2 : दाधर्तीत्यत्र A^1 दधाति इति सूत्रे दाधर्ति इत्यत्र सूत्रे M^1

[६] त इति क्ते V A^2 M^2 : तेति क्तेति A^1 क्तेक्ति ते M^1

[७] यङ्लुकि इति भाष्यम् V A^2 M^1 M^2 : यङ्लुकि च भाष्यम् A^1

[८] इति अत्यखण्डमिति V A^2 M^2 : इत्यखण्डमिति A^1 M^1

[९] मात्रागौरवम् M^1 : मात्राग्रहणम् V A^1 M^2 मात्र गौरवम् A^2

(1-4-5/ 304) इत्यत्र[१]। एतेन षट्संज्ञायां रेफं पठित्वा षड्भ्यः इत्यत्राचतुर इति पठित्वा षट्चतुर्भ्यः षट्त्रिचतुर्भ्यो हलादिः (6-1-179/3725) इत्यत्र[२] चतुर्ग्रहणं व्यर्थमित्यपास्तम्। पदगौरवात्। प्रायेणेत्यस्य व्यावर्त्यमाह- **अचिश्निवति**।[३] प्रायेणेति इति[४]। उक्तमिति शेषः।

॥ इति श्री सतारा राघवेन्द्राचार्यविरचितायां परिभाषेन्दुशेखरव्याख्या-त्रिपथगायां शास्त्रशेषनामकं तृतीयं प्रकरणम् ॥

T T T T T

---

[१] यथा वामि इत्यत्र V A^2 M^2 : अथ नामि इत्यत्रA^1 यथा नामीत्यत्र M^1

[२] षट्त्रिचतुर्भ्यो हलादिः इत्यत्र V A^2 M^2 : हलादिरित्यत्र A^1 षट् हलादिरित्यत्र M^1

[३] अचिश्निवति M^1 : अचिश्विति V M^2 अपि त्विति A^1 अचिश्न्वीति A^2

[४] प्रायेणेति इति A^1 A^2 M^1 : प्राणेति इति V M^2

अत्रानुक्ताः अपि[१] परिभाषाः दिक् प्रदर्शनाय व्याख्यायन्ते।

सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः॥ १॥

उदाहरणानि स्फुटानि। इयञ्च न्यायसिद्धा। पश्चात्प्रवर्तमानविध्येकवाक्यतापन्न अनुदात्तम् ...(6-1-158/3650) इत्यनेन पूर्वप्रवृत्तस्वरनिवृत्तेः[२]। अन्यत्रेति तु ज्ञापकसिद्धम्। तास्यनुदात्तेत्[३] ...(6-1-186/3730) इति सूत्रे तासिग्रहणात्। तासिस्वरेण सति शिष्टेन[४] सार्वधातुकानुदात्तत्वसिद्धेः[५] तद्वैयर्थ्यम्।

यत्तु प्राचीनविवरणकृता यत्र विकरणः स्वरभाक् तत्रैव नान्यत्रेति निषेधः। यत्र तु विकरणान्तरं तथा तत्र[६] नायं धर्मिग्राहकमानात्। तेन दीव्यत इत्यत्र श्यन् स्वर एवेत्युक्तम्। तन्न। दाधाघु ... (1-1-20/2373) इति सूत्रस्थभाष्यविरोधात्। तत्र हि दैवादन्तो दिवादौ[७] पठ्यत इत्युक्तम्। खश् ... (3-2-83/द्र०भा०तृ०ख०प्र०आ०पृ०176) सूत्रस्थभाष्यविरोधश्च[८]। तत्र हि खश्[९] स्वरेण श्यन् स्वरस्य बाधः उक्तः। इयञ्च अनुदात्तं सर्वम्...(8-1-18/403) इत्यत्र कैय्यटे स्पष्टा[१०]।

---

[१] अत्रानुक्ताः अपि M^1 : अत्रानुक्ताः V A^1 A^2 M^2

[२] पूर्वप्रवृत्तस्वरनिवृत्तेः V A^1 M^2 : पूर्वस्वरनिवृत्तेः A^2 पूर्वस्य अनिवृत्तेः M^1

[३] तास्यनुदात्तेत् A^2 : तास्यनुदात्तात् V A^1 M^1 M^2

[४] शिष्टेन V A^1 A^2 M^2 : शिष्टत्वेन M^1

[५] ०नुदात्तत्वसिद्धेः V A^1 A^2 M^2 : ०नुदात्तसिद्धेः M^1

[६] विकरणान्तरं तथा तत्र M^1 : विकरणान्तं तथा तत्र V M^2 विकरणान्तरं तत्र A^1 विकरणान्तं तथा च तत्र A^2

[७] दैवादन्तो दिवादौ V M^2 : दैवाद्यन्तदिवादौ A^1 दैवादत्त दिवादौ A^2 दिवाद्यन्ते दिवादौ M^1

[८] ०विरोधश्च V A^2 M^2 : ०विरोधात् A^1 M^1

[९] खश् V A^2 M^1 M^2 : खशः A^1

[१०] स्पष्टा V A^2 M^1 M^2 : स्पष्टम् A^1

आगमाः अनुदात्ताः ॥ २ ॥

उदाहरणं लविषीयेति। अत्र हि विशेषविहितत्वात् परत्वाच्च पूर्वं सीयुटि ततो लादेशे प्रत्ययसंज्ञा सन्नियोगेन विधीयमानमाद्युदात्तत्वं सीयुट एव स्यादिति इदम्। आद्युदात्तश्च (3-1-3/भा०तृ०ख०प्र०आ०पृ०16) इत्यत्र भाष्ये स्पष्टैषा[१]।

सौवर्यः सप्तम्यः तदन्तसप्तम्यः[२] ॥ ३ ॥

अत्र च ज्ञापकं भीह्री...(6-1-192/भा०ष०ख०ष०आ०पृ०172) इति सूत्रे प्रत्ययात्पूर्वमिति। इयं 'चतुरः[३] शसि' (6-1-167/3692) इत्यत्र ऊडिदमित्यत्रैव[४] चतुर्ग्रहणे कार्ये 'चतुरः शसि' इत्यारम्भसामर्थ्यात्।

एकपदस्वरे प्रत्ययलक्षणं न ॥ ४ ॥

अत्र च ज्ञापकं[५] कनोनित्त्वात्सिद्धे[६] संज्ञायामुपमानम् ...(6-1-204/3692) इति सूत्रम्[७]।

---

[१] आगमाः अनुदात्ताः..... भाष्ये स्पष्टैषा V M^2 : आगमानुदात्ताः..... भाष्ये स्पष्टैषा A^1 jmp A^2 आगमाः अनुदात्ताः। **उदाहरणं लविषीयेति**। तत्र..... भाष्ये स्पष्टैषा M^1

[२] सौवर्यः.....०सप्तम्यः V M^1 M^2 : सौवर्य .....०सप्तम्यः A^1 सौवर्यः .....०सप्तम्याः A^2 स्वरविधौ सप्तम्यः तदन्तसप्तम्यः भवन्ति इति भाष्यपाठः।

[३] इयं चतुरः V M^1 A^1 M^2 : इयं च चतुरः A^2

[४] ऊडिदमित्यत्रैव V A^1 M^2 : ऊडिदपित्यत्रैव A^2 मित्यत्रैव M^1

[५] अत्र च ज्ञापकम् A^1 : अत्र ज्ञापकम् V A^2 M^1 M^2

[६] कनो नित्त्वात्सिद्धे V M^2 : कनो नित्यत्वात् सिद्धे A^1 A^2 नित्यत्वात् सिद्धे M^1

[७] सूत्रम् V A^2 M^1 M^2 : सूत्रेणA^1

एकपदेत्युक्तेः दधिति[१]ष्ठतीत्यत्र तिङ्ङतिङः[२]...(8-1-28 भा०प्र०ख०न० आ०पृ०523) इति निघातसिद्धिः[३] इत्यन्यत्र विस्तरः। न लुमता...(1-1-63) इत्यत्र भाष्ये स्पष्टैषा।

उत्तरपदत्वे च अपदादिविधौ प्रत्ययलक्षणप्रतिषेधः॥ ५॥

(भा०प्र०ख०न०आ०पृ०525 न लुमताङ्गस्य (1-1-63)

वाचनिक्येषा। तेन परमवाचावित्यत्र[४] न कुत्वम्।

विवक्षातः कारकविभक्तयो नाना भवन्ति॥ ६॥

(1-4-23 द्र०भा०द्वि०ख०तृ०आ०पृ०243)

तेनाधिकरणविवक्षायां ग्रामे गच्छतीत्यादि सिद्ध्यति।

छन्दसि दृष्टानुविधिः॥ ७॥

तेन द्यावाचिदस्मै[५] इति सिद्धम्।

छन्दोवत्सूत्राणि भवन्ति[६]॥ ८॥

(1-1-1 भा०प्र०ख०तृ०आ०पृ०153भा०इ०)

तेन वृद्धिरादैजित्यत्र न कुत्वम्।

सविशेषाणानां वृत्तिर्न॥ ९॥

---

[१] एकपदेत्युक्तेः दधिति० V A^2 M^1 M^2 : एकपदेत्युक्ते दधिति० A^1

[२] तिङ्ङतिङः V A^1 M^2 : तिङतिङः A^2 M^1

[३] निघातसिद्धिः V A^2 M^1 M^2 : निपातसिद्धिः A^1

[४] परमवाचावित्यत्र V A^1 A^2 M^2 : परमवाचेत्यत्र M^1

[५] द्यावाचिदस्मै V A^2 M^1 M^2 : सर्वा वाचीदस्मा A^1

[६] सिद्धम्। छन्दोवत्सूत्राणि भवन्ति। V A^2 M^1 M^2 : सिद्धिः A^1

वृत्तस्य वा[१] विशेषणयोगो न[२] ॥ १० ॥ (2-1-1भा०द्वि०ख०प्र०आ०पृ०320)

आद्यमनित्यसमासविषयम्[३]। द्वितीयं तु नित्यसमासविषयम्। तेन महतः कुम्भ-स्येति न[४] ।

विभज्य पदानि व्याख्यायन्ते। क्रमेण वा ॥ ११ ॥

संस्कृत्य पदान्युत्सृज्यन्ते[५]। वाक्यादेव उद्धृत्य[६] पदानि संस्क्रियन्ते।

तत्राप्याद्या यथा लक्ष्यम्। अन्त्यापि प्रायेण तथा।

अनेकपदनिमित्तके नियतैव ॥ १२ ॥

सापेक्षमसमर्थवत् ॥ १३ ॥ (2-1-1 भा०द्वि०ख०प्र०आ०पृ०318 भा०इ०)

समानाधिकरणमसमर्थवत् ॥ १४ ॥

एकादेशशास्त्रनिमित्तकस्य न षत्वम्[७] ॥ १६ ॥ (1-1-51 भा०प्र०ख०स०आ०पृ०431 भा०इ०)

---

[१] वा ego : च V A^1 A^2 M^1 M^2

[२] विशेषणयोगो न A^1 : विशेषणयोगेन V A^2 M^1 विशेषणबोधो न M^2

[३] ०नित्यसमासविषयम् V A^1 A^2 M^2 : ०नित्यं समासविषयम् M^1

[४] कुम्भस्येति न V M^2 : कुम्भस्येति A^1 कुम्भस्येपिति न A^2 कुम्भस्येति उपेति न M^1

[५] ०दान्युत्सृज्यन्ते V A^1 M^1 M^2 : ०दानुत्सृज्यन्ते A^2

[६] वाक्यादेव उद्धृत्य V A^1 M^2 : वाक्यादयोद्धृत्य A^2 वाक्यादपोद्धृत्य M^1

[७] न षत्वम् V A^2 A^1 M^2 : न षः M^1

वृद्धेर्लोपो बलीयान् ॥ १७ ॥

अत्र चाग्लोपिनां[१] नेति प्रतिषेधो ज्ञापकः (7-4-2भा०ष०ख०प्र०आ०पृ० 237-238)। तेन पटुमाख्यत् अपीपठदित्यत्र[२] सन्वद्भावो न। इयञ्च अनित्या । हलिकल्योः¶ …(3-1-20/ वा०सं०1761) अदन्तत्वनिपातनात्।

न कर्मधारयान्मत्त्वर्थीयो[३] बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरः ॥ १८ ॥

इयञ्चानित्या। असुबूवत इति भाष्यप्रयोगात्। (भा०ष०ख०प्र०आ०पृ०198 प्र (7-3-44) णावच आदेशो न ¶…(वै०सि०कौ० चु० प्र०पृ०410-411) । ओः पु…(7-4-80/ 2577) इति सूत्रे पवर्गादिग्रहणात्[४]। उपधाह्रस्वो द्वित्वात्प्रबलः। ओणेः ऋदित्करणात्।

कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानम् ॥ १९ ॥

भावप्रत्ययेन गुणप्रधाननिरूपितशक्तिः[५] प्रधानशक्तिवद्भासते ॥ २० ॥

तेन[६] पक्वौदनो[७] भुज्यते इत्यत्र न द्वितीया।

लक्ष्ये लक्षणं सकृदेव प्रवर्तते ॥ २१ ॥

उक्तार्थानामप्रयोगः ॥ २२ ॥

---

[१] चाग्लोपिनां ego : चालोपिनां V A^1 A^2 M^1 M^2

[२] अपीपठदित्यत्र A^1 : अपपटदित्यत्र V A^2 M^1 M^2

[३] ०त्त्वर्थीयो A^1 M^1 : ०त्त्वर्थश्यो V A^2 M^2

[४] पवर्गादिग्रहणात् A^2 : पवर्गग्रहणात् V M^1 M^2 वर्णग्रहणात् A^1

[५] गुणप्रधाननिरूपितशक्तिः V A^2 M^2 : गुणक्रियानिरूपितशक्तिः A^1 M^1

[६] तेन V A^1 A^2 M^2 : om M^1

[७] पक्वौदनो V A^2 M^1 M^2 : पक्वोदनो A^1

तेन क्रियासमभिहारे पौनः पुन्ये[१] यङि[२] नित्यवीप्सयोः (8-1-4/2140) इति द्वित्वं न । न्यायसिद्धैषा। अर्थस्योक्तत्वेन पुनः प्रयोग वैयर्थ्यात्। इयञ्च अनित्या। तेन द्वौ ब्राह्मणौ इत्यादिसिद्धम्[३]।

विप्रतिषेधे आभीयासिद्धत्वं न ॥ २३ ॥

घुमास्थ...(6-4-66/2462) इति सूत्रे हल्ग्रहणेन ज्ञापित्तैषा।

असति बाधके प्रमाणानां सामान्ये[४] पक्षपातः ॥ २४ ॥

शिष्यमाणं लुप्यमानार्थाभिधायि ॥ २५ ॥

प्रयुक्तानामन्वाख्यानम्[५]। यथा लक्षणमप्रयुक्ते ॥ २६ ॥

तेन वचत्तीत्यादि[६] न । प्रयोगमूलत्वाद्[७] व्याकरणस्मृतेः न्यायसिद्धैषा।

जहत्स्वार्थावृत्तिः ॥ २७ ॥

अजहत्स्वार्था वृत्तिः[८] ॥ २८ ॥

जहत्स्वार्था तु तत्रैव, यत्र[९] रूढिर्विरोधिनी।

इयमन्त्या सर्वत्र।

---

[१] क्रियासमभिहारे पौनः पुन्ये V A^2 M^2 : क्रियाद्योत्यपौनः पुन्ये A^1 पौनः पुन्ये M^1

[२] यङि V A^1 A^2 M^2 : यङिति M^1

[३] तेन द्वौ ब्राह्मणौ इत्यादिसिद्धम् A^2 : तेन द्वौ ब्राह्मणौ इति सिद्धम् V M^1 M^2 तेन द्वौ ब्राह्मणौ इत्यादि सिद्धिः A^1

[४] सामान्ये V A^1 M^2 : सामान्येन A^2 om M^1

[५] प्रयुक्ताना० V A^1 A^2 M^2 : प्रत्युक्ताना० M^1

[६] वचत्तीत्यादि V A^2 M^2 : वञ्चतीत्यादि A^1 M^1

[७] प्रयोगमूलत्वाद् V A^2 M^2 : प्रयोगमूलकत्वाद् A^1 M^1

[८] वृत्तिः V M^1 M^2 : वृद्धिः A^1 A^2

[९] तत्रैव, यत्र V A^1 A^2 M^2 : यत्रैव, तत्र M^1

इयं के परिभाषेन्दुशेखरेण विधार्यताम् ।

यतस्त्रिपथगा विष्णुपदस्पृक् सुमनःप्रिया ॥

॥ इति राघवेन्द्राचार्य्यकृता परिभाषेन्दुशेखरव्याख्या त्रिपथगा समाप्ता ॥

॥ शुभं भूयात् ॥

वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ।

काशीसंस्कृतमुद्रायामङ्कितोयं शिलाक्षरैः ॥[१]

---

[१] इयमन्त्या सर्वत्र । इयं के परि०..... **शिलाक्षरैः ॥** V :

इयमन्त्या सर्वत्र ।

इयं के परिभाषेन्दुशेखरेण विधार्यताम् ।

यतस्त्रिपथगा विष्णुपदस्पृक् सुमनःप्रिया ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारीणाप्यायनी***श्री राघवेन्द्राचार्यकृतिः परिभाषेन्दुशेखरव्याख्या त्रिपथगा समाप्ता ।

सीता रामसुधीजन्मसुब्रह्मण्याख्यसूरिणा ।

लिखितेयं त्रिपथगा पाल्यतां यत्नतश्चिरम् ॥

॥श्री गणेशाय नमः ॥

क्रोधनाब्दे तुलामासे द्वितीयायां सितच्छदे ।

समग्रं लिखिता बुद्धिमतां मतिसुवृद्धये ॥

श्रीविश्वनाथाय नमः ॥ श्रीमदेकाम्रनाथस्वामिने नमः ॥ A^1 : अन्त्या सर्वत्र

इयं के परिभाषेन्दुशेखरेण विधार्यताम् ।

यतस्त्रिपथगा विष्णुपदस्पृक् सुमनःप्रिया ॥

श्रीमत् पदवाक्यप्रमाणपारावारीणव्यासनीलकण्ठान्तेवासिना राघवाचार्येण विरचिता त्रिपथगा समाप्तः A^2 : श्रीहयग्रीवाय नमः ॥ प्रजोत्पत्तौ कृष्णपक्षे श्रावणे पञ्चमी तिथौ शनिवारे त्रिपथगाम् अलिखद्रंगनायकः M^1 :

॥इति राघवेन्द्राचार्य्यकृता परिभाषेन्दुशेखरव्याख्या त्रिपथगा समाप्ता ॥

॥शुभम्भूयात् ॥ ॥छ ॥

॥वाराणसीप्रसादस्य नियोगेन प्रयत्नतः ।

काशीसंस्कृतमुद्रायामङ्कितोयं शिलाक्षरैः ॥ M^2